Alien, *a.* विदेशीय, अन्यदेशीय. **2** विरक्त; विरुद्ध, भिन्न, अप्रस्तुत **-ate,** *v. t.* (affection) विघट् *c.*, विश्लिष् *c.*, विनश् *c.*, विभिद् 7 P or *c.*, विच्छिद् 7 P or *c.* **2** (person) विरज् *c.*, विअपरक्त *a.* कृ 8 U. **3** पराधीन *a.* कृ. परस्वत्वे प्रतिपद् *c.* **-ation,** *s.* विषदनं, विरागः, विरक्तिः *f.*

Alight, *v. i.* अवतॄ 1 P, उपविश् 6 P, अवनिपत् 1 P.

Alight, *a.* प्रदीप्त.

Alike, *a.* सदृश (शी *f.*), तुल्य, समान, सम.

Ailment, *s.* आहारः, भोजनं. **-Al, -Ary,** *a.* पोषक, पुष्टिप्रद, शक्तिवर्धक. **-ation,** *s.* पोषणं, भरणं

Alive, *a.* जीवत् (न्ती *f.*), सजीव, सचेतन; 'I caught him a.' जीवग्राहमग्रहीषं (D. K. II. 4). **2** अभिज्ञ (with gen.), or विद् 2 P, *See* **Know.**

Alkali, *s.* क्षारः, सर्जिका, *See* **Natron.** *a.* **-fy,** *v. t.* क्षारीकृ 8 U. **-ne,** *a.* क्षारस्वभाव, क्षारविशिष्ट.

All, *s.* सर्वं, अखिलं, साकल्यं. -*a.* सर्व-विश्व, *pron. a.*, अखिल, सकल, कृत्स्न, निखिल, समस्त; 'not at a.' न किमपि, न मनागपि 'at a. times' सर्वदा; 'a. but' प्राय, कल्प, in comp.; 'a. but dead' मृतप्राय; छिन्नप्राय 'a. but cut'; 'a. of a sudden' अकस्मात्, सहसा, सपदि, एकपदे; 'this is not a,' एतावतापि दोषो &c. न समाप्यते; 'a. I can' यथाशक्ति, यथासामर्थ्यं; 'this is a. I can do to serve you' एतावान्मे विभवो भवंतं सेवितुं (M. 2); 'by a. means' सर्वथा; 'a.-in-a. of one's life' जीवितसर्वस्वं; 'a. at once' युगपत्; 'a. round,' सर्वतः, सर्वदिक्षु, समंततः; 'in a.' साकल्येन, पिंडीकृत्य, मिलित्वा; 'give me 20 rupees in a.' एवं पिंडीकृत्य मह्यं विंशतिं रूपकान्देहि, सर्वे मिलित्वा सप्त वयं 'we are 7 in a.'; 'a.-bearing' सर्वंसह; 'a.-conquering' सर्वदमन, सर्वजय, सर्वदम; 'a.-destroying' सर्वघ; 'a.-knowing' सर्वज्ञ, सर्वविद्; 'a.-pervading' सर्वव्यापिन्, विश्वव्यापक, सर्वगत, 'a. powerful' सर्वशक्तिमत्.

Allay, *v. t.* प्र-उप-शम् *c.* (शमयति), नियम् *c.*, निर्वा *c.* (वापयति); 'a. ing of heat' निर्वापणं. **2** सांत्व् 10, तुष् *c.* **-er,** *s.* शमकः, शांतिदः-करः. **-ment,** *s.* प्रशमनं, सांत्वनं; 'a. of hunger' क्षुत्प्रतीकारः.

Allege, *v. i.* प्रतिज्ञा 9 A, वद् 1 P, दृढं ब्रू 2 U; 'the charges a. ed against me' मयि समारोपिता दोषाः. **2** छद्म कृ 8 U, व्यपदिश् 6 P, मिथ्या वद्. **3** उदाहृ 1 P. **-ation,** *s.* प्रतिज्ञा, उक्तिः *f.*, वचनोपन्यासः. **2** दोषारोपः, मिथ्याभियोगः **3** व्यपदेशः, छद्मन् *n.*, व्याजः.

Allegiance, *s.* निष्ठा, भक्तिः *f*, अनुरागः; 'a. to the king' राजनिष्ठा.

Allegory, *s* रूपकं, दृष्टांतः. **-ical,** *a.* लाक्षणिक (की *f.*), रूपकमय (यी *f.*). **-ically,** *adv.* दृष्टांततः, दृष्टांतेन. **-ize,** *v. t.* दृष्टांतयति (D.), रूपकेण दृश् *c.*

Alleviate, *v. t* उप-प्र-शम् *c.*, नियम् *c.*, सांत्व् 10; निर्वा *c.* (वापयति), लघयति (D.), लघूकृ 8 U. **-ion,** *s.* उप-प्र-शमः, निर्वापणं; 'a. of sorrow' दुःखनिर्वापणं. **-ive,** *a.* शांतिद, शमक.

Alley, *s* उद्यानपथः, वीथि-थी *f.* **2** दुर्गममार्गः, संबाधपथः.

Alligate, *v. t.* सं-अनु-बंध् 9 P. **-ion,** *s.* संबंधः, संयोजनं.

Alligator, *s.* नक्रः, ग्राहः.

Alliteration, *s.* अनुप्रासः

Allocate, *v. t.* स्थानं दा 3 U. **-ion,** *s.* स्थानदानं.

Allot, *v. t.* परिकॢप् *c.*, दा 3 U, विभज् 1 U. **-ment,** *s.* विभागः, विभजनं. **2** अंशः, भागः.

Allow, *v. t.* अनुज्ञा 9 U, अनुमन् 4 Ā, अनुमुद् 1 Ā. **2** Give, q. v. **3** ग्रह् 9 P. *See* **Admit.** **4** उप-ईक्ष 1 Ā, विषद् 1 Ā; सकस्मादार्येणापक्रामत्यपेक्षितः (Mu. 3); 'I a. my feet to be burnt' दह्यमानावपि

चरणावुपेक्षे. **5** (for) न्यूनीकृ 8 U, न गण् 10, **-able,** *a.* अनुज्ञेय, अनुमोद्य; 'a. mistake, क्षमार्हापराधः; ' not a.' प्रति-नि-षिद्ध. **-ance,** *s.* अनुज्ञा, अनुमतिः *f.*, अनुमोदनं. **2** वेतनं, निरूपितमूल्यं, वृत्तिः *f.* **3** स्वीकारः; न्यूनीकरणं.

Alloy, *s.* मिश्रणं, दोषः, न्यूनता. **2** अपद्रव्यं, कुप्यं, मिश्रधातुः. **-ed,** *a.* मिश्रित, दूषितः 'un-a. pleasure' केवलं-दुःखासंभिन्नं-सुखं.

Allude, *v. t.* उद्दिश्य-अधिकृत्य वद् 1 P or वच् 2 P or अभिधा 3 U; उद्दिश् 6 P, सूच् 10, लक्षीकृ; अनुसंधा; 'this story a. s to myself' इयं कथा मामेव लक्षीकरोति (S.7). **-Allusion,** *s.* उद्देशः, उदाहरणं, कीर्तनं; इंगितं, सूचनं; 'in a. to' अधिकृत्य, समुद्दिश्य.

Allure, *v. t.* ह्व 1 P, आकृष् 1 P, वि-प्र-लुभ् c. **-ing,** *a.* प्रलोभक, हारिन्, आकर्षक; 'a. things' प्रलोभनवस्तूनि. **-ment,** *s.* प्र-वि-लोभनं; वंचनं, विकारहेतुः, आकर्षणं.

Alluvium, *s.* पुलिनं, नदीरयसमाहृता मृत्तिका. **-Alluvial,** *a.* पुलिनमय (यी *f.*).

Ally, *s.* मित्रं, सहायः, पक्ष्यः, सहकारिन् *m.* – *v. t.* संबंध 9 P. **2** संधा 3 U; संसृज् 10, संश्लिष् c. **-Alliance,** *s.* संधिः; 'friendly a.' सख्यं, मैत्री. **2** संबंधः, सपर्कः; 'matrimonial a.' विवाहसंबंधः.

Almanac, *s.* पंजिका, पंचांगं.

Almighty, *a.* सर्वशक्तिमत्, अमितौजस्; सर्वशक्, सर्वसमर्थ.

Almond, *s.* वातामफलं.

Almonry, *s.* भिक्षादानगृहं, भैक्ष्यशाला. **-Almoner,** *s.* भिक्षादाने अधिकृतः.

Almost, *adv.* प्राय, भूयिष्ठ, कल्प, affixed to adj.; 'a. dead' मृतकल्प, मृतप्राय; 'when the night had a. worn away' क्षीणभूयिष्ठायां क्षपायां; 'it is a. dawn now' अधुना प्रभात-प्राया-कल्पा शर्वरी. **2** प्रायः, प्रायशः, 'a. all' प्रायः सर्वे. **3** (With num.) ex. by आसन्न, उप, in comp.; उप-आसन्न-दशाः &c.

Alms, *s.* भैक्ष्य, भिक्षा, भिक्षादानं, 'beg a.' भिक्षाटनं कृ 8 U, भिक्षू-याच् 1 A; 'a.-giving' भिक्षादानं, त्यागः; 'a. house' अनाथ-गृहं, भिक्षागेहं; 'a. man' भिक्षुकः, भिक्षाशिन् *m.*

Aloe, *s.* सहा; कुमारीरसोऽब्धवो बोलः.

Aloft, *adv.* ऊर्ध्वं, उपरि; 'a. in the air' विहायसा, व्योमवर्त्मना.

Alone, *a.* एक, अद्वितीय, एकाकिन् **2** एव, केवलं, मात्र in comp.

Along, *prep.* अनु in comp. or with acc., or by instr.; 'a. the way' अनुमार्गं, 'a. the city of Ayodhyâ' अयोध्यानगरीमनु; 'a. a road' मार्गेण. **2** पुरः, अग्रे, पुरस्तात्; 'a. with' सह, सार्धं, *See* **With**; 'all a.' आप्रथमं, प्रथमादधि; 'a. side' पार्श्वतः; समीपं-पे.

Aloof, *adv.* दूरे, अंतरे, पृथक्; 'standing a.' दूरस्थ; 'keep a.' पृथक् निधा 3 U, न गण् 10.

Alopecia, *s.* अकेशता, केशहीनत्वं.

Aloud, *adv.* उच्चैः, उच्च-तार-स्वरेण. **2** प्रकाशं, प्र-उत-मुक्तकंठं (weep a.), 'call a.' शब्दायते (D.).

Alphabet, *s.* वर्णमाला. **-ical,** *a.* वर्णक्रमानुसारिन्. **-ically,** *adv.* वर्णक्रमेण, वर्णानुसारेण.

Already, *adv.* पूर्वं, पुरा, प्राक्, with एव; sometimes by एव alone; 'the moon has a. risen' उदित एव हिमरश्मिः.

Also, *adv.* अपि, च. **2** अपरंच, पुनश्च, अपिच. **3** तद्वत्.

Altar, *s.* वेदिः-दी *f.*, चैत्यं, स्थंडिलं.

After, *v. t.* अन्यथा कृ 8 U, विपर्यस् 4 P, विपर्यासं नी 1 P, परिवृत् c. **2** विकृ, विरूप् 10, 'a. ed in appearance' भिन्नाकार इव लक्ष्यमाण. – *v. i.* परिवृत् 1 A, अन्यथा-अन्यरूप *a.* भू; विपर्यासं या 2 P; **-ation,** *s.* परि(री) वर्तः, विकारः, विकृतिः *f.*, विपर्यासः.

Altercate, *v. i.* विवद् 1 A, कलहायते (D.) **-ion,** *s.* विवादः, कलहः, वाग्युद्धं.

Alter-ego, *s.* लिंगदेहः, सूक्ष्मशरीरं.

Alternate, *a.* Ex. by पर्याय in comp.; 'a. service' पर्यायसेवा. – *v. t.* परिवृत् c.; ex. by a verb with पर्यायेण. **-ion,** *s.* विपर्ययः, परिवृत्तिः *f.*, पर्यायः. **-ive,** *s.* विकल्पः, पक्षः, पक्षांतरं; gen. ex. by words like गतिः, शरणं &c.; 'there is no other a.' अन्या गतिर्नास्ति, अन्यच्छरणं नालोक्यते (Ka. 152) **2** विकल्पः, विभाषा (in grammar). **-ly,** *adv.* पर्यायेण, यथाक्रमं.

Although, *conj.* यद्यपि, अपि.

Altimeter, *s.* उच्चत्वमापकं यंत्रं.

Altitude, *s.* उच्चत्वं, उच्छ्रायः, उत्सेधः.

Altogether, *adv.* सर्वथा, सर्वतः, अशेषतः, साकल्येन. **2** सहित-संहत-एकीकृत-*a.*; समं, एकीकृत्य.

Alum, *s.* स्फटी, तुवरी, सौराष्ट्री, स्फाटिकी.

Alveary, *s.* मधुकोषः; **2** कर्णशष्कुलिः *f.*

Always, *adv.* सदा, सर्वदा, अनिशं, सततं, सर्वकालं, निरंतरं, अनवरतं.

Amain, *adv.* प्रसभं, प्रसह्य, बलात्, सवेगं, जवेन.

Amalgam, *s.* कांस्यं, मिश्रधातुः, पारदसंसृष्टधातुः. **-ate,** *v. t.* संमिश्र् 10. **2** संसृज् 10, एकीकृ 8 U, संश्लिष् c. **-ation,** *s.* धातुसंमिश्रणं. **2** संयोजनं, संयोगः, संश्लेषः.

Amanuensis, *s.* लेखकः, लिपिकारः.

Amaranth, *s.* अम्लानपुष्पं. **2** अम्लानः, महासहा.

Amass, *v. t.* संचि 5 U, संग्रह् 9 P, संभृ 3 U, राशी-एकी-कृ 8 U. **-ment,** *s.* संचयः, संग्रहः, &c.

Amatory, *a.* कामिन्, प्रेमशील, शृंगारप्रिय.

Amaze, *v. t.* विस्मि c. (विस्मापयति, विस्मापयते), विस्मयाकुल-साश्चर्य-*a.* कृ 8 U. **-ed,** *a.* विस्मापित, विस्मित, विस्मयाकुल, साश्चर्य. **-ment,** *s.* विस्मयः, आश्चर्यं, विस्मयाकुलत्वं. **-edly,** *adv.* सविस्मयं; साश्चर्यं. **-ing,** *a.* विस्मयकारिन्, विचित्र, अद्भुत. **2** अतिरिक्त; अति pr.

Ambages, *s.* वक्रोक्तिः *f.*

Ambassador, *s.* दूतः, राजदूतः, प्रणिधिः, संदेशहरः. **-ship, -Ambassage,** *s.* दौत्यं, प्रणिधिकार्यं.

Amber, *s.* तृणमणिः.

Ambidextrous, *a.* उभयहस्तकुशल. **2** असरल, उभयपक्षपातिन्.

Ambient, *a.* व्यापक; निपातिन्, गामिन् in comp. **2** वेष्टक, परिवेष्टक.

Ambiguous, *a.* द्व्यर्थ, संदिग्धार्थ, अव्यक्त, अस्पष्ट, संदिग्ध. **-ly,** *adv.* अस्पष्टं, वक्रोक्त्या, द्व्यर्थतः. **-ness, -Ambiguity,** *s.* वक्रोक्तिः *f.*, संदिग्धार्थता, संदेहार्थः.

Ambit, *s.* मंडलं, चक्रवालं, वर्तुलं.

Ambition, *s.* स्पृहा, आकांक्षा. **2** कीर्तिस्पृहा, ऐश्वर्याकांक्षा, उच्चपदवांछा, 'a. o get a throne,' राज्यलोभः-तृष्णा. **-Ambitious,** *a.* सस्पृह, साकांक्ष, ऐश्वर्यप्रेप्सु, यशस्काम; 'who, a. of your throne, has roused your envy' केनाभ्यसूया पदकांक्षिणा ते जनिता (K. III. 4). **2** (Of hopes) दूराधिरोहिन्, उत्सर्पिन्. **-ly,** *adv.* ऐश्वर्याकांक्षया &c.

Amble, *v. i.* ललितं वल् 1 P, हु 1 A; धोर् 1 P. **-s.** धोरितं. **-er,** *s.* धोरितगामिन् *m.*

Ambrosia, *s.* अमृतं, सुधा, पीयूषं. **-al,** *a.* अमृतमय (यी *f.*), अमृततुल्य, (*s.*) in comp.

Ambulate, *v. i.* विचर् 1 P, परिक्रम् 1 U, 4 P, इतस्ततश्चर्. **-ion,** *s.* परिक्रमः, पर्यटनं.

Ambush, Ambuscade, *s.* (परावस्कंदनार्थी) निभृते स्थानं; निभृतावस्थितिः *f.*; 'they all lay in a.' सर्व एव ते निभृतं तस्थुः.

Ameliorate, *v. t.* वृध् c., श्रेयस्-साधीयस् कृ 8 U, समुन्नतिं नी 1 P, *See* **Improve.** **-ion,** *s.* वर्धनं, समुन्नतिः *f.*, श्रेयस्त्वं.

Amen, *adv.* ओम्, भवतु, एवमस्तु, तथास्तु.

Amenable, *a.* परानुयोगाधीन, अनुविधायिन्, आज्ञाकर (री *f.*), आपत्, वश्य पात्; 'a. to another's power' पराधिकारवशः.

Amend, *v. t.* सं-वि-परि-शुध् c., समा-प्रतिसमा-धा 3 U; 'a. one's life' पापाच्चित्रद् 1 A, पापं त्यक्त्वा धर्ममाचर् 1 P. – *v. i.* शुध् 4 P; समाधा pass., भद्रतर *a.* भू. **-ment,** *s.* संशोधनं; प्रतिसमाधानं. **2** दोषशोधनं &c. **-Amends,** *s.* प्रमार्जनं, निस्तारः, निष्कृतिः *f.*, शोधनं; 'to make a. for' प्रसद् 2 P, शुध् c.; *See* **Atone.**

Amenity, *s.* रम्यता, मनोज्ञता.

Amerce, *v. t.* *See* **Punish.**

Amiable, *a.* सुशील, सुप्रिय, सुजन. **2** प्रियदर्शन, रमणीय. **-ness,** *s.* सौजन्यं, सद्भावः, सुशीलत्वं. **-Amiably,** *adv.* सुशीलतया, प्रत्यि, स्नेहभावेन.

Amicable, *a.* मैत्र (त्री *f.*), हित, स्नेहशील; मित्रभावेन; 'a. settlement' मित्रभावेन निर्णयः. **-ness,** *s.* मित्रत्वं, सख्यं, सौहार्दं. **-Amicably,** *adv.* मित्रवत्, मित्रभावेन सौहार्देन.

Amid, -st, *prep.* मध्ये, अंतरे, अभ्यंतरे, (with gen.); मध्यगत-स्थित *a.* 'a. these thoughts he was pierced by an arrow' एवं विचारयन्-एवं विचारनिमग्नः सन्-बाणेन हतः.

Amiss, *a.* दोषिन्, अपराधिन्. **2** अनुचित, अयोग्य. – *adv.* अनुचितं, अयुक्तं; 'take a.' *See* **Misunderstand.**

Amity, *s.* मैत्री, स्नेहभावः, सौख्यं, संधिः.

Ammunition, *s.* युद्धसामग्री, युद्धोपकरणानि

Amnesia, *s.* स्मृतिं-भ्रंशः-नाशः.

Amnesty, *s.* (राजकृता) दोषक्षमा, दोषाद्विमोचनं.

Among, -st, *prep.* मध्ये, अभ्यंतरे, (with gen.); ex. by loc. or gen. of noun; 'a. cows the black one gives much milk' गवां गोषु वा कृष्णा बहुक्षीरा (S. K.) काव्येषु नाटकं रम्यं &c.

Amoretto, *s.* Lover, *q. v.*

Amorous, *a.* कामुक, प्रेमशील, रसिक, शृंगारप्रिय. **2** सविलास, सविभ्रम, ललित; 'a. sport' सविलासक्रीडा. **-ly,** *adv.* सकामं, सानुरागं; सविलासं, सविभ्रमं, ललितं.

Amount, *v. i.* उपचि-संख्या- pass.; संपद् 4 A; 'a. ing to' संख्याक in comp.; 'a. to 100' शतसंख्य-संख्याक; 'they a. in all to 24 men' एवं षंडांकृत्य चतुर्विंशतिनराः संपद्यंते; 'thus the families a. to 14' एवमेतान्येकत्र चतुर्दश कुलानि (Ka. 136); 'your whole speech a. s to this' एतावता-एवंच; एष तव वचसो निष्कर्षः-पिंडितोर्थः; 'your exertions do not a. to even a hundredth part of mine' तव व्यवसायो ममोद्योगस्य शततमीमपि कलां न

स्पृशति. -s. राशिः, परिमाणं, समुदायः, संख्या, समुच्चयः; 'by any a. of labour' महता श्रमेणापि; 'to the a. of 100' शतसंख्यं.

Amphibious, a. स्थलजलचर. 2 द्विधागति.

Amphibiology, s. संदिग्धवचनं, श्लेषः.

Amphitheatre, s. रंगः, रंगभूमि f., रंगांगणं.

Ample, a. विशाल, विपुल, बृहत्, विकीर्णः, विस्तृत. 2 पचुर, पर्याप्त, बहुल, यथेष्ट. **-ness,** s. विशालता. 2 प्राचुर्यं. **-Amply,** adv. सविस्तरं, प्रचुरं, यथेष्टं; 'he was a. rewarded' तस्मै प्रभूतं पारितोषिकं दत्तं. **-Amplify,** v. t. सविस्तरं-विस्तरेण -वर्ण् 10. 2 तन् 8 U, वृध् c., विस्तृ 9 U. **-Amplification, -Amplitude,** s. विस्तारः, वृद्धि f. 2 महत्त्वं, प्राचुर्यं.

Amputate, v. t. अंगं छिद् 7 P or निकृत् 6 P. **-ion** s. छेदः, कर्तनं.

Amulet, s. रक्षाकरंडः.

Amuse, v. t. विनुद् c., रम् c., नंद् c.; 'a. oneself' विह् 1 P, विलस् 1 P, क्रीड् 1 P. **-ment,** s. विनोदः, विनोदनं, क्रीडा, केलि f., विलासः, कौतुकं. **-ing,** a. विनोदिन्, विनोदनशील, हृदयंगम, रम्य.

Anachronism, s. कालगणनायां प्रमादः or भ्रमः. 2 कालनिर्देशप्रमादः.

Anæsthetic, a. संवेदनानाशक.

Anagogy, s. गूढार्थः.

Anagraph, s. वर्णनं. 2 परिगणनापत्रं.

Analogy, s. सादृश्यं, समानता, संबंधः. **-ical, -ous,** a. सदृश (शी f.), तुल्यरूप, समान, अनुरूप, संबंधिन्, आनुषंगिक (की f.). **-ly,** adv. सादृश्येन, औपम्येन.

Analphabete, s. निरक्षर, अनक्षर.

Analyze, v. t. व्याकृ 8 U, विभज् 1 U, विश्लिष् 7 P, विश्लिष्ट a. -खंडशः-पृथक् -कृ, विश्लिष् c. **-Analysis,** s. विभागः, व्यवच्छेदः, विभेदः, व्याकरणं. 2 सारः.

Anaphrodisiac, a. कामशामक.

Anarchy, s. अशासनं, अनीश्वरता, राजविप्लवः, अराजकता; 'when the country is in a.' अराजके जनपदे. **Anarch, Anarchist,** a. अराजकतापप्रतिपादक.

Anathema, s. अभिशापः, शापः, आक्रोशः. **-tize,** v. t. शप् 1 U, आक्रुश 1 P.

Anatomy, s. पृथक्करणं, विच्छेदः. 2 शरीरव्यवच्छेद-विद्या-शास्त्रं. **-ize,** v. t. (शरीरं) व्यवच्छिद् 7 P, पृथक् कृ. 2 भिद् 5 U, व्याख्या 2 P. **-ist,** s. व्यवच्छेदकः.

Ancestor, s. पूर्वपुरुषः; a. s पूर्वजाः (pl.), पितरः (pl.), पितृलोकः. **-Ancestral,** a. पितृक, पैतृक (की f.); 'a. property' पित्र्य रिक्थं. **-Ancestry,** s. पितरः, पितृ

अंश

Anchor, s. नौबंधनकीलः-लं, लांगलं. -v. t. कीलेन बंध् 9 P, स्थिरीकृ, गतिं निरुध् 7 U or पतिहन् 2 P.

Anchorite, s. यतिः, आरण्यकः, संन्यासिन् m., वनवासिन् m., वानप्रस्थः.

Ancient, a. पुराण, पुरातन (नी f.), पूर्व, भाक्कालीन, प्राक्तन, प्राचीन. -s. (a. s) वृद्धाः-प्राचीनपुरुषाः (pl.). 2 ध्वजः, पताका. 3 पणाशिन् m. **-ly,** adv. पुरा, पूर्वं, पूर्वकाले. **-ness,** s. प्राचीनता, पुरातनत्वं, &c.

Ancipital, a. द्विशीर्षक. 2 संदिग्ध.

And, conj. च repeated after each word joined, or after all. In the case of nouns, ex. by Dvandva comps.; 'the Sun and the Moon' आदित्यचंद्रौ. 2 (With adjectives) gen. ex. by Karm. comps.; अलसललितसुगधानि अंगकानि; (with numerals) by a comp. with अधिक, उत्तर; '100 a. 8' अष्टाधिकं-अष्टोत्तरं शतं. 3 (In the case of verbs) ex. by the use of gerunds; 'go a. tell him' गत्वा तस्मै कथय; sometimes by वा in questions; जात अस्ति ते माता स्मरसि वा तातं (U. 4). 4 अपि च, अन्यच्च, किं च. 'A. then' अथ, तदनु, ततः; 'a. yet,' तथापि, or ex. by च-च; असुलभा सकलेंदुसुखी च सा किमपि चेदमनंगविचेष्टितं (V. 2).

Androgynous, a. द्विलिंगविशिष्ट.

Aneal, v. t. तैलेन अभ्यंज् 7 P.

Anear, adv. प्रायः, 2 prep. संनिधौ, सकाशे. 3 v. t. अभिगम् 1 P, अभ्युप-इ 2 P.

Anecdote, s. कथा, उपाख्यानं, आख्यायिका.

Anemograph, s. वायुवेगदिग्दर्शकं यंत्रं.

Anemometer, s. वायुवेगमापकं यंत्रं.

Anent, prep. उद्दिश्य, अधिकृत्य, विषये in comp.

Anew, adv. पुनः, पुनरपि. 2 अभिनवं.

Angel, s. देवदूतः, ईश्वरप्रेष्यः, स्वर्गदूतः; 'you are my a.' त्वं मे प्रियतमा, प्राणप्रेयसी. **-ic, -ical,** a. दिव्य, देवदूतोपम, अमानुष, (षी f.).

Anger, s. क्रोधः, कोपः, अमर्षः, रोषः, मन्युः. -v. t. प्रकुप् c., क्रुध् c. **-Angry,** a. जातामर्ष, रुष्ट, सामर्ष, सरोष, कोपिन्, कुपित, क्रुद्ध, समन्यु; 'to be a.' कुप्-क्रुध्-रुष्- 4 P, (with dat.). **-Angrily,** adv. सकोपं, सरोषं, कोपात् &c.

Angle, s. अंशः; कोणः. -v. i. बडिशेन मत्स्यान् ग्रह् 9 P, उद्धृ-हृ 1 P. **-er,** s. मत्स्यवेधकः. **-ing,** s. मत्स्यग्रहणं. **-Angular,** a. कोणविशिष्ट, असोपेत.

Anguish, s. परितापः, पीडा, बाधा, वेदना, यातना, आर्तंकः; 'a. of mind' मनस्तापः.

Anhelation, s. उच्छ्वसनं, हृदयकंपः, वेपथुः.

Animadvert, v. i. निंद् 1 P, उपालभ् 1 A; See **Censure.** 2 परीक्ष् 1 A, चर्चां कृ. **-Animadversion,** s. निंदा, उपालंभः. 2 परीक्षणं, चर्चा.

Animal, s. जंतुः, प्राणिन् m., जीविन् m., जीवः, जन्मवत् m. 2 पशुः, मृगः, तिर्यंच् m. -a. प्राणिसंबंधिन् &c. 2 चेतन; 'a. food' मांसाहारः; 'a. pleasures' विषयाः, विषयसुखानि; 'a. passions' (carnal) षड्रिपवः-इंद्रियाणि; 'a. kingdom' प्राणिवर्गः. **-cule,** s. क्षुद्रजंतुः.

Animate, v. t. जीव् c., श्वस्-आ-श्वस् c., प्राण् c. 2 प्रोत्सह् c., जीवं संचर् c., उत्तिज् c., उच्छ्वस् 10, पराक्रुष् c. **-ed,** a. सजीव, चेतन, चर, प्राणिन्. 2 प्रोत्साहित, आश्वासित. 3 प्रबुद्ध, प्रोत्साहनापेरित, सारवत्; 'a. by passion' मदोल्लासित, समद. **-ion,** s. जीवसंचारणं, जीवप्रदानं. 2 प्रोत्साहनं, प्रबुद्धता, उल्लासः. **-or,** s. प्राणदः, प्रोत्साहकः &c.

Animosity, s. द्वेषः, वैरं, विरोधः, मात्सर्यं.

Animus, s. चोदना, उद्देशः.

Anise, s. छत्रा, सालेयः.

Ankle, s. गुल्फः, घुटिका.

Anklet, s. नूपुरः-रं, मंजीरं.

Annals, s. वार्षिकवृत्तांतः, वार्षिकवृत्तेतिहासः. 2 पुरावृत्तकथा, चरित्राख्यानं. **-Annalist,** s. चरित्रलेखकः.

Annex, v. t. संयुज् 10, अनुबंध् 9 P, उपाधा 3 U; 'Oudh was a.ed to the British territory' अवधदेशं आंग्लराज्यांगं कृतः,-राज्येन संयोजितः. 2 अंते निर्दिश् 6 P; 'a list of names is a. ed' नामावली लेखांते दत्ता, नामानि लेखांते निर्दिष्टानि. **-ation,** s. संयोजनं, अनुबंधनं; 'a thing annexed' अनुबंधः. **-ed,** a. संयोजित, उपाहित.

Annihilate, v. t. उत्-समुत्-छिद् 7 P, उन्मूल् 10, अव-उत्-सद् c., नश् c., विलुप् c. **-ion,** s. उच्छेदः, क्षयः, अवसादनं, विलोपः, विनाशः; प्रलयः (of the world).

Anniversary, a. सांवत्सरिक-वार्षिक (की f.). -s. सांवत्सरिको विधिः; a. of birth' जन्मदिवसः; 'a. of death' मृततिथिः.

Annotate, v. t. टीकां-भाष्यं-लिख् 6 P (with gen.), व्याख्या 2 P, व्याचक्ष् 2 A. **-ion,** s. टीका, व्याख्यानं, भाष्यं, टिप्पनी. **-or,** s. टीकाकारः, टीका-भाष्य-कृत् m.

Announce, v. t. आख्या 2 P or c., निविद् c., विज्ञप् 10, प्रकाश् c. **-er,** s. आख्यायकः, संदेशहरः. **-ment,** s. ख्यापनं, निवेदनं, विघोषणा. 2 वार्ता, समाचारः, संदेशः.

Annoy, v. t. बाध् 1 A, पीड् 10, द्रु 5 P, See **Afflict.** **-ance,** s. पीडा, व्यथा, क्लेशः, बाधा, दुःखं; 'a source of a.' कंटकः. **-er,** s. पीडा-व्यथा-करः. **-ing,** a. बाधक, दुःखप्रद.

Annual, a. वार्षिक-सांवत्सरिक-आब्दिक (की f.); प्रति°. **-ly,** adv. प्रतिवर्षं, प्रतिसंवत्सरं, वर्षे वर्षे.

Annuity, s. वार्षिकं वेतनं.

Annul, v. t. वि-अव-लुप् c., निरस् 4 U, निरर्थक a. कृ. **-ment,** s. लोपः.

Annular, a. मंडलाकार, वलयाकार.

Annulet, s. क्षुद्रवलयः-यं.

Anodyne, s. शूलघ्न.

Anoint, v. t. लिप् 6 P, लिह् 2 U, अभ्यञ्ज् 7 P, समालभ् 1 A. 2 अभिषिच् 6 P; 'a. ed as king' राज्येभिषिक्तः. **-er,** अभिषेचकः, विलेपकः. **-ing,** s. विलेपनं, अभ्यंजनं, अभिषेक-सेचनं, समालंभः.

Anomaly, s. विधि-नियम-विरोधः, अनियमः, व्यभिचारः. **-ous,** a. विधि-नियम-विरुद्ध, अविधि. **-ously,** adv. अनियमतः, विधिविरुद्धं.

Anon, adv. सपदि, शीघ्रं, झटिति; 'ever and a.' मुहर्मुहः.

Anonymous, a. अविदित-अनिर्दिष्ट-लेखकनामन्; नाम-संज्ञा-हीन. **-ly,** adv. नाम विना, नामनिर्देशं विना.

Another, a. अन्य-इतर-पर-अपर, pron. a.; or अंतरं in comp.; नगरांतरं 'a. city;' 'in a. place' अन्यत्र; 'in a. manner' अन्यथा; 'at a. time' अन्यदा; 'a. day' अन्येद्युः, परेद्युः; 'one after a.' अनुपूर्वशः, एकैकशः.

Answer, v. i. उत्तरं दा 3 U or प्रतिपद् 4 A, प्रतिवच् 2 P, प्रतिभाष् 1 A.; 'he a. ed in the affirmative' बाढं-तथा-इति स प्रत्युवाच. 2 संवद् 1 P, अनुरुध्-सुत्य-भू. 3 प्रतिभूः स्था 1 P, प्रातिभाव्यं स्वीकृ 8 U, उत्तरं दा 3 U. -v. t. (a question) कथ् 10, ब्रू 2 U, उत्तरं दा (with gen.); 'a. my letter' मम लेखस्योत्तरं प्रहिणु-मेषय. 2 Refute, q. v. 3 कृ 1 A (dat.), उपयुक्त a. भू 1 P; 'this will a. my purpose' अनेन मे प्रयोजनं भवेत्, इदं मे इष्टसिद्धये कल्पते. **-s.** उत्तरं, प्रतिवचनं, प्रत्युक्ति f., प्रतिवाच् f., प्रत्युत्तरं. **-Able,** a. परानुयोगाधीन, प्रष्टव्य.

Ant, s. पिपीलिका. **-hill,** s. वल्मीकः-कं, वामलूरः, कुलकः.

Antagonist, s. प्रतिपक्षः, विपक्षः, शत्रुः, वैरिन् m., See **Enemy.** **-ic,** a. विरुद्ध, विरोधिन्. **Antagonism,** s. विरोधः, वैरं.

Antarctic, a. दक्षिणकेंद्रीय. -s. दक्षिणकेंद्रं.

Antecedent, a. पूर्वगामिन्, पूर्वगत. -s. पूर्वचरितं-वृत्तं. 2 पूर्वगामी शब्दः-शब्दसमूहः.

Antechamber, s. See 'Antichamber.'

Antedate, v. t. प्राक्तनदिनं लिख् 1 P.

Antediluvian, a. विश्वप्रलयात् प्राग् वर्तमान, अतिपुराण.

Antelope, *s.* कृष्णसारः, हरिणः, एणः, मृगः, कुरंगः.

Anterior, *a.* प्राक्तन (नी *f.*), पूर्व.

Anthem, *s.* ईश्वरस्तुति *f.*, स्तुतिरूपं गीतं.

Anthropology, *s.* मानवजातिशास्त्रं.

Anthropophagi, *s* क्रव्याशिनः (pl.) राक्षसाः.

Antic, *s.* भंडः, वैहासिकः. *-a.* भंडसदृश (शी *f.*), अयोग्य, असंगत.

Antichamber, *s.* उपशाला.

Anticipate, *v. t.* पूर्वं प्रागेव-ज्ञा 9 U or निरूप् 10 or ग्रह् 9 P. **2** अग्रतः अनुभू 1 P or भुज् 7 A, पूर्वास्वादनं कृ. **-ion,** *s.* पूर्वमेव ज्ञानं, पूर्वभुक्ति *f.*, पूर्वास्वादनं.

Antidote, *s.* विषघ्नौऽगदः, प्रतिविषः; 'a. against anxiety' चिंताविषघ्नौऽगदः, 'dealer in a. s' विषवैद्यः. जांगुलिकः. **2** प्रतिकारः. **-al,** *a.* विषघ्न (घ्नी *f.*).

Antimony, *s.* स्रोतोंजनं, यामुनं, सौवीरं.

Antipathy, *s.* विरोधः, वैरं, द्वेद्वभावः, विद्वेषः; 'natural a.' शाश्वतिको विरोधः.

Antiphony, *s.* प्रतिध्वनिः, प्रतिगानं.

Antipodes, *s.* प्रतिलोमं; 'living in a.' प्रतिलोमाः.

Antipyrin (e), *s.* ज्वरघ्नं औषधं.

Antiquary, -rian, *s.* प्राक्कालीनविषयकोविद्-पंडितः. *-a.* प्राक्कालीन, प्राक्तन (नी *f.*)

Antiquated, Antique, *a.* प्राचीन, पुरातन-प्राक्तन (नी *f.*), पुराण ; (style) अपचलित, लुप्तप्रयोग (भाषासरणिः). **-Antiquity,** *s.* Ancients. q. v. **2** प्राक्कालः, पूर्वकालः **3** पुरातनत्वं, प्राक्कालीनत्वं.

Antiseptic, *a.* पूतिनाशक.

Antithesis, *s.* प्रतिपक्षता, विरोधः, अर्थवैपरीत्यं.

Antitype, *s.* मूलमूर्ति *f.*, आदर्शः.

Antler, *s.* हरिणशृंगं, मृगविषाणं. **-ed,** *a.* शृंगवत्, विषाणिन्.

Anus, *s.* गुदं, अपानं, पायुः.

Anvil, *s.* शूर्मः-र्मी, स्थूणा.

Anxiety, *s.* चिंता, उत्कंठा, औत्सुक्यं, व्यग्रता, मनस्तापः, चित्तोद्वेगः; आकुलत्वं, उत्कलिका, रणरणकः. **-Anxious,** *a.* व्याकुलित, उद्विग्न, उत्कंठित, चिंतापर, व्यग्र. **2** उत्सुक, इप्सु, सकाम ; 'he thus passes a. nights' एवमुद्विग्नस्य यांति रजन्यः ; 'to be a. (for)' उत्कंठ् 1 A, उत्सुकायते (D.), उत्तम् 4 P ; 'he is a. to see you near' उत्कंठते युष्मत्सन्निकर्षस्य (U. 6.). **3** चिंताप्रद, उद्वेगकर (री *f.*). **-ly,** *adv.* सोद्वेगं, सोत्कंठं, सचिंतं.

Any, *a.* Ex. by चित्, चन, or अपि with the forms of किम् ; 'a. man' कोपि नरः ; 'a. woman' काचित्स्त्री &c., 'at a. time' कदाचित्. **2** (Any whosoever) Ex. by forms of यत् with the above ; यः कश्चनागच्छतु 'let a. come' ; 'I may be a. one' यो वा को वा भवाम्यहं ; 'a. how' कथंचित्, येन केन प्रकारेण, यथा कथंचित् ; 'a. longer' पुनः, इतः-अतः-परं; 'a. where' कुत्रापि, क्वचिदपि ; 'a. thing' ईषदपि, स्तोकमपि.

Apace, *adv.* सत्वरं, शीघ्रं, *See* Quickly.

Apart, *adv.* पृथक् ; वि-प्र-गत *a.* ; 'having knees a.' भग्नुः. **2** निभृतं, रहसि, विजने, एकांते, विविक्ते. **3** दूरे. **4** स्वगतं, जनांतिकं. 'a. from this consideration', 'this consideration a.' इदं कारणं विहायस्यक्त्वा, एतदपेक्षिया *a.* ; 'excellence of virtues a., a woman must have modesty at least' गुणसंपत्क्रिया मा नाम भवतु, शालीनता पुनरवश्यं स्यादेव. **-ment,** *s.* कोष्ठः, शाला, कक्षा, आवासः, सौधं; 'inner a.s' अंतःपुरं, अंतर्वेश्मन् *n.*

Apathy, *s.* औदासीन्यं, उदासीनता, वैराग्यं. **-etic,** *a.* उदासीन. **2** वीतस्पृह-राग, निःस्पृह, निरीह, निरपेक्ष. **3** निरुत्साह.

Ape, *s.* वानरः, कपिः, प्लव(वं)गः. **2** अनुकारिन् *m.* *-v. t.* वानरवत् अनुकृ 8 U. (gen.). **-Apish,** *a.* कापेय (यी *f.*), वानरोपम.

Apepsy, *s.* अजीर्णं.

Aperient, *s.* रेचकं, रेचनं.

Aperture, *s.* छिद्रं, रंध्रं, सूक्ष्मं द्वारं.

Apetalous, *a.* दलहीन, निष्पत्र, निर्दल.

Apex, *s.* शिखा, चूडा, अग्रं; शिरस् *n.*, मस्तकं.

Aphorism, *s.* सूत्रं, वचनं.

Apiary, *s.* मधुमक्षिका-करंडः -आधारः-समुद्गकः.

Apiece, *adv.* एकैकशः, पृथक् पृथक्, एकैकं.

Apocryphal, *a.* संदिग्धप्रमाण.

Apologue, *s.* उपकथा, उपाख्यानं.

Apology, *s.* क्षमाप्रार्थना, क्षमायाचना, स्वदोषस्वीकारः. **2** व्यप-अप-देशः, छद्मन् *n.* **-ist,** *s.* स्वदोषस्वीकारिन् *m.*, व्यपदष्टृ *m.* **-ize,** *v. i.* क्षमां याच् 1 A. or प्रार्थ् 10 A, स्वदोषं स्वीकृ-अंगीकृ 8 U. **2** व्यपदिश् 6 P, व्यपदर्श-छद्म-कृ. **-Apologetic,** *a.* व्यपदेशक.

Apophlegmatic, *a.* कफनाशन (नी *f.*).

Apophthegm, *s.* सूत्रं, वचनं, नीतिवचन.

Apoplexy, *s.* अंगविकृति *f.*, संन्यासः.

Apostate, *s.* स्वधर्मत्यागिन् *m.*, स्वधर्मभ्रष्टः-च्युतः, पतितः. **-Apostacy,** *s.* स्वधर्मत्यागः, धर्मभ्रंशः, परधर्माश्रयः. **-Apostatize,** *v. i.* स्वधर्मात् भ्रंश् 1 A, 4 P or पत् 1 P, परधर्मनाश्रि 1 U.

Apostle, *s.* ईश्वरप्रेरितः, ईश्वरदूतः.

Apostrophe, *s.* संबोधनं. **-ize,** *v. t.* संबुध् c., आमंत्र् 10 A.

Apothecary, *s.* औषधानां विक्रेतृ *m.*, भेषजविक्रयिन् *m.*

Appall, *v. t.* सं-वि-त्रस् c., भी c., उद्विज् c., व्याकुलीकृ 8 U. 'he was a.ed with fear' भयेन विवर्णीभूतः ; 'a.ing sight' महात्रासजनकं स्थानं or दर्शनं.

Apparatus, *s.* उपकरणं, सामग्री.

Apparel, *s.* वेशः-षः, पक्ष, परिधानं, आभरणं. *-v. t.* वस् c., प्रावृ 5 U, संव्ये 1 P.

Apparent, *a.* व्यक्त, अभिव्यक्त, स्फुट, साक्ष, प्रत्यक्ष, प्रकाश, आविर्भूत. **2** मिथ्या *ind.*, अवास्तव (नी *f.*), 'a. praise' व्याजस्तुति *f.* **3** बाह्य, बहिः in comp.; 'to make a.' आविष्कृ, स्पष्टी-प्रकटी-कृ. **-ly,** *adv.* व्यक्तं, स्पष्टं &c. **2** बहिः; 'a wise man acts a. agreeably' विद्वान् जनो बहीरमणीयं व्यवहरति (Mal. 1).

Apparition, *s.* आभासः, छाया, आकारः. **2** वेतालः, पिशाचः.

Appeal, *v. i.* पुनर्विचारं प्रार्थ् 10 A. **2** प्रमाणीकृ 8 U, प्रमाणयति (D.); or by प्रमाणं; 'I a. to your lordship in this case' अत्र विषयेऽत्रभवंतं प्रमाणीकरोमि, अत्रभवान् प्रमाणं. *-s.* पुनर्विचारप्रार्थना; प्रमाणीकरणं.

Appear, *v. i.* उदि 2 P, उद्गम् 1 P, प्रकाश् 1 A, प्रादुर्भू 1 P, आविर्भू. **2** उपस्था 1 U, सन्निधा pass. **3** प्रतिभा 2 P, अवभास् 1 A, दृश् pass., लक्ष् pass.; 'so as to a. dead' मृतसिद्धार्थं संदृश्य, 'the witness did not a.' साक्षी नोपतस्थौ. **-ance,** *s.* उदयः, प्रादुर्भावः, आविर्भावः. **2** उपस्थितिः *f.* **3** आकारः, आकृति *f.*, रूपं; 'good in a.' शोभनाकृति, सुदृश्य, प्रेक्षणीय. **4** आभासः, छाया, आभा ; 'your story has an a. of truth' तव कथा सत्येव प्रतिभाति-अवभासते. **5** अनुमानं.

Appease, *v. t.* सां(शां)त्व् 10, प्र-उप-शम् c. (शमयति), तुष् c., प्रसद् c., अनुनी 1 P; 'to be a.ed' प्रसद् 1 P, प्रशम् 4 P. **-ing,** *s.* सांत्वनं, प्र-उप-शांतिः *f.*, प्रसादनं, अनुनयः.

Appellation, *s.* *See* Name. **-Appellative,** *a.* अभिधायिन्. **2** सामान्य.

Append, *v. t.* अनुबंध् 9 P, उपाधा 3 U, आसंज् c. **-age,** *s.* अनुबंधः; उपाहितभागः. **2** उपकरणं. **-ed,** *s.* संयोजित, उपाहित. **-ix,** *s.* परिशिष्टं, शेषसंग्रहः.

Appertain, *v. i.* *See* Belong. **-Appertenance,** *s.* अनुबंधः; उपकरणं, उपस्करः, सामग्री.

Appetite, *s.* कामः, रागः, अभिलाषः, इच्छा, रुचि *f.* **2** बुभुक्षा, क्षुधा-धृ *f.*; 'sensual a.' विषयरुचिः, विषयोपरागः.

Applaud, *v. t.* प्रशंस् 1 P, श्लाघ् 1 A, अभिनंद् 1 P, स्तु 2 U. **2** उपगै 1 P. **-Applause,** *s.* प्रशंसा, श्लाघा, स्तुति *f.* **2** प्रशंसावाचः (pl.). धन्यवादः; 'he rose to speak amidst loud a.' उच्चैः प्रशंसावाच उदीरयत्सु श्रोतृषु स वक्तुमुदतिष्ठत्.**-Applausive,** *a.* श्लाघान्वित; स्तुतिमय (यी *f.*).

Apple, *s* आतताक्षः, फलं. **2** (Of the eye) तारा, कनीनिका; 'a. of discord' भेदकालह-बीजं.

Apply, *v. t.* संयुज् 10, न्यस् 4 P, क्र c (अर्पयति), निवेश् c., निधा 3 U, आरुह् c.; 'a. your shoulder to the wheel' चक्रमंसेन उत्तंभय; 'a.ing the hand to my shoulder' अंसे हस्तं निवेश्य &c. **2** विधा 3 U; नियुज् 7 A, 10 ; 'they do not a. the word विषय to happiness' सुखार्थे विषयशब्दं न पर्युंजते, -शब्दस्य प्रयोगो न दृश्यते. **3** आश्रि 1 U; याच् 1 A, अर्थ् 10 A. **4** (Oneself to) अनुष्ठा 1 P, मनः-चित्तं-समाधा or बंध् 9 P, अभियुज् pass (एते वयं स्वकर्मण्यभियुज्यामहे Mu. 3). *-v. i.* लग् 1 P, सं-अनु-बंध् 9 P. **2** प्रयुज् pass., उपपद् 4 A; oft. by गम् 1 P, इ 2 P; 'this our title does not a. to any one else' द्वितीयगामि न हि शब्द एष नः (R. III. 45); राम इत्यर्थं शब्द उच्चरित एव मामगात् (R. xi. 73.); विषय in comp.; 'the word ईश्वर not a.ing to anybody else' ईश्वर इत्यनन्यविषयः शब्दः (V. 1). **3** (to, for) याच् 1 A, प्र-अभि-अर्थ् 10 A; 'a.ed for further orders' कौपरी नियोगानुद्दीपनायेति सार्थयामास. **-Appliance,** *s.* उपायः, उपकरणं, सामग्री. **-Application,** *s.* योजनं, विधानं, प्रयोगः, संप्रयोगः, निवेशनं, न्यासः, अर्पणं. **2** मनोनियोगः, चित्तासक्ति *f.*, अभ्यसनं, अध्यवसायः, अभिनिवेशः, आसक्ति *f.*, अनुष्ठानं. **3** उपयोगः, प्रयोजनं. **4** संबंधः; 'a. of this speech to Rāma' अस्य वचनस्य रामगामी संबंधः. **5** प्रार्थना. **-Applicable,** *a.* लगत् (न्ती *f.*), प्रयोज्य. **2** संगत, संबद्ध. **-Applicant,** *s.* प्रार्थयितृ *m.*, अर्थिन् *m.*, याचकः, प्रणयिन् *m.*

Appoint, *v. t.* युज् 7 U, 10, स्था c. (स्थापयति), निधा 3 U. **2** अधिकृ, नियुज् 7 A (with loc.) यज्ञमामाश्रमधर्मे नियुंक्ते (S. 2); व्यादिश् 6 P. **3** निर्दिश् 6 P, निरूप् 10; 'a.ed lesson' निर्दिष्टपाठः ; 'a.ed time' कृतः कालावधिः, कृतसंकेतः, समयः. **-ment,** *s.* नियोगः, अधिकारः, पदं. **2** नियमः, विधिः, आज्ञा, शासनं. **3** उपकरणं. **4** निरूपणं, स्थापनं. **5** समयः, संकेतः ; 'keep your a.' समयमनुरुध्यस्व-वर्तस्व ; 'Queen, let us keep (to) our a.' देवि सामयिका भवामः (M. 1.).

Apportion, *See* Divide.

Apposite, *a.* युक्त, यथार्थ, संगत. **-ly,** *adv.* स्थाने, यथार्थतः.
Apposition, *s.* समानाधिकरणं, एकान्वयः.
Appraise, *v. t.* (goods) (मूल्यं) निरूप् 10, निर्धृ 10. **-er,** *s.* मूल्यनिरूपकः.
Appreciate, *v. t.* (गुणान्गुणं) ज्ञा 9 U, अवगम् 1 P, ग्रह् 9 P, विविच् 7 P; 'appreciator of merits' गुणग्रहिन् *m.*; गुणज्ञः, मर्मज्ञः. **2** बहु मन् 4 A. **-ion,** *s.* गुणग्रहणं, गुणागुणज्ञानं-विवेचनं.
Apprehend, *v. t.* ग्रह् 9 P, परामृश् 6 P, आसिध् 1 P, आक्रम् 1 U, 4 P, धृ 1 P. **2** आ-वि-परि-शंक् 1 A. **3** मन् 4 A, शंक् 1 A; तर्क् 10, ऊह् 1 U, अनुमा 3 A. **4** अवधे-गम् 1 P, उपलभ् 1 A. **-Apprehension,** *s.* ग्रहणं, आसेधः; आ-वि-परि-शंका, अनुमानं, तर्कः, मति *f.*, बुद्धि *f.*; 'of quick a.' तीक्ष्णमतिः; 'of dull a.' मंदधीः, स्थूलबुद्धिः. **-Apprehensive,** *a.* आशंकमान, शंकितः; 'a. of danger' भयमाशंकमानः.
Apprentice, *s.* शिल्पविद्याशिष्यः; अंतेवासिन् *m.*, शिष्यः. **-ship,** *s.* सेवाकालः, शिष्यत्वकालः.

Apprise (of), *See* **Inform.**

Approach, *v. t.* उप-समुप-अभि-गम् 1 P, °इ-या 2 P, °चि-सृप् 1 P; समीपं-निकटे-गम् (with gen.). *-v. i.* उप-समुपा-स्था 1 U, °गम्; प्रत्यासद् 1 P. *-s.* आगमः, अवतारः, उपस्थिति *f.*; 'a. of night' दोषागमः, रजन्युपस्थितिः. **2** संनिकर्षः, आसन्नता. **3** प्रवेशः, उपसर्पणादि. **-ing,** *a.* आसन्न; 'his death a.' आसन्नमरणे तस्मिन्, संनिकृष्ट, समुपस्थित. **-able,** *a.* उपसर्पणीय, समुपगम्य.
Appropriate, *v. t.* आत्मसात् कृ 8 U, स्वाधीनस्वायत्त. *-a.* कृ. **2** प्र-विनि-उप-युज् 7 U, 10, उपकल्पृ c. *-a.* उपपन्न, संगत, उचित, युक्त; 'a. to the occasion' प्रस्तावसदृश. **2** स्वकीय. **-ly,** *adv.* उपपन्नं, युक्तं, स्थाने, यथार्थतः. **-ion,** *s.* आत्मसात्करणं; विनियोगः, उपकल्पनं.
Approve, *v. t.* अनुमुद् 1 A, अनु-सं-मन् 4 A, प्रशंस् 1 P, अभि-प्रति-नंद् 1 P, रुच् 1 A; एतयोर्विवाद एव मे न रोचते (M. 1) 'I do not a. of their very quarrel'; 'I do not a. of your speech' न ते वचोऽभिनंदामि (S. 2). **2** प्रमाणयति (D.), विभू c. **-al,** *s.* अनुमोदनं, अभिनंदनं; संमति *f.*, प्रशंसा; 'he got the a. of his mother' मात्रानुमोदितः. **-ed,** *a.* समत, प्रशस्त &c., परीक्षित. **-Approbation,** *s.* सं-अनुमति *f.* **2** साधु-धन्यवादः, प्रशंसा.
Approximate, *v. t.* उपनी 1 P, उपस्था c. स्थापयति). *-v. i.* समीपं-निकटं-वृत् 1 A, आसन्न *a.* भू, *See* **Approach. 2** Resemble, q. v. *-a.* समीप, आसन्न, संनिकृष्ट; 'a. to 10' आसन्नदशाः. **-ion,** *s.* आसन्नता, उपगमः &c.
April, *s.* चैत्रः, मधुमासः, वैशाखः.
Apron, *s.* (मलनिवारणार्थं) कटिप्रच्छदः, मलवस्त्रं.
Apropos, *adv.* अनुरूपं, यथा in comp.
Apt, *a.* उचित, यैग्य, युक्त. **2** Ex by शील in comps., प्रायः with pot. pass. part.; 'youths are a. to forget' युवानौ विस्मरणशीलाः; 'lazy boys are a. to be bad boys' अलसैर्बालकैः प्रायो दुर्वृत्तैर्भवितव्यं; 'over-affection is a. to suspect evil' अतिस्नेहः पापशंकी (S. 4) आशु in comp., 'a. to take pity' दयालुः; 'a. to break' भंगुर. **3** दक्ष, कुशल, अभिज्ञ, *See* **Skilful. 4** त्वरित, चपल, उद्युक्त. **-itude,** *s.* योग्यता, पात्रता, औचित्यं. **2** °शीलता, स्वभावः, शीलं. **-ly,** *adv.* यथोचितं, यथोपपन्नं, स्थाने, चातुर्येण, सकौशलं. **-ness,** *s.* योग्यता, कौशलं, पाटवं. **2** शक्ति *f.*, सामर्थ्यं.
Aquarium, *s.* जलचरप्राणिसंग्रहः -पल्वलं.
Aquatic, *a.* जल in comp., जलोद्भव, वारिचर; 'a. animal' जलजंतुः, यादस् *n.* **2** जलचर, जलज, वारिज.
Aqueduct, *s.* जलप्रणाली, जलमार्गः, परीवाहः.
Aqueous, *a.* जलमय (यी *f.*), अम्मय, सजल, अनूप.
Aquiline, *a.* गरुडचंचुसदृश (शी *f.*); वक्र, कुंचित; 'having an a. nose' गरुडनासः.
Arable, *a.* कर्षणीय, कृषियोग्य.
Arbiter, *s.* मध्यस्थः; नियंतृ *m.*, प्रमाणपुरुषः. **2** ईशः, प्रभुः. **-Arbitrate,** *v.* विचर् c., निर्णी 1 P; मध्यस्थतां गृहीत्वा निर्णी or परिच्छिद् 7 P. **-ion,** *s.* मध्यस्थकृतनिर्णयः; विचारणं, निर्णयः. **2** माध्यस्थं. **-or,** *s.* *See* **Arbiter.**
Arbitrary, *a.* स्वेच्छाचारिन्, कामचारिन्, स्वच्छंद, स्वैरवृत्त. **2** अनियंत्रण, उद्दाम. **3** चपल, अविहित **-ly,** *adv.* स्वेच्छया, स्वकामतः, स्वैरं, नियंत्रणं.
Arbour, *s.* लतागृहं, कुंजः, निकुंजः-जं, पर्णशाला.
Arc, *s.* वृत्तखंडं, धनुस् *n.*
Arcade, *s.* आच्छादितपथः-मार्गः.
Arcadian, *a.* ग्राम्य, ग्रामीण.
Arch, *s.* खंडमंडलं, वृत्तखंडं; 'a. of heaven' नभोमंडलं. **2** तोरणः-णं. *-v. t.* मंडलीकृ; तोरणरूपेण निर्मा 3 A, गोलाकारेण आच्छद् 10, 'a.ed' सतोरण, न्यस्ततोरण; भुग्न, कुंचित, वक्र, तोरणाकार. *-a.* विदग्ध, धूर्त, चतुर; मुख्य, श्रेष्ठ, उत्तम, प्रधान, अग्रणी; 'a. fiend' पिशाचाग्रणीः; 'a. angel' प्रधानदेवदूतः; 'a. bishop' मुख्यो धर्माध्यक्षः.

Archaic, *a.* आर्ष, प्राचीन.
Archaism, *s.* प्राचीन-आर्ष-प्रयोगः.
Archæology, *s.* पुराणवस्तुशास्त्रं.
Archer, *s.* धन्विन् *m*, धानुष्कः, इषुधरः, निषंगिन् *m.*, धनुर्धरः. **-y,** *s.* धनुर्विद्या, शराभ्यासः, धनुर्वेदः.
Archetype, *s.* मूलरूपं, आदर्शः.
Archipelago, *s,* द्वीपसमूहः. **2** द्वीपचितार्णवः.
Architect, *s.* स्थपतिः, शिल्पिन् *m*; 'man is the a. of his own fortune' लोके सुखदं विपरीततां वा स्वचेष्टितान्येव नरं नयंति (H. 2). **-ure,** *s.* शिल्पं, वस्तुनिर्माणकौशलं, निर्माणशिल्पं.
Archives, *s.* ग्रंथरक्षागारं. **2** पुरावृत्तं.
Arctic, *a.* उत्तर, उदीचीन, उत्तरकेंद्रीय.
Ardent, *a.* उत्त्र, प्रचंड, उत्कट, उत्सुक, कुतूहलिन्, उत्साहिन्, व्यग्र; 'a. love' निरतिशयेच्छरागः; 'a. looks' सतृष्णा दृष्टिः. **-ly,** *adv.* उत्कटं, सतृष्णं, सानुरागं. **-Ardour,** *s.* उत्साहः, अत्यंतता, निरतिशयः; अतिरेकः, उत्कटता, उत्साहः, व्यग्रता, कुतूहलं, औत्सुक्यं.
Arduous, *a.* दुष्कर, यत्नसाध्य, दुःसाध्य, सु-अति-दुष्कर. **2** प्रांशु, दुरारोह, उच्च.
Area, *s.* फलं; 'a. of a field' क्षेत्रफलं. **2** अंगणं-नं; 'inner a' प्रकोष्ठः.
Arena, *s.* रंगः, रंगभूमि *f.*, मल्लभूः.
Argent, *a.* राजत (तं *f.*), रौप्य (प्यी *f.*).
Argue, *v. i.* तर्कू 10, ऊहापोहं कृ 8 U, विचर् c., विवेचनं कृ. **2** विवद् 1 A, वादे उत्तरप्रत्युत्तरं कृ. *-v. t* प्रमाणेन-तर्केण सिध् c.; (साधयति), प्रमाणयति (°), युक्तिवादेन सिद्ध c., युक्त्या तर्कू 10. ऊह् 1 A. **-er,** *s.* तर्किन् *m.*, विचारकः; वादिन् *m.* **-Argument,** *s.* युक्ति *f.*, उपपत्ति *f.* **2** पक्षः, प्रमाणं, हेतुः; न्यायः, वितर्कः; 'a wrong a.' पक्षाभासः, हेत्वभासः. **3** वादार्थोद्यतः, विवादः, वाक्कलहः. **4** विषयः, अनुकरणीकारः. **-ative,** *a.* तार्किक (की *f.*), तर्कानुबद्ध. न्यायानुसारिन् उपपत्तिमत्. **2** वादशील, विवादप्रिय. **-ly,** *adv.* सोपपत्तिकं, सवितर्कं, युक्तिवादेन.
Arid, *a.* शुष्क, अतत्याकांत; 'a. soil' मरुः, मरुस्थलं-ली.
Aright, *adv.* ऋजुं, यथातथं, यथास्थानं, सम्यक्, यथार्हं.
Arise, *v. i.* उत्था 1 P; उत्पद् 4 A, उत्-प्र-सं-भू 1 P, प्रजन् 4 A, प्रवृत् 1 A; उदि 2 P, उद्गम् 1 P; आवि-प्रादु-भै, विनिः-प्र-सू 1 P, 'a. ing from' ex. by ज, भव, उद्भव, प्रभव, in comp.; स्मरजा पीडा 'torment a. ing from love'; यौवनप्रभवं तमः &c.; oft. by उत्थ, सदृश; नयनसमुत्थं ज्योतिः, Flash arising from the eye.
Aristocracy, *s.* कुलीन-विशिष्ट-जनाः. **2** शिष्टजनसत्तात्मकं राज्यं. **-Aristocratic,** *a.* कुलीन, अभिजात.
Arithmetic, *s.* अंकविद्या-गणितं, परिकर्मन् *n.* **-ian,** *s.* अंकविद्याज्ञः, गणकः.
Ark, *s.* नौ *f.*, तरणी, पोतः. **2** आधारः, कोषः.
Arm, *s.* बाहुः, भुजः, भुजा, दोस् *m. n.*; 'fore-a.' प्रकोष्ठः. **2** शाखा. **3** नदीपंकः; वक्रं. **4** शक्ति *f.*, बलं वीर्यं; 'got by one's own a.' स्वभुजवीर्येण लब्धं, भुजोपार्जितं *-v. t.* सन्नह् c., राज्ञीकृ 8 U, अस्त्रैः संयुज् 10, सायुधं कृ. *-v. i.* सन्नह् 4 U, सज्जीभू 1 P. *-s* अस्त्रं, शस्त्रं, आयुधः-धं, शस्त्रास्त्रं. **2** विग्रहः, रणसमयः, संग्रामः, युद्धं; 'taking up a.' युद्धारंभः; 'passage of a.' अस्त्रविद्या. **-ed,** सायुध, सन्नद्ध, सज्ज; 'a. with a sword' सखड्गः. **-less,** *a* अभुज, अशस्त्र, अनायुध. **-pit, -hole,** *s.* कक्षाक्षः, बाहुमूलं, भुजकोटरः-रं, दोर्मूलं. **-let,** केयूरः-रं, अंगदः-दं. **2** क्षुद्रबाहुः, उपशाखा.
Armada, *s.* बृहन्नौसाधनं.
Armament, *s.* बलं, सज्जीकृतं बलं, युद्धोपकरणानि.
Armistice, *s.* युद्धविरतिः *f.*, संधिः, युद्धनिवर्त्तनं (नियतकालं यावत्).
Armorial, *s.* कावचिक, आयुधीय, आयुधिक. **2** कुलचिन्हसंबंधिन्.
Armour, *s.* वर्मन् *n.*, कवचः-चं, कंचुकः, सन्नाहः, तनुत्रं, तनुत्र-त्राण. 'a. for the head' शिरस्त्राणं. **-er,** *s.* शस्त्रकारः, अस्त्रकारः. **-y,** *s.* आयुधागारं, शस्त्रगृहं. **2** शस्त्रसमूहः.
Army, *s.* सेना, सैन्यं, बलं, वाहिनी, चमूः, अनीकं, एतना, देहः-हं; 'full a.' चतुरंगं बलं, अक्षौहिणी.
Aroma, *s.* गंधः, आमोदः, परिमलः. **-tic,** *a.* सुरभि, सुगंधि. **2** सुरभित; a. s सुगंधद्रव्याणि. **-tize,** *v. t.* वास् 10.
Around, *prep.* परितः, अभितः (with acc.). *-adv.* समंततः, सवतः, विष्वक्कु, समंतात्.
Arouse, *v. t.* (From sleep) जागृ c., प्रबुध् c. **2** उत्-प्रोत्-सह् c., उत्सिज् c., उत्था c. (उत्थापयति); उद्बुध् c, जन् c. (जनयति).
Arraign, *v. t.* *See* **Accuse.**
Arrange, *v. t.* रच् 10, घट् c., वि-ऊह् 1 U; सं-विधा 3 U, विनि-अस् 4 U, स्था c.(स्थापयति); 'well a. ed' सुघटित; 'a. in order' यथाक्रमं रच्, संविधा c. &c. **2** (Settle) उपकल्पृ c., निर्णी 1 P; 'I have a. ed to pay his debts' तस्य ऋणं कथं प्रतिदेयमिति मया निर्णीतं-आलोचितं. **-ment,** *s.* रचना, विन्यासः, संविधा, व्यूहनं, क्रमेण स्थापनं, परिपाटि-टी *f.*, क्रमः; 'a. of plot' वस्तुरचना, संविधानकं; सरणि-णी *f.* **2** निर्णयः; 'all a. s for his reception are complete' सर्वास्तत्संभावनासंविधा उपकल्पिताः.
Arrant, *a.* अत्यंत, भृश, अति pr. **2** अतिनिंद्य, अतिदुष्ट, निकृष्ट.

Array, *s.* व्यूहः, रचनं, विन्यासः, क्रमः, श्रेणिणी *f.*, पंक्ति *f.* **2** वेषः, आभरणं, परिच्छदः. **-v.** *t.* क्रमेण रच् 10, सज्जीकृ 8 U. **2** भूष् 10, अलंकृ; वस्त्रेण आच्छद् 10; 'he was richly a. ed' स महार्घवस्त्रभूषितः,-वस्त्राणि पर्यधत्त.

Arrear, *s.* अवशिष्टदेयं, ऋणशेषं, अशोधितो भागः; 'clear up all a. s' सर्वमवशिष्टदेयं परिशोधयः कार्यपरिशेषं समापयः 'his pay remained in a. s' यथानसरमदत्तत्वात्तस्य वेतनं समुच्चितं.

Arrest, *v. t.* निरुध् 7 U, गह् 9 P, आसिध् 1 P, बंध् 9 P, धृ 1 P, 10; ऋणहेतोः राजाज्ञया धृ 10. **2** निवृत् c., स्तंभ् 9 P or c. (निवर्तयामास नृपस्य दृष्टिं) (R. II. 28); 'the Chitrakuta mountain a. s my eye' बध्नाति मे चक्षुश्चित्रकूटः (R. XIII. 47); 'a. attention' अनन्यमनस् *a.* कृ 8 U, अनन्यचित्त *a.* कृ. **-s** निरोधः, आसेधः, ग्रहणं, धरणं, बंधनं.

Arrive, *v. i.* प्र-संप्र-अनुप्र-आप् 5 P, आ-समासद् 1 P, अभि-उपा-गम् 1 P, उपस्था 1 U, प्रपद् 4 A (यौवनदशां प्रपेदे). **-al,** *s.* आगमनं, उपस्थिति *f.* &c.

Arrogance, *s.* औद्धत्यं, दर्पः, अभिमानः, अहंकारः, गर्वः, मदः, अवलेपः, प्रागल्भ्यं, उत्सेकः, आटोपः. **-Arrogant,** *a.* उद्धत, दृप्त, अहंकारयुक्त, प्रगल्भ, समद, गर्वित, अवलिप्त. उत्सिक्त, मानिन्; 'a. lady' मानिनी, प्रमदा. **-ly,** *adv.* उद्धतं, सावलेपं, सदर्पं &c.

Arrogate, *v. t.* सगर्वं-अन्यायेन-ग्रह् 9 P or स्वायत्तीकृ 8 U or आदा 3 A. **-ion,** *s.* अन्यायग्रहणं. उपधा.

Arrow, *s.* शरः, बाणः, सायकः, इषुः, कांडं, भल्लः, नाराचः, मार्गणः, शिलीमुखः, विशिखः. **-y,** *a.* बाणवत् &c.; बाणाकार.

Arsenal, *s.* आयुधागारं, शस्त्रगृहं. **2** शस्त्रास्त्रसमूहः.

Arsenic, *s.* फेनाश्मन् *m.*; मनःशिला.

Arson, *s.* गृहदहनापराधः.

Art, *s.* शिल्पं, शिल्पविद्या, कला, व्यवसायः, नाट्यकला 'a. of dancing'. **2** कल्पना, विद्या (science). **3** निपुणता, युक्ति *f.*, कौशलं; साधनं; 'a. s of life' जीवनसाधनानि. **4** व्याजः, कपट, माया, वैदग्ध्यं, चातुर्यं. **-ful,** *a.* चतुर; मायाविन्, 'a. look' चतुरो दृष्टिक्षेपः; विदग्ध, मायावत्. **2** शिल्पेन कृत. **3** निपुण, कुशल. **-fulness,** *s.* चातुर्यं, वैदग्ध्यं, &c **-less,** *a.* ऋजु, अमाय, अकृतक, अकृत्रिम, अव्याज; 'a. ly lovely body' अव्याजमनोहरं वपुः (S. 1). **-lessness,** *s.* सरलता, अमायिता, अकृतकता, आर्जवं, **-Artifice,** *s.* उपायः, छलं, छद्मन् *n.*, व्यपदेशः, कपटं, व्याजः. **-Artificer,** *s.* शिल्पिन् *m.*, कर्म-शिल्प-कारः. **2** कर्तृ *m.*, निर्मातृ *m.* **-Artificial,** *a.* कृत्रिम, कृतक; सव्याज. **2** शिल्पनिर्मित; 'a. mountain' क्रीडापर्वतः. **-Artizan, Artist,** *s.* शिल्पिन् *m.*, चित्रकरः. **2** पंडित; निपुणः.

Artery, *s.* धमनी, रक्तवाहिनी.

Article, *s.* द्रव्यं, वस्तु *n.*, सामग्री. **2** विषयः, पदं, भागः. **3** समयः, समयपत्रं **4** वृत्तपत्रलेखः.

Articulate, *a.* स्पष्ट, परिस्फुट, व्यक्त. **-v.** *t.* स्पष्टं-स्फुटं-उच्चर् c. or उदीर् 10. **2** ग्रंथ् 9 P, संयुज् 10, संधा 3 U, **-ness,** *s.* स्पष्टता, स्फुटता; 'a. in uttering syllables' वर्णोच्चारणे स्पष्टताः 'utters articulate sound's परिस्फुटाक्षरां गिरमुदीरयति (Ka. 13) **-ion,** *s.* उच्चारणं &c. **2** संधानं.

Artillery, *s.* अग्न्यस्त्राणि; युद्धास्त्राणि.

As, *conj., adv.* Ex. by वत्, इव; मातृवत्-मातरमिव-परदारान् पश्य. **2** यथा, यद्वत्, अनुरूपं-पेण; यथा in comp. (यथोक्तं कथय); 'as-so' यथा-तथा with or without एव 'as-as' यथैव-तथैव (यथैव शांता तथैव सीता दशरथस्य प्रिया (U. 4); 'as since-therefore' तथा-तथा, यतः-ततः, यत्-तत्; 'as for instance,' यथा (यथा महानसे), or तथाहि. **2** (On account of) ex. by abl. or instr. of noun. **3** (While) यावत्-तावत्; or by pres. part.; 'as he was going, he thought' गच्छन् स इत्थं मनसि चकार; 'as high as' दघ्न (घ्नी *f.*), मात्र, in comp.; 'water as high as the knee' जानुदघ्नं जलं; ऊरुमात्रा भित्तिः &c.; 'as soon as' यावत्-तावत्; or loc. abs. constr. with मात्र or एव; 'as he had spoken' उक्तवत्येव तस्मिन्; 'as before,' यथापुरा, यथापूर्वं, पूर्ववत्; 'as far as' यावत् with acc., आ with abl. or in comp. (आसमुद्रक्षितीशानां) 'as if,' 'as it were' इव; oft. by मन् 4 A; 'as if the city had been a large tank' नगरं महाकासारं मन्यमानः; 'as follows' इति (इति वक्तुं प्रचक्रमे), or ex. by यथा-यत् at the beginning of narratives; 'it is as follows' तद्यथा; 'as to,' 'as for' तु, तावत्, इति, अधिकृत्य, उद्दिश्य; 'as for merits, he has none' गुणास्तावत्तस्य नैव विद्यते; 'as for doing it quickly it is easy' शीघ्रमिति सुकरं (निभृतमिति तु चिंतनीयं S. 3); 'as well as' च-चः 'as many as' 'as much as' यावत्-तावत्; 'as yet' अद्यापि, अद्य यावत्. **4** (Connecting words in apposition) ex. by इति; स बंधुरिति मतः, बंधुर्मतः 'as a father he respects me' पितेति मां स मानयति.

Ascend, *v. i.* उदि 2 P, उदम् 1 P. **-v.** *t.* आ-अधि-रुह् 1 P, आ-अधि-क्रम् 1 U, 4 P, (with acc.); 'a. ed the throne' राजपद-

मवाप, सिंहासनमारुरोह. **-ant,** *a* अधिरोहिन्, **2** प्रधान, प्रबल, उत्तम. **-s.** उच्चता, उच्छ्रायः. **2** प्राधान्यं, प्राबल्यं, प्रभुत्वं; 'his stars are in the a.' तस्य जन्मग्रहाः उच्चसंश्रयाः. **-ancy,** *s.* प्रभुत्वं. प्राधान्यं, प्राबल्यं. **-Ascent,** *s.* आरोहणं, उद्गमः, उदयः, समुत्थानं, अधिरोहणं. **2** अधिरोहणमार्गः, सोपानं; 'difficult of a.' दुरारोह.

Ascertain, *v. t.* ज्ञा 9 U, ज्ञा desid. (जिज्ञासते), निरूप् 10. उपलभ् 1 A. **2** निर्णी 1 P, अव-निर्-धृ 10, निश्चि 5 U, व्यवसो 4 P; 'I shall a. accurately (the truth) about her' तत्त्वत एनामुपलप्स्ये (S. 1); 'for a. ing time' वेलोपलक्षणार्थं (S. 4); **-ment,** *s.* निरूपणं, अव-निर्-धारणं, निर्णयः.

Ascetic, *s.* यतिः, योगिन् *m.*, तापसः, तपस्विन् *m.* मुनिः, वानप्रस्थः, संन्यासिन् *m.* **-ism,** *s.* वैराग्यं, संन्यासः.

Ascribe, *v. t.* निक्षिप् 6 P, अध्या-आ-रुह् c., (रोपयति), कारणत्वेन संबंध् 9 P; 'a. the defeat to my weakness' मम दौर्बल्यात् पराजयः संभूतः, दौर्बल्यं पराभवस्य कारणं, इति वदंति; 'a. every thing to Fate' दैवायत्तं सर्वमिति वदंति; 'to whom shall I a. the blame' कस्मिन् दोषं निक्षिपामि, कं दोषपक्षे स्थापयामि; पापं कर्म च यत्परैरपि कृतं तत्तस्य संभाव्यते (Mr. I) 'is a. ed to him' &c.

Ashamed, *a.* ह्रीण, ह्रीत, लज्जमान, त्रपान्वित, लज्जित, व्रीडित, त्रपित, (with instr.); 'to be a.' लज्ज् 6 A, ह्री 9 P, त्रप् 1 A.

Ashes, *s.* भस्मन् *n.*, भसितं, पांशुः, भूति *f.*; 'to reduce to a.' भस्मावशेष *a.* कृ 8U, भस्मीभस्मसात्-कृ; 'to be reduced to a.' भस्मी-भू 1 P; 'reducing to a.' भस्मीकरणं. **-Ashy,** *a.* पांशुवर्ण, धूसर; 'a. pale' विवर्णवदनः. **2** भस्मलिप्त, भस्मीकृत.

Ashore, *adv.* तीरे, तटे, उत्तीरं, तटस्थ *a.*

Aside, *adv.* एकपार्श्वे; पार्श्वतः. **2** निभृते, एकांते, जनांतिकं, अपवार्य 'a. to one's self' आत्मगतं, स्वगतं.

Ask, *v. t.* याच् 1 A, अर्थ् 10 A, भिक्ष् 1 A. **2** अनुयुज् 7 U प्रच्छ् 6 P, (all governing two acc.) **-ing,** *s.* प्रार्थना, याचना. **2** अनुयोगः, पृच्छा.

Askance, Askew, Aslant, *adv.* तिर्यक्, साचि; 'looking a.' साचिविलोकिन्-अपांगदर्शिन्.

Asleep, *a.* सुप्त, शयित, निद्रित, निद्रालस; 'he fell a.' स निद्रावशं गतः; 'fast a.' गाढसुप्तः, गाढनिद्रावशं गतः.

Aslope, *adv.* प्रवण *a.*; प्रवणं.

Asp, *s.* सर्पः, भुजंगः.

Aspect, *s.* रूपं, आकारः, आकृति *f.*; 'a gloomy a.' विषण्णाकृतिः; 'he had a cheerful a.' तस्य वदनं हर्षोत्फुल्लं बभौ. **2** अवस्था, दशा; "all things wore a different a.' सर्वं विभिन्नावस्थायामवर्तत, विपर्यासं यातं. **3** अवस्थानं; 'my house has a northerly a.' उदगभिमुखं मे गृहं. **4** दर्शनं, निरीक्षणं, संबंधः.

Asperity, *s.* तीव्रता, रौक्ष्यं, कर्कशता. **2** विषमता, असमानत्वं.

Asperse, *v. t.* अधिक्षिप् 6 P, परिवद् 1 U. *See* **Censure, 2** सिच् 6 P, उक्ष् 1 P. **-ion,** *s.* आक्षेपः, निंदा &c. **2** सेकः, प्रोक्षणं.

Aspire, *v. i.* स्पृह् 10 (with dat.), आ-आभि-कांक्ष् 1 U, आप् desid. (ईप्सांते) प्रार्थ् 10 A, अभिलष् 1,4 P. **-ing,** *a.* **-ant,** *s.* आकांक्षिन्, अभिलाषिन्, ईप्सु; 'a. to the throne' राजपदाभिलाषी; 'a. to the fame of a poet' कवियशःप्रार्थी (R. I. 3.); जनोयमुच्चैःपदलंघनोत्सुकः (K. V. 64). **-ation,** *s.* स्पृहा, आकांक्षा, ईप्सा, अभिलाषः, लालसा; 'high a.' महाकांक्षा; 'these are, indeed, high a. s' दूरारूढाः-दूराधिरोहिण्यः खलु एता आकांक्षाः.

Aspirate, *s.* महाप्राणः.

Ass, *s.* गर्दभः, खरः, रासभः, 'a. headed' मंदधी, खरबुद्धि. **-Asinine,** *a.* रासभीय, खरसंबंधिन्.

Assafœtida, *s.* हिंगु *n.*, जतुकं, बाह्लीकं, रामठं, सहस्रवेधि *n.*

Assail, *v. t.* *See* **Attack,** 'the character of the thing is a. ed' दोषैर्नृपः स्पृश्यते (Mr. 9). **-ant,** *s.* अभियोक्तृ *m.*, आक्रामकः.

Assassin, *s.* घातकः, हंतृ *m.*, उपांशुघातकः, प्राणहारकः. **-ate,** *v. t.* हन् c. (घातयति), मृ c., व्यापद् c., निभृतं हन् 2 P, वधं-हत्यां-कृ (with gen.) **-ation,** *s.* वधः, घातः, उपांशु-निभृत-वधः.

Assault, *v. t.*, *s.* *See* **Attack.**

Assay, *s.* परीक्षा, निकषः. **2** प्रारंभः, प्रथमाप्रवृत्ति *f.* **-v.** *t.* परीक्ष् 1 A, 2 प्रयत् 1 A, *See* **Attempt.**

Assemble, *v. i.* समागम् 1 P, संमिल् 6 P, समुद्-समा-समभि-इ 2 P, संनिपत् 1 P, संगम् 1 A, एकीभू, एकत्र इ, संकुलीभू. **-v.** *t.* c. of roots above; समा-समुपा-हृ 1 P, एकत्र कृ 8 U. **-Assembly,** *s.* सभा, सदस् *f. n.*, समाजः, संसद् *f.*, परिषद् *f.*; 'a. house' सभागृहं, गोष्ठीस्थानं; 'a. hall' आस्थानमंडपः-गृहं, आस्थानी-नं; 'a. room' इंद्रकं, आस्थानं. **-Assemblage,** *s.* समूहः, संघातः, समाहारः, समुच्चयः, वृंदं, चयः, समुदायः, निवहः, समवायः, गणः, ओघः, संघः, ग्रामः in comp.; 'a. of kings' राजकं.

Assent, *v. i.* अनुज्ञा 9 U, अनुमन् 4 A. **2** ग्रह् 9 P, अंगीकृ 8 U, स्वीकृ, अभ्युप-गम् 1 P, इ 2 P. **-s** संमति *f.*, अनुमति *f.*, अनुज्ञा, अनुमोदनं. **2** अंगीकारः अभ्युपगमः.

Assert, *v. t.* प्रतिपद् c., *see* **Affirm. -ion,** *s.* वचनं; प्रतिज्ञा, पूर्वपक्षः.

Assess, *v. t* देयं करं निरूप् 10 or निर्धृ 10 or दा c. (द्रापयति). **-ment,** *s.* करनिर्धारणं; राजस्वग्रहणं. **2** करः, बलिः, शुल्कः-ल्कं, राजस्वं. **-or,** *s* सभ्यः, सभासद् *m.* **2** कर-शुल्क-ग्राहिन् *m.*

Assets, *s.* विभवः, संपत्ति *f.*

Asseverate, *v i.* सप्रतिज्ञं-सशपथं-वद् 1 P. **-ion,** *s.* शपथपूर्वकं वचनं, दृढोक्ति *f.*

Assiduity, Assiduousness, *s.* व्यवसायः, उद्यमः, तत्परता, अभियोगः, उद्योगः, मनोयोगः, प्रसक्ति *f.* **-Assiduous,** *a.* उद्यमिन्-व्यवसायिन्-उद्योगिन्; तत्पर, सोद्योग, प्रसक्त, परायण, अभियोगवत्. **-ly,** *adv.* तत्परतया साभियोगं, सोद्योगं, अविरतं, प्रसक्तं, प्रयत्नतः.

Assign, *v. t.* निरूप् 10, निर्दिश् 6 P. **2** प्र-उप्-क्लृप् c., निर्णी 1 P. **3** नियुज् 7 U, 10, स्था c. (स्थापयति). **4** दा 3 U, ऋ c. अर्पयति). **5** Ascribe, q. v. **-ation,** *s.* द्रव्य-समर्पणं-दानं **2** संकेतः, अभिसारः, 'place of a.' संकेतस्थानं. **-ee,** *s.* प्रतिनिधिः, प्रतिपुरुषः, नियोगिन् *m.* **-ment,** *s.* निर्देशः, समर्पणं, दानं, उपकल्पनं.

Assimilate, *v. t.* सदृशी-एकी-कृ 8 U; 'a. food' परिपाकं नी 1 P, परिणम् c. (णमयति) **-ion,** *s.* समीकरणं. **2** समता, साम्यं, ऐक्यं. **3** परिपाकः, परिणामः, पक्वता.

Assimulate *See* **Pretend.**

Assist, *v. t.* उपकृ 8 U, साहाय्यं-उपकारं-कृ (gen.); अनुग्रह् 9 P. **-ance,** *s.* उपकारः; साहाय्यं, साहित्यं. **-er, -ant,** *s.* सहायः, उपकृत् *m.*, उपकारिन् *m.*, साहाय्यकर्तृ *m.* **2** उप in comp.; a. master' उपगुरुः.

Assize, *s.* न्यायसभा. **2** अर्घपरिमाणं. **-v. t.** अर्घ-मूल्यं-निरूप् 10 or संख्या c. (ख्यापयति) **-er,** *s.* मूल्यनिरूपकः.

Associate, *v. i.* संसर्गं-संगतिं-समागमं-कृ 8 U; संवस् 1 P, समिल् 6 P, सहवासं कृ, संगमनुव्रज् 1 P; 'deer a. with deer' मृगा मृगैः संगमनुव्रजंति. **-v. t.** संयुज् 7 U, 10, संश्लिष् c., संगम् c. (गमयति). **-s.** वयस्यः, मित्रं, सहचरः, अनुषंगिन् *m.*, सजुस् *m.*, सहवासिन् *m.* **-ion,** *s.* संगमः, संसर्गः, संगः, समागमः, साहचर्यं, संयोगः, संश्लेषः; 'a. of the good with the good' सतां सद्भिः संगः (U. 2). **2** सभा, समाजः, पंक्ति *f.*, परिषद् *f.*

Assort, *v. t.* यथाक्रमं स्था c. (स्थापयति) or रच् 10 or विन्यस् 4 P; पृथक् कृ 8 U. **-ment,** *s.* विन्यासः, पृथक्करणं, रचना.

Assuage, *v. t.* प्र-उप-शम् c. (शमयति), तुष् c.; शां(सां)त्व् 10 **-v. i.** प्र-उप-शम् 4 P. **-Assusive,** *a.* शांतिप्रद, शामक.

Assume, *v. t.* ग्रह् 9 P, धृ 10, आदा 3 A. **2** Arrogate, q. v. **3** ग्रह्, सिद्ध *a.* मन् 4 A; प्रमाणं विना वद् 1 P; 'a. ing to be true' तत्सत्यमिति गृहीत्वापि, 'a. ed silence' कृतकं-मिथ्या-मौनं. **-ing,** *a.* *See* **Arrogant. -Assumption,** *s* ग्रहणं, धारणं. **2** कल्पना, 'on the a. that he is a fool' स मूर्ख इति मत्वा. **3** प्रतिज्ञा; प्रमेयं.

Assure, *v. t.* प्रति-इ c., प्रतीतिं कृ 8 U, विश्वस् c. **2** दृढीकृ, संस्तंभ् 9 P or c., सुनिश्चित *a.* कृ. (Oneself) प्रति-इ 2 P, विश्वस् 2 P, निश्चयेन कथ् 10; सनिश्चयं-दृढं-वद् 1 P. **-ance,** *s.* विश्वासः, प्रत्ययः. दृढः प्रत्ययः, प्रत्याशा. **2** साहसं, प्रागल्भ्यं. **3** विश्वासकारणं, प्रत्ययहेतुः. **4** योगक्षेमः, अभयवचनं. **-ed,** *a.* असंदिग्ध, सुनिश्चित, असंशय, दृढ. **-edly,** *adv.* नियतं, नूनं, खलु, असंशयं, 'I a. feel,' 'I feel a. ed' इति मे निश्चयः, दृढं मन्ये.

Asterisk, *s.* तारकाचिन्हं.

Asterism, *s.* नक्षत्रं, तारा, तारक-का.

Astern, *adv.* नौपश्चिमभागं प्रति.

Asteroid, *s.* लघुग्रहः.

Asthenia, *s.* दौर्बल्यं, क्षीणता.

Asthma, *s.* श्वासः, श्वासरोगः. **-tic,** *a.* श्वासरोगपीडित.

Complot, *v. i.* गूढं मंत्र् 10 A, कूटसंविदं कृ 8 U. -*s.* गूढ-कु-मंत्रणा, कूटसाहित्यं. **-ter**, *s.* कूटसहायः.

Comply, *v. i.* अनुविधा 3 U, अनुरुध् 4 A, अनुवृत् 1 A. 2 अनु-सं-मन् 4 A, अनुज्ञा 9 U, स्वीकृ 8 U, प्रति-परि-ग्रह् 9 P, प्रतीष् 6 P, अभ्युपगम् 1 P; क्रियतामस्याः प्रणयपरिग्रहः (Ka. 145) 'c. with her request.' **-ance**, *s.* अनुवृत्ति *f.*, अनुविधायित्वं, अनुरोधः, अनुसारः. 2 स्वीकारः, संमति *f.*, अभ्युपगमः, परिग्रहः; 'in c. with your orders' स्वच्छासनानुरोधात्-नुसारेण. **-ant**, *a.* अनुविधायिन्, अनुवृत्ति-कुशल-शील, अनुरोधिन्, वचने स्थित. **-er**, *s.* अनुरोधिन् *m.*, परिग्रहिन् *m.*

Component, *a.* or *s.* घटक, साधक, रचक; 'c. part' घटकावयवः, अंगं, भागः, साधनं.

Comport, *v. i.* **Behave**, q. v. 2 युज्-उपपद्-pass. **-able**, *a.* योग्य, उचित. **-ment**, *s.* आचारः, व्यवहारः, चेष्टितं.

Compose, *v. t.* (of books &c.) ग्रथी 1 P, विरच् 10, बंध् 9 P, निबंध्, संग्रंथ् 9 P. 2 विन्यस् 4 P, संधा 3 U, संकल्प् c., संविधा, निर्मा 3 A. 3 घट् c. (घटयति), निर्मा, कल्प् c.; or gen. ex. by आत्मक, रूप, मय (यी *f.*) in comp.; 'the body c. ed of 5 elements' पंचभिर्निर्मितो देहः, पंचभूतात्मको देहः. 4 (Calm) स्थिरीकृ 8 U, शम् c. (शमयति), प्रसद् c., संस्तंभ् c., पर्यवस्था c. (स्थापयति); 'does not yet c. (collect) himself' नाद्यापि पर्यवस्थापयत्यात्मानं (U. 3). 5 (a dispute &c.) संधा 3 U, शम् c. (शमयसि विवादं S. 5). **-ed**, *a.* शांत, प्रसन्न, अव्याकुल, अक्षुब्धिम, स्थिरीकृत, समाहित. 2 विरचित, निर्मित, निबद्ध; 'c. in verse, or music' श्लोक-स्वर-बद्ध; 'c. of' घटित, आत्मक-(त्मिका *f.*), रूप in comp. **-edly**, *adv.* असंभ्रमं, प्रशांतचेतसा, निरुद्वेगं. **-er**, *s.* रचकः, प्रणेतृ *m.*, निबंधृ *m.* **-ition**, *s.* रचना, प्रणयनं, निर्माणं, निबंधनं. 2 विन्यासः, संधानं, मिश्रणं. 3 समस्तं, मिश्रणं, संयोगः, संधिः, संघातः. 4 ग्रंथः, प्र-निबंधः. **-ure**, *s.* स्थैर्यं, शमः, प्रसादः, असंभ्रमः, अक्षोभः. 2 संधानं, संयोगः, मिश्रणं, निर्माणं.

Compotation, *s.* सहपानं, संपीतिं *f.*

Compound, *v. t.* संयुज् 10, संमिश्र् 10, संधा 3 U, समस् 4 P, संश्लिष् c. 2 (a dispute) संधा, समाधा c., प्रशम् c. (शमयति). -*v. i.* अल्पशोधनेन आत्मन्यं गम् 1 P; 'was glad to c. for his escape with the loss of it' तत्राशेनापि मुक्तिरभवदिति हृष्टो बभूव. -*a.*, **-ed**, *a.* संयुक्त, यौगिक (की *f.*), संसृष्ट, संमिश्र, सामासिक, साधित; 'c. word' समासः. **-s.** मिश्रणं, संकरः; मिश्रेतद्रव्यं, योगः. 2 परिसरभूमि *f.*, प्रांगणं (नं). **-er**, *s.* मिश्रणकृत्-समाधातृ *m.*; 'c. of medicines' औषधयोगावित् *m.*

Comprehend, *v. t.* बुध् 1 P, विद् 2 P, ज्ञा 9 U, ग्रह् 9 P, परिग्रह्, उपलभ् 1 A, अवगम् 1 P, ऊह् 1 A; विभू c., अवधू 10. 2 व्याप् 5 P, अंतर्गण् 10, अंतर्भू c., परिग्रह् 9 P, आकल् 10, समाविश् c. **-Comprehensible**, *a.* ग्राह्य, वेद्य, अवधारणीय, विभाव्य, धीगम्य, 'easily c.' सुबोध, 'not c.' दुर्बोध, दुर्ग्रह, दुर्गम, दुर्ज्ञेय. **-Comprehension**, *s.* ग्रहणं, बोधः. 2 धी *f.*, मति *f.*, बुद्धि *f.*, अवधारणा, मेधा; 'power of c. ग्रहणसामर्थ्यं. आकलनशक्ति *f.* 3 प्रतिसंधानं, व्याप्ति *f.*, समावेशः, अंतर्भावः. **-Comprehensive**, *a.* व्यापक, बहुविस्तीर्ण, व्यापिन्, बहुग्रह. 2 साक्षेपिक (की *f.*). **-ly**, *adv.* समासतः, संक्षेपेण. 2 व्यापकत्वेन. **-ness**, *s.* व्यापकत्वं. 2 संक्षेपः, समस्तता.

Compress, *v. t.* संकुच् 5 U, संकुच् 1 P, संहन् 2 P, संपीड् 10, संहृ 1 P. **-ible**, *a.* संकोचनीय. **-ibility**, *s.* संकोचक्षमता, संहरणीयता. **-ion**, *s.* संकोचः-चनं, संहतिं *f.*, संपीडनं; संवरणं

Comprise, *v. t.* व्याप् 5 P, अंतर्गण् 10, परिग्रह् 9 P, समाविश् c., अंतर्भू c.; 'to be c. ed in' अंतर्गम् 1 P, अंतर्भू 1 P, or by आत्मक, गर्भ, in comp.

Comprobation, *s.* प्रमाणं, साक्ष्यं, संमतिं *f.*

Compromise, *v. t.* आपण् 10. 2 संज्ञये पत् c., संशयस्थ *a.* कृ 8 U. -*s.* आपोषः-णं. 2 मध्यस्थावलंबननियमः.

Comprovincial, *a.* एकदेशीय, एकदेशज.

Comptrol, *v. t.* अधिष्ठा 1 P, पर्यव-ईक्ष् 1 A. **-ler**, *s.* कार्याधिकृतः, पर्यवेक्षकः, कार्यभृत् *m.*

Compulsion, -sory, *See* under **Compel.**

Compunction, *s.* अनुशयः, अनुतापः, पश्चात्तापः. **-ompunctious**, *a.* अनुशयार्त, अनुतापिन्.

Compute, *v. t.* गण् 10, सं-परिसं-ख्या 2 P, संकल् 10. **-ation,** *s.* गणनं-ना, संख्यानं. **-er,** *s.* गणकः.

Comrade, *See* **Companion.**

Con, *v. t.* अधी 2 A, अभ्यस् 4 U.

Concatenate, *v. t.* (अविच्छेदं) संयुज् 10, संश्लिष् c., अनुबंध् 9 P, संधा 3 U **-ion,** *s.* अविच्छेदसंयोगः, निरंतरः संश्लेषः, अनुबंधः. 3 माला, परंपरा, श्रेणी, पंक्ति *f.*

Concave, *a.* पुटाकार, उत्तान, उदराकार. **-ity,** *s.* उत्तानता, पुटः, गर्भः.

Conceal, *v. t.* गुह् 1 U, प्रच्छद् 10, अपवृ 5 U or c., अंतर्धा 3 U; पिधा 3 U, संवृ, नि-अप-ह्नु 2 A (feelings &c.); गुप् 1 P or 10; 'c. oneself' 'to be c. ed' अंतर्-इ 2 P; 'c. ing the body (oneself) behind a bush' विटपांतरितविग्रहः (Ka. 152); ली 4 A (मातुर्निलीयते कृष्णः S. K.). **-ed,** *a.* गूढ, प्रच्छन्न, निभृत, गुप्त, निलीन. **-ment,** *s.* गूहनं, प्रच्छादनं, नि-अप-ह्नवः, गोपनं, संवरणं; 'in c.' निभृतं, रहः, गुप्तं, छन्नं.

Concede, *v. t.* अनुमन् 4 A, प्रदा 3 U, अनुज्ञा 9 U, वितॄ 1 P; 'c. ed the point to him' तस्याभिप्रेतमन्वमन्यत. 2 अंगीकृ 8 U, अभ्युपगम् 1 P, प्रतिपद् 4 A. **-Concession,** *s.* प्रदानं, वितरणं; त्यागः. 2 क्षमा. 3 अंगीकारः, प्रतिपत्ति *f.*, अभ्युपगमः.

Conceive, *v. i.* गर्भं धृ 1 P, 10 or आधा 3 U, गर्भवती-आपन्नसत्त्वा-ससत्त्वा-अंतर्वत्नी भू 1 P. **-v. t.** विभू c., बुध् 1 P, अवधृ 10, अवगम् 1 P, ग्रह् 9 P, आलोच् 10, ज्ञा 9 U. 2 मन् 4 A, चिंत् 10, ध्यै 1 A. 3 संभू c., क्लृप् c. (नरपतौ भूषणविक्रयं को नाम संभावयेत् Mu. 5). 4 धृ, वह् 1 P; *See* **Bear**; 'I c. no hatred against you' त्वयि मे द्वेषबुद्धिर्नास्ति, न तुभ्यमसूयामि. **-Conception,** *s.* गर्भाधानं, गर्भधारणं. 2 विभावना, बोधः, ग्रहणं, अवधारणं. 3 विचारः, कल्पना, भावना, बुद्धि *f.*, मति *f.*, संकल्पः. **-Conceit,** *s.* अभिमानः, अवलेपः, दर्पः, अहंकारः, गर्वः; 'self-c.' स्वाभिमानः. 2 कल्पना, भावना, चिंता, विचारः. 3 मति *f.*, बुद्धि *f.*, गतं. **-ed,** *a.* दृप्त, अवलिप्त, अभिमानिन्, उद्धत, आत्ममानिन्, सगर्व; 'c. of learning' पंडितंमन्यः. **-edly,** *adv.* साभिमानं, सगर्वं. **-edness,** *s.* मानिता, अहंकारः, सगर्वता.

Concentre, *v. t.* एकीकृ 8 U, *See* below: 'c. ed all in self' आत्मपरायणः, आत्मन्येव निविष्टचेतोवृत्तिः.

Concentrate, *v. t.* समाहृ 1 P, समुपचि 5 U, एकीकृ 8 U. 2 समाधा 3 U (as mind); अनन्यमनस्क-एकाग्र-*a.* भू; 'my affections are c. ed in her' सा मे स्नेहस्यैकायनीभूता (M. 2). **-ed,** *a.* एकतान, अनन्यवृत्ति, एकाग्र, एकायन, एकसर्ग, एकाग्रत्र, एकायनगत. **-ion,** *s.* एकीकरणं, एकत्रसमाहरणं. 2 एकाग्रता, समाधिः, अनन्यमनस्कता.

Concentric,-cal, *a.* एक-समान-केंद्र.

Concern,-ment, *s.* अर्थः, व्यापारः, विषयः, कार्यं, संबंधः. 2 चिंता, उद्वेगः, औत्सुक्यं. 3 गौरवं, गुरुता, माहात्म्यं. 4 अवेक्षा, प्रणयः, अनुरागः, मनोयोगः, मनोभिनिवेशः. 5 चर्चा, व्यापारः, विचारः. **-v. t.** संबंध् 9 P, उद्दिश् 6 P, आश्रि 1 U; 'this does not c. you' नायं तव व्यापारः. 2 अवेक्ष् 1 A. 3 Afflict, q. v. 4 (Oneself about) व्यापृ 6 A, आत्मानं व्यापृ c., व्यापृत *a.* भू, चर्चां कृ; 'I am not c. ed in the least in this business' अनेन कर्मणा न मे कोपि संबंधः. **-ing,** *prep.* संबंधिन् -विषय in comp.; उद्दिश्य, अधिकृत्य, आश्रित्य.

Concert, *s.* एकतानः-लः, संगीतं; 'c. hall' संगीतशाला. 2 संप्रधारणा, समंत्रणं, कार्यविमर्शः, संवादः. 3 सहकारिता, संभूयकारित्वं, चित्तैक्यं, एकभावः. **-v. t.** संमंत्र् 10 A, संप्रधृ 10, कार्याणि चिंत् 10 or विमृश् 6 P, संवद् 1 P. 2 संभूय-एकत्र-कृ 8 U. 3 घट् c. (घटयति), क्लृप् c., चिंत् 10; 'well c. ed plan' सुघटितः-सुचिंतितः-प्रयोगः.

Conch. *s.* शंखः, कंबुः, दरं.

Conciliate, *v. t.* अनुरंज् c., आराध् 10, प्रसद् c., तुष् c., लल् 10, सांत्व् 10. 2 संधा 3 U, अनुनी 1 P. **-ion,** *s.* अनुरंजनं, सांत्वनं, प्रसादनं. 2 सामन् *n.*, संधानं. **-or,** *s.* अनुरंजकः. 2 संधानकर्तृ *m.*, मध्यस्थः. **-ory,** *a.* आराधक, सामन् in comp.; सामोपचाराः 'c. means'.

Concise, *a.* संक्षिप्त, संहृत, सामासिक (की *f.*). **-ly,** *adv.* संक्षेपेण, संक्षेपतः, अविस्तरेण, समासतः; 'a c. worded message' लघुसंदेशपदा सरस्वती (R. VIII. 77). **-ness,** *s.* संक्षिप्तता, संहारः, अविस्तरः. **-Concision,** *s.* कर्तनं, छेदनं, उच्छेदः.

Concitation, *s.* उत्तेजनं, प्रोत्साहनं, उत्थापनं.

Conclave, *s.* समाजः, सभा, परिषद् *f.* 2 गूढसभा-समाजः. 3 कक्षांतरं.

Conclude, *v. t.* समाप् c., निर्वृत् c., अवसो 4 P, निष्पद् c., संपद् c., साध् c., संपूर् 10. 2 अनुमा 3 A, विभू c., ऊह् 1 A, तर्क् 10. 3 निर्णी 1 P, निश्चि 5 U, अवधृ 10, व्यवसो 4 P; 'c. a treaty' संधिं कृ 8 U or विधा 3 U. **-v. i.** विरम् 1 P, निवृत् 1 A; प्र-उपशम् 4 P; 'when he had c. ed' वचस्यवसिते तस्य. **-Conclusion,** *s.* समाप्ति *f.*, निष्पादनं, सिद्धि *f.*, निष्पत्ति *f.*, निवृत्ति *f.* 2 अवसानं, अंतः, परिणामः, उपसंहारः. 3 अनुमानं, ऊहनं, अनुमिति *f.* 4 निर्णयः, अवधारणं, फलं, उत्तरं. 5 सिद्धांतः, राद्धांतः, उत्तरपक्षः, निगमनं (in logic). **-Conclusive,** *a.* अखंड्य, अनिरस्य, निरुत्तर, समर्थ. 2 निर्णायक, संशयच्छेदिन्, निश्चायक. **-ly,** *adv.* सनिश्चयं, निश्चितं, संशयच्छेदितया.

Concoct, *v. t.* पच्-क्वथ् 1 P, तप् c. 2 चिंत् 10, घट् c. (घटयति), प्रक्लृप् c., निरूप् 10. **-ion,** *s.* क्वाथः. 2 पाकः, पाचनं. **-ive,** *a.* पाचक.

Concomitant, *a.* आनुषंगिक (की *f.*), समवायिन्, समेत, समन्वित; सहवर्तिन्, सहकारिन्. **-s.** सहचारिन् *m.*, सहवर्तिन् *m.*, संगिन् *m.* **-ly,** *adv.* समवेतं, सहितं, सह, संभूय. **-Concomitance,** *s.* संयोगः, समन्वयः, अनुषंगः, समवायः.

Concord, *s.* ऐक्यं, एकता; चित्तैक्यं, अविसंवादः, अविप्रतिपत्ति *f.*, अविरोधः; 'c. of hearts' ऐक्यं हृदययोः, एकचित्तता. 2 प्रीति *f.*, प्रणयः, संधिः. 3 समयः, संविद् *f.*, नियमः. 4 अनुषंगः, अन्वयः, समन्वयः. 5 तालैक्यं, स्वरैकता. **-ance,** *s.* एकता, सादृश्यं, ऐक्यं. **-ant,** *a.* अनुरूप, अनुगुण, सदृश (शी *f.*), अविरुद्ध, संवादिन्.

Concourse, *s.* संधिः, संगमः. 2 (of people) (जन-) समूहः, संघातः, निवहः, ओघः, गणः.

Concrement. *s.* पिंडः, राशिः, घनता, संहति *f.*, संघातः.

Concrete, *v. t.* राशीकृ 8 U, पिंडीकृ, एकीकृ, घनीकृ, संहन् 2 P. **-v. i.** राशीभू 1 P, पिंडीभू, घनीभू, संहन् pass. **-s.** पिंडः, ओघः, घनचयः. 2 घनद्रव्यं, श्यानद्रव्यं. **-a.** घन, राशीभूत, संहत, श्यान, पिंडीभूत. 2 अविविक्त, अकेवल, समवेत, आन्वित. **-ion,** *s.* घनीकरणं; संहति *f.*, संघातः, 2 पिंडः, लोष्ठः, संहतद्रव्यं.

Concubine, *s.* उपपत्नी, उपस्त्री, गणिका, वारस्त्री, वेश्या; 'c. shut up' अवरोधस्त्री. **-age,** *s.* उपस्त्रीगमनं, वेश्यासेवा.

Concupiscence, *s.* कामः, अभिलाषः, रताभिरुचि *f.* **-Concupiscient,** *a.* कामुक, कामिन्, रतार्थिन्.

Concur, *v. i.* एकत्र मिल् 6 P, संगम् 1 A, संभू 1 P, संपत् 1 P, समागम् 1 P. 2 संभूय-एकीभूय-कृ 8 U, 3 संमन् 4 A, तथा मन्; अभ्युपगम्, एकचित्तीभू; *See* **Agree.** **-rence,** *s.* सं-अनु-मति *f.*, संमतं, इच्छा. 2 मतैक्यं, एकचित्तता. **-rent,** *a.* एकचित्त, संप्रतिपन्न, संवादिन्. 2 अनुषंगिन्, संभूय-सह-कारिन्. **-rently,** *adv.* संमतिपूर्वं, अनुमत्या. 2 समनेव, युगपत्.

Concussion, *s.* संघट्टः, विकंपः, विधुवनं, संक्षोभः.

Condemn, *v. t.* **Censure,** q. v. 2 दंड् 10, दंडं आदिश् 6 P or कृ 8 U; 'c. to death' वधदंडमादिश्; 'he was c. ed to be hanged' शूलमारोप्यतामसाविति दंडं आदिष्टः. 3 अपराधिन् *a.* स्था c. (स्थापयति), अपराधं निर्णी 1 P; 'c. to pay' दा c. (दापयति). **-ation,** *s.* दंडनं, दंडाज्ञा. 2 अपराधनिर्णयः. 3 निंदा, गर्हा, दूषणं. **-atory,** *a.* निंदक, अपवादक. **-er,** *s.* दंडप्रणेतृ *m.* निंदकः.

Condense, *v. t.* संहन् 2 P, घनीकृ 8 U, सांद्रीकृ, श्यै c. 2 संक्षिप् 6 P. **-v. i.** सांद्रीघनी-भू, संहन् pass., श्यै 1 A. **-a.** **-ed,** *a.* घन, सांद्र, निबिड, श्यान; संक्षिप्त. 2 स्थूल, अविरल. **-ation,** *s.* घनीकरणं. **-ity,** *s.* घनता, निबिडता, &c.

Condescend, *v. i.* प्रसद् 1 P, अर्ह् 1 P, (followed by inf.); *See* **Please**; 'the king c. -ed to speak with his servant' प्रसन्नो भूत्वा, दक्षिणतया, गौरवं-अभिमानं-अपास्य, भृत्येन सहाभाषत; 'c. to look at me' मयि दृष्टिप्रसादं कुरु. 2 अनुवृत् 1 A, अनुमन् 4 A, अनुज्ञा 9 U. **-ing,** *a.* प्रसादाभिमुख (खी *f.*), प्रसन्न, अस्तगर्व, त्यक्तगौरव. **-ingly,** *adv.* अगर्वं, प्रसन्नतया, नम्रतया. **-Condescension,** *s.* प्रसादः, दाक्षिण्यं, दर्पत्यागः, गौरवत्यागः, नम्रता.

Condign, *a.* यथार्ह, अनुरूप, समुचित, योग्य **-ly,** *adv.* यथार्हं, यथोचितं. **-ness,** *s.* योग्यता, औचित्यं.

Condiment, *s.* व्यंजनं, उपस्करः.

Condisciple, *s.* सतीर्थः (-र्थ्यः), एकगुरुः.

Condition, *s.* दशा, अवस्था, भावः, स्थिति *f.*, वृत्ति *f.*, गति *f.*, 'in this c.' एवंविध *a.*, एवंभूत *a.*; oft. ex. by त्व & ता affixed; दरिद्रता, दुर्गतत्वं, &c. 2 समयः, नियमः, प्रतिज्ञा, अभिसंधिः; संकेतः; 'on this c.' अनेन समयेन. 3 अर्थः, आस्पदं, पदं; अधिकारः, भावः. 4 गुणः, उपाधिः, विशेषणं, प्रकृति *f.* **-al,** *a.* समययुक्त, सोपाधिक (की *f.*), सनियम, नियत; संकेतार्थ. **-ally,** *adv.* समयपूर्वकं, सप्रतिज्ञं, समयपुरःसरं. **-ed,** *a.* स्थित, वर्तिन्, स्थ in comp.; 'well c.' सुस्थित, सुस्थ.

Condole, *v. i.* समदुःख *a.* भू 1 P, (अन्यं) अनुशुच् 1 P, शोकार्तं समदुःखेन सांत्व् 10. **-ence,** *s.* समदुःखता, अनुशोचनं; शोकः, संपरिदेवनं. **-er,** *s.* समदुःखभागिन् *m.*

Condone, *v. t.* क्षम् 1 A, प्रशुष् c., प्रमृज् 2 P. **-ation,** *s.* क्षमा, अपराधक्षमा, प्रमार्जनं.

Conduce, *v. i.* (to) आवह् 1 P; (महदपि राज्यं न मे सौख्यमावहति P. I. 1), भू with dat., क्लृप् 1 A, संपद् 4 A, (dat.). 2 वृध् c., संपद् c., उत्पद् c., प्रवृत् c. **-ive,** *a.* आवह, कर (री *f.*), जनक, in comp.; 'c. to happiness' सुखावह, हितकर, &c.

Conduct, *v. t.* नी 1 P, प्राप् c. (ननु मां प्रापय पत्युरंतिकं K. IV. 32), गम् c. (गमयति), वह् 1 P. 2 विधा 3 U, निर्वह् c., प्रवृत् c., प्रणी. 3 (oneself) वृत् 1 A.

व्यवह् 1 P, आचर् 1 P, *See* **Act**; 'c. oneself properly' सदाचारेण वृत्, सदाचारं प्रतिपद् 4 A; 'well c. ed' साधुवृत्त, सदाचार. **4** परि-अनु-चर् 1 P, अनुया 2 P, मार्गं इश् c. or आदिश् 6 P. **-s.** निर्वाहणं, निर्वाहः, प्रणयनं. **2** वृत्ति *f.*, वृत्तं, आचारः, व्यवहारः, कर्मन् *n.*, चरितं, चेष्टितं, आचरणं. **3** परिचरः, मार्गदर्शकः. **-or,** *s.* नायकः, अग्रगः, नेतृ *m.*, अग्रणीः, (of heat &c.) प्रवाहकः. **2** निर्वाहकः, प्रणेतृ *m.*

Conduit, *s.* प्रणाली, जलनिर्गमः. **2** कुल्या.

Cone, *s.* सूचि-ची *f.*, शिखा. **2** शंकुः. **-Conic, -Conical,** *a.* सूच्याकार, शंकाकृति.

Confabulate, *See* **Converse.**

Confect, *v. t.* जपस्क् 8 U, स्वादु *a.* कृ. **-ion,** *s.* उपस्करः, मिष्टान्नं, मोदकः. **-ionery,** *s.* मोदकविक्रयस्थानं, मोदककियास्थानं **-ioner,** *s.* आपूपिकः, भक्ष्यकारः,

Confederate, *v. t.* संधा 3 U, संयुज् 7 U, 10, एकत्र कृ 8 U. **-***v. i.* संघट्ट् 1 A, संयुज् pass., संधिं कृ. **-***a.* संधिबद्ध, सन्धिष्ठ, कृतसंधि, संयुक्त, संघातवत्. **-***s.* सहायः, सहकारिन् *m.*, सहयोगिन् *m.* **-ion,** *s.* संधानं, संयोजनं. **-Confederacy,** *s.* संधिः, साहित्यं, संघातः, संयोगः.

Confer, *v. t.* (upon) विधू 1 P (with loc.), प्रतिपद् c., दा 3 U, 1 P (with dat.); 'I shall c. upon you 100 grants of land' त्वां शासनशतेन योजयिष्यामि (P. I, 1). **2** आवह् 1 P, दा, उत्पद् c. **3** Compare, q. v.; 'c. a favour' प्रसादं कृ 8 U, अनुग्रह् 9 P; 'c.-ing pleasure,' सुखद्, सुखावह. **-***v. i.* संभाष् 1 A, संलप् 1 P. संवद् 1 P. **2** संगंड् 10 A, संचित् 10, चिच्चि् c. **-ence,** *s.* संवादः, संकथा, संभाषणं. **2** मंत्रणं. **3** उपमानं. **4** मेलकः, समाजः. **-rer,** *s.* दातृ *m.*, द or प्रद in comp.

Confess, *v. t.* स्वीकृ 8 U, अंगीकृ, प्रतिपद् 4 A, अभ्युपगम् 1 P, अभ्युप-इ 2 P. **2** विधू 5 U, सूच् 10, प्रकाशय् c., ख्या c. (ख्यापयति). **3** (आचार्याय-गुरवे) पापानि निविद् c. or कथ् 10. **-edly,** *adv.* असंशयं, व्यक्तं, प्रतिपत्तिपूर्वकं. **-ion,** *s.* अंगीकारः, संप्रतिपत्ति *f.*, अभ्युपगमः, ग्रहणं. **2** ख्यापनं, पकाशनं. **3** पापनिवेदनं. **-or,** *s.* स्वीकर्तृ *m.*; ख्यापकः.

Confide, *v. i.* विश्वस् 2 P, प्रति-इ 2 P, श्रद्धा 3 U; 'she was made to c. in a false man' असत्यसंधे जने पर्यं कारिता (S. 4). **-***v. t.* निक्षिप् 6 P, न्यस् 4 P (with loc.), सम-ऋ c. (अर्पयति); 'have you kept the secret c. ed to you' अपि रक्ष्यते रहस्यनिक्षेपः (V. 2). **-ant,** *s.* विश्वास-विश्रंभ-भूमि *f.*, सखि *m.*, वयस्यः. **2** (of a woman) सखी, वयस्या, आलि-ली *f.* **-ence,** *s.* विश्वासः, विश्रंभः, प्रत्ययः; श्रद्धा. **2** निश्चयः, दृढप्रत्ययः, दृढज्ञानं, असंशयः; 'enter into c.' विश्वासं गम् 1 P or व्रज् 1 P; 'raising of c.' विश्वासोपगमः; 'inspire with c.' विश्वासं नी 1 P; 'take into c.' विश्वस् c.; 'take into c.' विश्रंभस्थाने मन् 4 A; 'self-c.' प्रगल्भता, प्रागल्भ्यं, धृष्टता, 'an object of c.' विश्वासभूमिः, विश्रंभस्थानं, -भाजनं. **-ent,** *a.* विश्वासिन्, विश्वासगतिपक्ष विश्वस्त, जातप्रत्यय, विश्रब्ध. **2** निश्चित, असंदेह, छिन्नसंशयः 'be is c. of success' जय निश्चितं (ध्रुवं) मन्यते. **3** प्रगल्भ, धृष्ट, निर्विशंक, साहसिन्. **-ential,** *a.* विश्वस्त, विश्रब्ध; आप्त (आप्तजनः); 'c. talk' विश्रंभालापः; 'c. matter' विश्वासकार्यं. **2** गुप्त, अमंत्रणीय, संवरणीय. **-entially,** *adv.* विश्रब्धं, गुप्तं. **-ing,** *a.* विश्वासापन्न, विश्रंभभाज्, विश्वस्त, जातप्रत्यय, विश्रब्ध, अविशंकमान, निःशंक. **-ingly,** *adv.* विश्रब्धं, सप्रत्ययं, निर्विशंकं, निःसंदेहं.

Configuration, *s.* आकारः, रूपं, मूर्ति *f.*, विग्रहः, आकृति *f.*

Confine, *s.* सीमा, पर्यंतः, प्रांतः, समंतः, परिसरभूमि *f.* **-***v. t.* पर्यंते-निकटे-स्था 1 P or वृत् 1 A. **-***v. t.* नि-अव-रुध् 7 U, आसिच् 1 P, नि-सं-यम् 1 P, निग्रह् 9 P, बंध् 9 P, निर्बंध्. **2** (oneself to) न व्यति-इ 2 P or उल्लुंच् 1 A, 10, नातिचर् 1 P. **3** संधू 1 P, संकुच् 1 P. **-ed,** *a.* संयत, निरुद्ध, निबद्ध. **2** संकट, संकुचित; 'c. in the bowels' बद्धकोष्ठः; 'c. to bed' शयनग्रस्त; (of a woman) प्राप्तप्रसवकाला. **-ment,** *s.* संयमः, निरोधः, निग्रहः, बंधनं, कारागृहं; 'c. of bowels' विबंधग्रहः, आनाहः, मलावरोधः; 'c. of a woman' प्रसवकालः, प्रसवावस्था.

Confirm, *v. t.* दृढीकृ 8 U, द्रढयति (D.), संस्तंभ् c. **2** स्थिरीकृ, दृढप्रमाणं दा 3 U, प्रमाणीकृ, सुस्थिर-दृढ- *a.* कृ. **-ation,** *s.* दृढीकरणं, संस्तंभनं, सत्यापनं, प्रमाणीकरणं. **-ed,** *a.* दृढीकृत, प्रमाणीकृत, स्थिरीकृत. **2** दृढ, स्थिर, रूढ, प्ररूढ; 'a c. fool' प्रतिनिविष्टमूर्खः, 'c. friendship' प्ररूढः संसर्गः, रूढसौहृदं.

Confiscate, *v. t.* सर्वस्वं अपहृ 1 P or आच्छिद् 7 P or वृंह् 10, निःस्व *a.* कृ 8 U; 'let his property be c. ed' अस्य सर्वस्वहरणमादिश्यतां. **-ed,** *a.* राजापहृत; हृतसर्वस्व, निःस्वीकृत. **-ion,** *s.* सर्वस्वहरणं, सर्वस्वदंडः, सर्वस्वापहारः.

Conflagration, *s.* दाहः, ज्वलनं, दीपनं; 'forest c.' दावानलः, वनः, दावः, अरण्यवह्नि *m.*

Conflict, *s.* विरोधः, (स्मृत्योर्विरोधः); हेडं, कालहः, वैरं; विप्रतिपत्ति *f.*, विसंवादः. **2** युद्धं, संग्रामः, विग्रहः. **3** संघट्टः, समाघातः, अभिसंपातः. **-***v. i.* युध् 4 A, विवद् 1 A, विग्रह 9 P; 'mutually c. ing S'astras परस्परं विवदमानानां शास्त्राणां (II. 1): विप्रतिपद् 4 A, परस्परं विरुध् pass., विसंवद् 1 P. **-ing,** *a.* विप्रतिपन्न, विरुद्ध, परस्परविरोधिन्, विसंवादिन्.

Confluence, Conflux, *s.* संगमः, संभेदः, तोयव्यतिकरः. वेणि *f.* **2** संयोगः, समागमः, संमिलनं. **3 Concourse,** q.v. **-Confluent,** *a.* संमेलक, संप्रवाहक.

Conform, *v. i.* (to) अनुवृत् 1 A, अनुस 1 P, अनुरुध् 4 A, प्रमाणीकृ 8 U, (इति सुजनचरितं प्रमाणीकुरु M. 3), अनुविधा 3 U. **2** युज् pass., सदृश-तुल्य *a.* भू, उपपद् 4 A, संवद् 1 P. **-***v. t.* अनुरूप-सदृश *a.* (ई *f.*) कृ, समीकृ. **-able,** *a.* अनुरूप, सदृश, तुल्य, अनुगुण, समान, संवादिन्. **2** अनुविधायिन्, अनुरोधिन्, अनुकूल. **3** योग्य, उपपन्न. **-ably,** *adv.* अनुसारेण-सारतः, अनुरोधात्, अनुरूपं, यथा in comp. **-ity,** *s.* अनुरोधः, अनुवृत्ति *f.* **2** अनुरूपता, आनुगुण्यं, सादृश्यं, अनुसारः; 'in c. with' अनुसारेण, अनुरूपं, &c. **3** योग्यता, युक्तता. **-ist,** *s.* धर्मानुसारिन् *m.*, प्रवृत्तधर्मानुवर्तिन् *m.*

Confound, *v. t.* भ्रांत्या मन् 4 A; 'c. s falsehood with truth' सत्यमनृतमिति भ्रांत्या मन्यते; oft. by संदिह् 2 U; धूपैजालिवानिःसृतैर्वह्नयः संदिग्धपारावताः (V. 3) 'the pigeons c. ed with volumes of incense' &c.; *See* **Mistake.** **2** आकुलीकृ 8 U, मुह् c., वि-सं-क्षुभ् c., संभ्रम् c. (भ्रमयति). **3** संकृ 6 P, विक्षिप् 6 P, संमिश्र् 10, संकुलीकृ. **4** विलुप् c., विनश् c.; 'c. by argument' निष्प्रतीकृ. **-ed,** *a.* मोहित, आकुल, संभ्रांत, विहस्त, व्यग्र, विक्षिप्त. **2** संकीर्ण, संमिश्रित, संकुल. **3** क्वेलोपहत; लुप्तज्ञान. **-er,** *s.* मोहकः, मोहनः. **-ing,** *a.* भ्रांतिजनक, संदेहोत्पादक, मोहिन्.

Confraternity, *s.* सौभ्रात्रं; भ्रातृत्वं, साहित्यं. **Confrere,** *s.* *See* **Colleague.**

Confront, *v. t.* अभिमुखी-संमुखीकृ 8 U, अभिमुखयति (D.), समक्षं उपानी 1 P. **2** संमुखीभू 1 P, सं-अभि-मुखं स्था 1 P or गम् 1 P or वृत् 1 A. **3** Compare, q. v. **-ation,** *s.* संमुखस्थापनं; संमुखागमनं.

Confuse, *v. t.* वि-सं-भ्रम् c., आकुलीकृ 8 U, मुह् c. *See* **Confound**; 'to be c. ed' मुह् 4 P, आकुलीभू. **-ed,** *a.* मोहित, संभ्रांत, आकुल. **2** अस्पष्ट, अव्यक्त, क्रमहीन. **-edly,** *adv.* संकुलं, अक्रमेण, तसंभ्रमं. संकीर्णतया, अस्तव्यस्तं. **2** अस्पष्टं, संदिग्धतया. **-Confusion,** *s.* संभ्रमः, वैक्लव्यं, व्याकुलत्वं, व्यग्रता, विप्लवः, मोहः. **2** वैलक्ष्यं, व्रीडा, लज्जा. **3** संकरः, संक्षोभः, व्यतिकरः, संकुलं. **4** अक्रमः, अस्पष्टता, क्रमभंगः, अस्तव्यस्तता. **5** विनाशः, निग्रहः, लोपः.

Confute, *v. t.* खंड् 10, प्रत्याक्षिप् 6 P, निरस् 4 U, प्रत्याख्या 2 P, निरा-अपा-कृ 8 U; निरुत्तरीकृ (of persons). **-ation,** *s.* खंडनं, निराकरणं, निरसनं, प्रत्याख्यानं.

Conge, *s.* प्रणामः, नमस्कारः. **2** आमंत्रणं, अनुज्ञाग्रहणं, आमच्छनं.

Congeal, *v. t.* घनीकृ 8 U, संहन् 2 P, द्रवै c., पिंडीकृ; संचि 5 U. **-***v. i.* घनीभू 1 P, द्रवै 1 A, पिंडीभू, संहन् pass., द्रीतीभू. **-Congelation,** *s.* द्रीतीभावः, संहतिं *f.*, घनीभावः, घनीकरणं.

Congener, *s.* सजाति *m.*, सजातीयः.

Congenial, *a.* एकजातीय, सजाति. **2** समानशील, एकस्वभाव, सधर्मन्. **3** सुखावह, हितकर (री *f.*), अनुरूप, अनुगुण, अनुकूल, सदृश (शी *f.*); 'c. to health' आरोग्यावह, स्वास्थ्यकर. **-ity,** *s.* समानशीलता, सधर्मता, सजातित्वं. **2** आनुरूप्यं, आनुगुण्यं.

Congenital, *a.* सहज, सहजात.

Congenite, *a.* सहज, एककालोत्पन्न.

Conger, *s.* जलव्यालः.

Congeries, *s.* राशिः, संचयः, ओघः, पुंजः, स्तोमः.

Congest, *v. t.* राशीकृ 8 U, संचि 5 U, पिंडीकृ, घनीकृ. **-ion,** *s.* (of blood) रक्तावष्टंभः, असृक्चयः, रक्तसंचयः. **2** अतिबाहुल्यं-उपचयः.

Conglobate, *a.* एकपिंडीभूत. **-***v. t.* गोलीकृ 8 U, एकपिंडीकृ.

Conglomerate, *v. t.* राशीकृ 8 U, संचि 5 U, संघ 3 U. एकपिंडीकृ, समाक्षिप् 6 P. **-ion,** *s.* समुपचयनं, एकीकरणं. **2** एकराशिः, एकपिंडः.

Conglutinate, *v. t.* संयुज् 10, संश्लिष् c., संधा 3 U; संरुह् c. (रोपयति) (of wounds). **-***v. i.* pass. of roots above. **-ion,** *s.* संयोगः, संधिः, संधानं. **2** संरोपणं.

Congratulate, *v. t.* अभिनंद् 1 P or c., (तापसीभिरभिनंद्यमाना S. 4), gen. ex. by दिष्ट्या with वृध् 1 A or c., (चित्ररथहंसो दिष्ट्या वर्धयितुं Ka. 365); दिष्ट्या सुतसुखदर्शनेन आयुष्मान्वर्धते (S. 7) 'you are to be c. ed upon seeing your son's face', or 'I c. you upon seeing' &c. **-ion,** *s.* धन्यवादः, अभिनंदनं, दिष्ट्या वर्धनं **-ory,** *a.* अभिनंदक, धन्यवादसूचक.

Congregate, *v. t.* समाचि 5 U, समाहृ 1 P; *See* **Collect.** **-***v. i.* संश्लिष् 6 P, सं-इ 2 P; *See* **Assemble.** **-ion,** *s.* सभा, परिषद् *f.*, संसद् *f.*, समाजः. **2** समवायः, निवहः, गणः, समाहारः, समुदायः. **-ional,** *a.* सामाजिक (की *f.*), सभ्य

Congress, *s.* सभा, परिषद् *f.*, संसद् *f.*, मेलकः, समाजः, सदस् *f. n.* **2** संघट्टः, समाघातः

Congruous, *a.* योग्य, उचित, संगत, अविरुद्ध, अनुगुण, अनुरूप, सदृश (शी *f.*), संबद्ध. **-ly,** *adv.* युक्तं, अनुरूपं, संगतं. **-Congruity, Congruence,** *s.* संगतता, अनुरूपता, युक्तता, सादृश्यं; oft. ex. by क्व-क्व; 'what c. is there between this (youthful) age and this restraint of passions' क्वेदं वयः क्वेयमिंद्रियाणामुपशांतिः (Ka. 135).

Conjecture, *v. t.* तर्क् 10, अनुमा 3 A, 2 P, ऊह् 1 A, उत्प्रेक्ष् 1 A, (किमुत्प्रेक्षसे कुतस्त्योयमिति U. 4). **-s.** तर्कः, वितर्कः, ऊहः, हनं, अनुमानं; 'your c. is clear (you have rightly c. ed)' प्रसन्नः-उपपन्नः-ते तर्कः. **-al,** *a.* आनुमानिक (की *f.*). **-ally,** *adv.* अनुमानेन, सवितर्कं, अनुमानपूर्वकं.

Conjoin, *v. t.* संयुज् 7 U, 10, संश्लिष् c., संधा 3 U; 'c. ed in bonds of friendship' मित्रभावेन वर्तमानाः, परस्परानुरक्ताः. **-v. i.** संयुज्-संश्लिष्-संधा- pass. **-ed, Conjoint,** *a.* संहत, संयुक्त, संश्लिष्ट, संबद्ध. **-ly,** *adv.* समं, सहितं, संहत *a.*, संभूय.

Conjugal, *a.* वैवाहिक (की *f.*); oft. ex. by दंपती; 'c. love' दंपत्योः प्रेम; 'c. fidelity' अव्यभिचारः; सतीत्वं, पातिव्रत्यं.

Conjugate, *v. t.* रूपाणि आख्या 2 P. **-a.** संयुक्त. **-ion,** *s.* गणः; '1st c.' स्वादिगणः. **2** संयोगः.

Conjunct, *a.* संयुक्त, संश्लिष्ट; 'a c. consonant' संयोगः, योगः. **-ion,** *s.* संयोगः, योगः, संश्लेषः, संसर्गः, समागमः, संगमः; संगः. **2** समुच्चयः; 'c. of planets' संगमः; 'lunar c.' अमावास्या, अमा. **-ive,** *a.* संयुक्त, संश्लिष्ट, यौगिक (की *f.*). **-ure,** *s.* योगः, संयोगः, संधिः. **2** अवसरः, समयः, प्रस्तावः.

Conjure, *v. t.* मुह् c., मंत्रैर्वशं नी 1 P; मायां कृ 8 U, अभिचर् 1 P. **2** सशपथं आदिश् 6 P, शप् c.; 'I c. thee by my life (soul)' शापितासि मम जीवितेन (Mal. 8); अभ्यर्थ् 10 A, सशपथं संबुध् c. **3** (in mind) अनु-सं-स्मृ 1 P; चिंत् 10. **-v. t.** सशपथं ऐकमत्यं-कूटं-कृ 8 U, संशप् 1 U. **-ation,** *s.* माया, इंद्रजालं, कुहकः, मंत्रः. **2** शापनं. **3** सशपथः संकल्पः, संशपनं. **-er,** *s.* इंद्र-ऐंद्र-जालिकः, मायिन् *m.*, आहितुंडिकः, कुहककृत् *m.*, कुहकाजीवः.

Connate, *a.* सहज, एककालोत्पन्न, सहजात.

Connatural, *a.* सहज; एकस्वभाव.

Connect, *v. t.* सं-अनु-बंध् 9 P. संयुज् 7 U, 10, संश्लिष् c., संधा 3 U, व्यतिषंज् 1 P, संनह् 4 P, संयु 2 P. **-ed,** *a.* संयुक्त, संबद्ध, अन्वित, सान्वय. **2** अविच्छेद, अविरत, अविच्छिन्न, 'a c. narrative' कथाप्रबंधः. **-ion,** *s.* संयोगः, अनुषंगः, संसर्गः, संगः; 'in c. with' अनुबध्य, उद्दिश्य, अधिकृत्य. **2** संबंध, संपर्कः, अन्वयः, संदर्भः, समन्वयः. **3** बंधुः, बांधवः, ज्ञातिः; 'to have c. with' संगम् 1 A, अभिगम् 1 P.

Connive, *v. i.* (at) कामतः उपेक्ष् 1 A, ज्ञानं निह्नु 2 A. **2** क्षम् 1 A, सह् 1 A. **3** अक्षि संकुच् 1 P. **-ance,** *s.* उपेक्षा, ज्ञानापह्नवः, कामतः उपेक्षा. **2** क्षमा. **3** अक्षिसंकोचनं.

Connoisseur, *s.* गुणज्ञः, परीक्षकः, अभिज्ञः.

Connubial, *a.* वैवाहिक (की *f.*); दंपती in comp.; 'c. love' दंपतीस्नेहः.

Conquer, *v. t.* जि 1 P, वि-परा-जि 1 A, अभि-पराभू 1 P. **2** निग्रह् 9 P, नि-सं-यम् 1 P, दम् c. (दमयति), वशीकृ 8 U, स्वायत्तीकृ; 'one who has c. ed his passions' जितेंद्रियः, संयतेंद्रियः, वशी, दांतः, संयमी. **-able,** *a.* जेय, अभिभवनीय. **-or,** *s.* जेतृ *m.*, विजेतृ, जयिन् *m.*, जित् in comp.; विश्वजित् 'c. of the world' **-Conquest,** *s.* जयः, विजयः, वशीकरणं, अभिभवः, जयनं, स्वायत्तीकरणं. **2** जितप्रदेशः.

Consanguineous, *a.* एकशरीर, एकपिंड, सपिंड, सगोत्र. **-Consanguinity,** *s.* सगोत्रता, सपिंडता; एकशरीरान्वयः, संबंधित्वं.

Conscience, *s.* सदसद्विचारशक्ति *f.*, संज्ञानं; oft. ex. by मनस् *n.*, अंतःकरणं; 'biting of c.' पश्चात्तापः, मनस्तापः. **-Conscientious,** *a.* निर्व्याज, अमाय, शुद्धमति, न्यायपरायण, ऋजुप्रकृति. **2** पुण्यात्मन्, पुण्यशील, न्यायवर्तिन्. **-ly,** *adv.* शुद्धमनसा, निर्व्याजं, शुद्धभावेन. **-ness,** *s.* मतिशुद्धि *f.*; शुचिता, पुण्यशीलत्वं.

Conscionable, *a.* न्याय्य, योग्य यथार्थ. **-Conscionably,** *adv.* यथार्थं, धर्मतः, न्यायेन.

Conscious, *a.* Ex. by ज्ञ, विद् or अभिज्ञ in comp. or by verbs for 'know' q. v. 'not c. of pain' वेदनानभिज्ञ; 'I am perfectly c. of my defects' स्वदोषान् दृढं खलु जाने. **2** सचेतन, सतर्क, ज्ञानिन्, प्रतिबोधवत्; 'to be c. of' ज्ञा 9 P; विभू c., (नात्मानमपि विभावयति S. 4), चित् 10 A; *See* **Know.** **-ly,** *adv.* ज्ञानात्, बुद्धिपूर्वं, ज्ञानतः, कामतः. **-ness,** *s.* ज्ञानं, उपलब्धि *f.*, चेतना, चैतन्यं, संज्ञा, वेदनं, अनुभवः, बोधः, प्रतिबोधः.

Conscript, *s.* नवयोद्धृ *m.* **-a.** लिखितनामन्.

Consecrate, *v. t.* (an idol) प्रतिष्ठा c. (प्रतिष्ठापयति), प्रतिनीकृ 8 U, संस्कृ, अभि-अनु-मंत्र् 10 A, (वामदेवानुमंत्रितोऽश्वः U. 2.). **2** अभिषिच् 6 P, प्रोक्ष् 1 P. **3** उप-प्र-विनि-युज् 7 A, 10, निक्षिप् 6 P, वि-उत्-सृज् 6 P, उपकल्प् c. **-a.,** **-ed,** संस्कृत, प्रतिष्ठापित, विनियोजित, उपकल्पित. **-er,** *s.* संस्कर्तृ *m.*, प्रतिष्ठापकः. **-ion,** *s.* संस्कारः, प्रतिष्ठापनं. **2** उत्सर्गः, विनियोगः, उपयोगः.

Consecution, *s.* क्रमः, अनुक्रमः, प्रबंधः, अन्वयः, परंपरा, श्रेणी, माला. **-Consecutive,** *a.* क्रमागत, अनुपूर्व; अविरत, निरंतर, सप्रबंध, संतत. **-ly,** *adv.* क्रमेण, यथाक्रमं, यथापूर्वं; अविरतं, अविच्छेदं. **-ness,** *s.* आनुपूर्व्यं, अविच्छेदः, प्रबंधः, संततता.

Consensus, *s.* बहुजनसंमति *f.*

Consent, *v. i.* सं-अनु-मन् 4 A, अनुमुद् 1 A, अनुज्ञा 9 U; ग्रह् 9 P, स्वीकृ 8 U; *See* **Agree.** **-s.** संमति *f.* -तं, अनुज्ञा, अनुमोदनं. **2** मतैक्य, एकचित्तता, ऐक्यं. **3** इच्छा, कामः; 'against one's c.' अनिच्छया, संमतिव्यतिरेकेण, बलात्, बलेन; 'c. in writing' संमतिपत्रं; 'take the c. of' अनुमन् c., (भूयोपि सखीजनमनुमानयिष्यामि S. 3). **-ient,** *a.* एकमत, एकचित्त, संमत. **-ingly,** *adv.* संमत्या; कामतः, संमतिपूर्वं.

Consentaneous, *a.* *See* **Fit.**

Consequence, *s.* फलं, परिणामः, उदर्कः, उत्तरं, उत्तरफलं. **2** गौरव, महिमन् *m.*, गुरुता, प्रतिष्ठा, प्रभावः; 'of no c.' निरर्थक, यत्किंचन. **3** सिद्धि *f.*; कार्यं, प्रयोजनं, निमित्तं. **4** अनुमानं, ऊहनं, अभ्यूहः; 'in c. of this' अतः, अस्मात्कारणात्, अस्माद्धेतोः, अनेन हेतुना; 'as a c. of thy efforts' तव यत्नसामर्थ्यात्; 'immediate c.' सांदृष्टिकं; 'necessary c.' कार्यवशः; 'visible c.' दृष्टार्थः. **-Consequent,** *a.* आनुषंगिक (की *f.*), अनुवर्तिन्; oft. ex. by फलं; 'c. upon his coming' तदागमनफलं. **-s.** अनुषंगः, फलं, परिणामः. **-ial,** *a.* आनुषंगिक, अनुवर्तिन्. **2** मानिन्, सगर्व; *See* **Arrogant.** **-ly,** *adv.* इति हेतोः, अतः, तन्निमित्तेन, तदनुसारेण; तदर्थं, इति, अनेन हेतुना, अस्मात्कारणात्.

Conserve, *v. t.* संरक्ष् 1 P, पा c. (पालयति), संधृ 10, गुप् 1 P. **2** संधा 3 U, उपस्कृ 8 U. **-s.** मिष्टं, मोदकः, संधितं, उपस्करः, व्यंजनं. **-ation,** *s.* रक्षा, संरक्षणं, पालनं, गुप्ति *f.*, क्षेमः. **-ative,** *a.* संरक्षक, पालक. **2** नवविद्वेषिन्, स्थितिपालक. **-ator,** *s.* रक्षकः, पालकः. **-atory,** *s.* रक्षास्थानं, आधारः, रक्षणस्थानं-शाला.

Consider, *v. t.* विचर् c., विमृश् 6 P, आ-समा-पर्या-लोच् 10, वि-सं-चिंत् 10, समीक्ष् 1 A, (न धर्मवृद्धेषु वयः समीक्ष्यते K. v. 16); ध्यै 1 P, संदृश् 1 A, अवधृ 10, अवेक्ष् **2** मन् 4 A, संभू c., तर्क् 10, समर्थ् 10, विगण् 10, आकल् 10, (स्पर्शमपि पावनमापालयंति Ka. 108). **3** परीक्ष्, निरूप् 10, अवेक्ष्, अनुसंधा 3 U, वि-विच् 3, 7 U. **4** पूज् 10, अर्च् 10, मन् c., प्रत्युपकृ; सं परि-तुष् c. **-able,** *a.* अस्तोक, गुरु, अनल्प, प्रचुर, भूरि, महत्. **2** मान्य, आर्य, पूज्य. **-ably,** *adv.* अतीव, भूरि, अति-सु-pr., भृशं, अनल्पं, अत्यंतं. **-ate,** *a.* समीक्ष्य-विमृश्य-कारिन्. **2** कृतावधान; आदृत, दत्तादर, अप्रमत्त, अवहित. **-ately,** *adv.* समीक्ष्य, विमृश्य, अवेक्षया, अप्रमत्तं, अवधानतः, सावधानं. **-ation,** *s.* विचारः, विचारणा, आलोचना, विमर्शः, समीक्षा, चिंता. **2** विवेचनं, निरूपणं, चर्चा, परीक्षणं. **3** आदरः, अपेक्षा, अवेक्षा. **4** कारणं, निमित्तं, हेतुः. **5** गौरवं, गुरुता, प्रतिष्ठा. **6** पूजा, संभावना, आदरः. **7** प्रतिफलं, पारितोषिकं; 'in c. of' अपेक्षया in comp., समीक्ष्य, आलोच्य, विचार्य, प्रथममिति प्रेक्ष्य भगवतैकापराधो मर्षयितव्यः (S. 1) 'in c. of its being the first' &c.

Consign, *v. t.* निक्षिप् 6 P, न्यस् 4 U, दा 3 U, 1 P, ऋ c. (अर्पयति), प्रतिपद् c., 'c. to the flames' अग्निसात्कृ 8 U. **2** उप-प्र-विनियुज् 7 A, 10. **-ment,** *s.* अर्पणं, न्यसनं, प्रतिपादनं.

Consist, *v. i.* (of, in) Ex. by रूप, आत्मक, मय (यी *f.*) in comp.; 'Ojas c. s in abundance of compounds' समासभूयस्त्वरूपं-स्त्वं नाम ओजः; 'body's ornament c. s in true knowledge' सत्यज्ञानात्मकं शरीरभूषणं; *See* **Compose** **2** संवृत् 1 A, संस्था-संभू 1 P. **-ence,** *s.* घनता, सांद्रता, श्यानता. **2** स्थिरता, दृढता. **3** अविरोधः, आनुरूप्यं. **-ency,** *s.* संगतता, संवादः, अविरोधः, आनुरूप्यं. **2** स्थिरता, अचापल्यं **-ent,** *a.* अविरुद्ध, सदृश (शी *f.*), योग्य, अनुरूप, संवादिन्; 'his conduct is c. with his words' तस्याचरणं (कर्म) वचसा न विवदते, वचसो न विरुद्धं, वचसा न विसंवदति; 'in -c.' विसंवादिन्, विरुद्ध; (परार्थमुद्यमभृतः) स्वार्थाविरोधेन (Bh. i. 74) 'c. ly with their own interests.' **2** स्थिर, अचपल, अलोल. **3** दृढ, घन, सांद्र, श्यान. **-ently,** *adv.* अविरुद्धं, अविरोधेन, अनुसारतः. **-ing,** *a.* Ex. by मय (यी *f.*), आत्मक (आत्मिका *f.*) in comp.; 'c. for the most part' ex. by भूयिष्ठ affixed; 'assembly c. of learned men' अभिरूपभूयिष्ठा परिषद् (S. 1).

Consistory, *s.* पुरोहितसभा.

Consociate, *See* **Associate.**

Console, *v. t.* आ-समा-श्वस् c., सां(शां)त्व् 10, विनुद् c., अभ्युपपद् 4 A, (रतिमभ्युपपत्तुमातुरां K. iv. 25). **2** शोकमपहृ 1 P, सुस्थ-प्रकृतिस्थ-*a.* कृ 8 U. **-ation,** *s.* आश्वासः-सनं, सांत्वनं, विनोदनं, समाश्वासनं **-atory,** *a.* सांत्वनशील, आश्वासिन्, शोकापहारक, शांतिद, सुखावह. **-er,** *s.* आश्वासकः, विनोदकः.

Consolidate, *v. t.* संहन् 2 P, एकीकृ 8 U, घनीकृ, संस्था c. (स्थापयति). **-v. i.** घनीभू, स्थिरीभू, संहन् pass. **-ion,** *s.* घनीकरणं-

भवनं, संहति *f.*, संस्थापनं, समाहरणं, एकीकरणं.

Consonant, *s.* व्यंजनं; 'conjunct c.' संयोगः, योगः. **-a.** अविरुद्ध, अनुसारिन्, अनुरूप, योग्य, अनुगुण. **-ly,** *adv.* अनुसारेण, अनुरूपं. **-Consonance,** *s.* अविरोधः, अनुसारः, अनुरोधः, आनुरूप्यं.

Consonous, *a.* एकताल, एकस्वर.

Consort, *s.* Husband or wife, q. v. **2** सहवासिन् *m.*, संगिन् *m.* **-v. i.** सह वस् or चर् 1 P; संगम् 1 A, संयुज् pass.; 'well c. ed' सुसंगत. **-ion,** *s.* साहित्यं, साहचर्यं, संसर्गः.

Conspectus, *s.* सारपत्रं, संक्षिप्तलेखः.

Conspicuous, *a.* व्यक्त, सुप्रकाश, सुस्पष्ट, पुरःस्फुरत् (ती-न्ती *f.*), प्रत्यक्ष. **2** उत्कृष्ट, निरतिशय, प्रमुख, विशिष्ट. **-ly,** *adv.* स्पष्टं, व्यक्तं; विशिष्टतया. **-ness,** *s.* व्यक्तता, स्पष्टता, विशिष्टता, उत्कृष्टता.

Conspire, *v. i.* उपजप् 1 P, कूटं रच् 10, कुसाहित्यं कृ 8 U, कूटार्थं संशप् 1 U. **2** संमिल् 6 P, अनुकूल *a.* भू; "all things c.-ed to make him happy' सर्वं तस्य सुखायाकल्पत-अभवत्. **-acy,** *s.* उपजापः, कपटप्रबंधः, कुसाहित्यं, कुमंत्रणा; 'c. against the king' राजद्रोहः, द्रोहः. **-ator,** *s.* उपजापकः, कुसंसर्गिन् *m.*; संशप्तकः, शपथबद्धः. **2** राजद्रोहिन् *m.* **3** विश्वासघातकः.

Constable, *s.* दंड-यष्टि-धरः; राजपुरुषः.

Constant, *a.* स्थिर, दृढ, अचल, निश्चल. **2** शाश्वत (ती *f.*), सतत, प्रसक्त, आवरत, अनवरत, नित्य, सनातन (नी *f.*), निरंतर; 'c. wife' सती, पतिव्रता. **-ly,** *adv.* सततं, अनवरतं, अविरतं, अभीक्ष्णं, नित्यं, अनिशं, अजस्रं, सर्वदा, सर्वकालं. **-Constancy,** *s.* स्थैर्यं, स्थिरता, निश्चलता, दृढता. **2** अभिनिवेशः, निर्बंधः. **3** सातत्यं, अविरामः, नैरंतर्यं. **4** दृढा भक्तिः, दृढसौहृदं.

Constellation, *s.* राशिः, राशिनक्षत्रं; तारासमूहः, भगणः.

Consternation, *s.* संत्रासः, भीति *f.*, व्याकुलत्वं, साध्वसं, उद्वेगः, संभ्रमः.

Constipate, *v. t.* अवरुध् 7 U, अवष्टंभ् 9 P, बंध् 9 P, पिनह् 4 P **2** निबिडीकृ 8 U. **-ion,** *s.* मलावरोधः, मलावष्टंभः, विड्ग्रहः, गुदग्रहः, बद्धकोष्ठः.

Constitute, *v. t.* रच् 10, निर्मा 3 A, विधा 3 U; gen. ex. by आत्मक, रूप, मय (यी *f.*) in comp., or by भू 1 P, अस् 2 P; 'we c. thy army' तव सैन्यं वयं स्मः; 'what c. s greatness' माहेमा केन जायते; *See* **Compose. 2** संस्था c. (स्थापयति), प्रतिष्ठा c.; नियुज् 7 A. 10, समादिश् 6 P. **-ion,** *s.* रचना, घटना, निर्माणं. **2** अवस्था, दशा, रूपं, वृत्ति *f.*; भावः. **3** व्यवस्था; विधियंत्रणं, नियमः. **4** राजनीति *f.* राज्यव्यवस्था. **5** प्रकृति *f.*, स्वभावः, शरीरावस्था; जन्मप्रकृति-स्वभावः; 'of a sickly c.' जन्मरोगिन्, अशक्त, प्रकृतिदुर्बल. **-ional,** *a.* विध्यनुसारिन्, व्यवस्थानुरूप. **2** प्रकृति in comp. **-ionally,** *adv.* विध्यनुसारेण, व्यवस्थानुपूर्वं. **-Constituent,** *a.* घटक, रचक; 'c. parts' घटकावयवाः, घटकाः, अंगानि. **2** वास्तव (वी *f.*), सारभूत; 'c. members of a state' राज्यांगानि. **-s.** Ex. by *a.* **2** नियोजकः.

Constrain, *v. t.* बलात्कृ c., प्रवृत् c., प्रेर् c.; gen. ex. by causal of verbs; *See* **Compel. 2** नि-अव्-रुध् 7 U, नियंत्र् 10, नि-सं-यम् 1 P; 'c. ed silence' बलाद्धृतं मौनं; 'c. ed to be silent' नियंत्रितवाक्, यंत्रितकथ. **-Constraint,** *s.* बलं, बलात्कारः; 'by c.' बलात्, बलेन, अनिच्छत् *a.*, प्रसह्य. **2** अवश्यकता. **3** यंत्रणा, निरोधः, अवरोधः; 'c. of modesty' ह्रीयंत्रणा.

Constrict, *v. t.* संकुच् 1 P, आकुंच् c., संहृ 1 P. **-ion,** *s.* संकोचः, आकुंचनं, संहरणं.

Constringe, *v. t.* *See* **Constrict.**

Construct, *v. t.* निर्मा 3 A, 2 P, or c. (मापयति), रच् 10, विधा 3 U, घट् c. (घटयति), प्रकल्प् c. कृ 8 U. **-ion,** *s.* रचना, निर्माणं, विधानं, &c. **2** अन्वयः, संबंधः, पदयोजना-नं. **3** अर्थः, आशयः; 'do not put a bad c. upon his words' तस्य वचसि दुराशयं मा कल्पय-आरोपय. **-ive,** *a.* निर्मातृ, प्रकल्पक, निर्माण or विधान in comp.; निर्माणचातुर्यं 'c. skill' &c.

Construe, *v. t.* अन्वयं कथ् 10, अर्थं व्याख्या 2 P, युज् 10; तत्परतयैव वेदांतवाक्यानि योजयंति (S. B. 91) 'c. as referring to it'; 'to be c. ed' संबंध् pass., (इदं पदमेवं न संबध्यते).

Constupration, *s.* कन्यादूषणं, धर्षणं, बलात्काराभिगमः.

Consubstantial, *a.* एकशरीर. एकमूर्ति.

Consult, *v.* संमंत्र् 10 A, संवद् 1 P or c., संभाष् 1 A **2** विमृश् 6 P, चिंत् 10, विचर् c.; 'you must c. public good also' जनहितमपि तावत् त्वया मनसि कार्यमेव-अवेक्षणीयं; 'do not c. your private good' स्वहितपरायणो मा भूः; 'let astrologers be c. ed' सांवत्सरिकैः संवाद्यताम्; 'you have given this order, having c. ed (with) my very heart' मम हृदयेन सह संमंत्र्यादिष्टवानसि (Mu. 1); 'c. with oneself' मनसा विचर् c., आत्मगतं चिंत्. **3** निरूप् 10, समीक्ष् 1 A, आ-पर्या-लोच् 10; 'in c.-

ing a horoscope' जन्मपत्रिकां विमृशन्, पत्रिकावलोकनेन शुभाशुभं पर्यालोचयन्. **-ation,** *s.* मंत्रणा-णं, विचारणं; विमर्शः, विचारः; आलोचनं, संवादः; 'private c.' गूढमंत्रणं. **-ative,** *a.* संमंत्र्य; मंत्रणयोग्य.

Consume, *v. t.* क्षै c. (क्षपयति), विनश् c.; 'c. by fire' निर्दह् 1 P. **2** उपयुज् 7 A; 10, उपयुज्य उपभुज्य निरवशेषीकृ 8 U. **-v. i.** क्षि pass., नश् 4 P, अवसद् 1 P, परिहा pass. **-er,** *s.* नाशकः; विनियोजकः. **-Consumption,** *s.* क्षयः, शोषः, यक्ष्मन् *m.* **2** नाशः, क्षयः, अवसादः. **3** उपयोगः, उपभोगः, व्ययः, विनियोगः. **-Consumptive,** *a.* क्षयिन्-क्षयरोगिन्.

Consummate, *v. t.* समाप् c.; *See* **Complete. -a.** संपूर्ण, निखिल, अन्यून. **2** परम, उत्कृष्ट, अग्रणीः; 'a c. rogue' शठाग्रणीः. **-ion,** *s.* समापनं, निष्पत्ति *f.*, सिद्धि *f.* **2** उत्कर्षः, परमा गतिः.

Contact, *s.* सं-,स्पर्शः, संपर्कः, संसर्गः, संयोगः, आसंगः, व्यतिकरः, परामर्शः; 'in close bodily c.' अंगांगि *ind.*

Contagion, *s.* स्पर्शः, स्पर्शसंचारः. **-Contagious,** *a.* स्पर्शजन्य, स्पर्शसंचारिन्, संस्पर्शज, संपर्कीय; 'a c. disease' मारी.

Contain, *v. t.* धृ 1 P, 10, आदा 3 A, परिग्रह् 9 P, धा 3 U, भृ 3 U; 'c. ing' ex. by धर-धारिन्-भृत् in comp.; 'c. ing water' तोयभृत्; oft. ex. by गर्भ, पूर्ण, आत्मक in comp.; अंबुगर्भः मेघः, शुकगर्भपोटरं; अमृतपूर्णं पात्रं, &c. **2** निवार् 10, संयम् 1 P, निग्रह् 9 P; 'he could not c. his great joy' गुरुः पहर्षः प्रबभूव नात्मनि (R. III. 17). **-ed,** *a.* धृत, अंतर्गत, अंतर्भूत, अंतर्गणित; वर्तिन्, स्थ in comp. **-er,** *s.* आधारः, धारिन्-भृत् in comp.; 'the relation between c. and contained' आधाराधेयभावः.

Contaminate, *v. t.* दुष् c. (दूषयति), लिप् 6 P, कलंकयति-मलिनयति (D.). **-ed,** *a.* भ्रष्ट, दूषित, कलंकित, अपवित्र. **-ion,** *s.* दूषणं, कलंकः; अशौचं, भ्रष्टता, भ्रंशकारणं.

Contemn, *v. t.* अवमन् 4 A, अवज्ञा 9 U, अवधीर् 10 A, तिरस्कृ 8 U, अवगण् 10, न आदृ 6 A, उपेक्ष् 1 A, लघूकृ, तृणाय मन्, परिभू 1 P. **-er,** *s.* अवमंतृ *m.*, तिरस्कर्तृ *m.* **-Contempt,** *s.* अवज्ञा, अवमानः-मानना, अवधीरणा, तिरस्कारः, अवगणना, अनादरः, परिभवः, उपेक्षा, अवहेलनं-ना. **-ible,** *a.* अवमंतव्य, तिरस्कार्य. **2** क्षुद्र, निकृष्ट, नीच; 'to make oneself c.' आत्मानं तिरस्कारास्पदं कृ, अवज्ञाभाजनं भू. **-uous,** *a.* अवमानिन्, उपेक्षक, परिभाविन्, परिभावुक (की *f.*); सावज्ञ, सावमान. **-uously,** *adv.* सावज्ञं, सावमानं, उपेक्षया, सतिरस्कारं.

Contemplate, *v.* चिंत् 10; ध्यै 1 P; मनसा विचर् c., विमृश् 6 P. **2** निरूप् 10, निर्वर्ण् 10, अवेक्ष् 1 A, संदृश् 1 A, आलोच् 10, आलोक् 1 A, 10. **3** संक्लृप् c., भू c. **-ion,** *s.* ध्यानं, चिंता, भावना, आलोचनं, विचारणा, विमर्शः; 'to be or have in c.' अभिप्र-इ 2 P, उद्दिश् 6 P. **-ive,** *a.* ध्यानपर, चिंताशील, & sim. comp.; भावितात्मन्, चिंताविष्ट, समाधिस्थ. **-or,** *s.* ध्यातृ *m.*

Contemporary, *a.* or *s.* समकालीन, एककालीन, समानकालः.

Contend, *v. i.* संयत् 1 A, विग्रह् 9 P, कलहायते (D.), विरुध् 7 U, प्रतिकृ 8 U, विवद् 1 A, युध् 4 A, स्पर्ध् 1 A. **2** वाग्युद्धं कृ, प्रत्यवस्था 1 A, (अत्रापरे प्रत्यवतिष्ठंते S. B. 57). **3** यत्-चेष्ट् 1 A. **-er,** *s.* विपक्षः, प्रतियोद्धृ *m.*, विवादिन् *m.*, प्रतियोगिन् *m.*, प्रतिपक्षः. **-ing,** *a.* विरोधिन्; विवदमान, कलहशील. **-Contention,** *s.* विवादः, विग्रहः, कलहः, कलिः. विप्रतिपत्ति *f.*, वाग्युद्ध-विप्रलापः; point (bone) of c.; विवादविषयः-वस्तु *n.* **2** संघर्षः, स्पर्धा. **-Contentious,** *a.* कलहप्रिय, विवादिन्, विरोधिन्, कलह-विवादशील.

Content, *a.* सं-,परि-,तुष्ट, तृप्त, निःस्पृह, वितृष्ण, प्रीत, प्रशांत, हृष्ट; 'to be c.' तुष् 4 P, तृप् 4 P, संपरि-°; 'is c. with even little' स्वल्पकेनापि तुष्यति; 'poor and c. is rich and rich enough' संतोष एव पुरुषस्य परं निधानं. **-v. t.** तुष् c., तृप् c., सं-परि-°, नंद् c., प्री 9 P; 'c. s the eyes' कृतार्थयति चक्षुः. **-s.,** **-ment,** *s.* सं,-परि,-तोषः, तृप्ति *f.*, प्रीति *f.*, अस्पृहा, वितृष्णा, धृति *f.*, काम' निवृत्ति *f.*; 'water to the heart's c.' प्रकामजलं. **2** (c. s) घनफलं (गोलस्य); पूरकं, अंतर्गतं; 'c. s of a letter' लेखार्थः; 'if so, I shall know its c. s' तेन ह्यस्य गृहीतार्था भवामि (V. 2); 'table of c. s' सूचीपत्रं, अनुक्रमणिका. **-ed,** *a.* तुष्ट, तृप्त, प्रीत, &c.; 'keep c.' अनुरंज् c., प्री 9 P. **-edly,** *adv.* प्रीत्या, संतोषेण, तुष्ट्या.

Conterminous, *a.* सीमावासिन्, समीपनिकट-वर्तिन्, पर्यंतस्थ.

Conterraneous, *a.* एकदेशज, सदेशज.

Contest, *v. i.* युध् 4 A, विवद् 1 A. **-v. t.** प्रतिकूलयति (D.), प्रति-वि-रुध् 7 U; *See* **Contend. -s.** कलहः, कलिः, विवादः, वाग्युद्धं, विप्रलापः, विप्रतिपत्ति *f.*, 'subject of c.' वादबीजं, विवादास्पदं, वादविषयः. **-ed,** *a.* वादग्रस्त, वादविषयीभूत; 'un-c. possession' अपरवोज्झितो भोगः (V. M. 11).

Context, *s.* अन्वयः संदर्भः, संबंधः, प्रकरणं (S. B.); प्राज्ञस्यहि प्रकरणं वर्तते &c. **-a.**

सान्द्रीकृत, संधित, संयुक्त. **-ure,** *s.* संस्थिति, *f.*, विन्यासः.

Contiguity, *s.* संश्लिष्टर्धः, सन्निधिः, सन्निधानं, समीपता, नैकट्यं. **-Contiguous,** *a.* सन्निकृष्ट, समीप, सन्निहित, संलग्न, आसन्न, समीपस्थ, समीप-निकट-वर्तिन्; 'c. ground' पर्यंतभूमि *f.*, परिसरः. **-ly,** *adv.* समीपे-पे, सन्निकृष्टं, परिसरे.

Continent, *a.* जितेंद्रिय, संयत, संयमिन्, यत-मैथुन, ऊर्ध्वरेतस्, निगृहीतात्मन्, वशिन्, दांत. **2** परिमित. *-s.* वर्षः-र्षं ; 'c. of India' भरत-वर्षः ; महाद्वीपः-पं. **-al,** *a.* महाद्वीपीय, वर्षीय. **-Continence,** *s.* संयमः, इंद्रियनिग्रहः, दमः, जितेंद्रियत्वं, वशित्वं

Contingency, *s.* दैवयोगः-घटनं, दैवं, यदृच्छा, **2** अतर्कितोपनतः वृत्तांतः ; oft. ex. by words for 'doubtful' q. v. **-Contingent,** *a.* अनिश्चित, संदिग्ध, दैवायत्त, दैववश, आगंतुक-आपातिक (की *f.*); अतर्कितोपनत, असमर्थितोपनत. *-s.* भागः, अंशः. **2** सैन्यदलं. **-ly,** *adv.* दैवात्, दैववशात्, यदृच्छया, अतर्कितं.

Continue, *v. t.* प्रवृत् c., प्रसंज् c., प्रस्तु 2 U or c., निर्वह् c. **2** प्रतन् 8 U, दीर्घीकृ 8 U. *-v. i.* प्रवृत् 1 A; gen. ex. by आस् 2 A, स्था 1 P, with present part. or not 'cease' q. v.; 'he c. ed to quarrel' कलहं कुर्वन्नास्त, कलहं कुर्वन्न व्यरमत्. **-al, -ous,** *a.* प्रसक्त, निरंतर, अविरत, अविच्छिन्न, संतत, सतत, नित्य, सनातन, अश्रांत; 'a c. story' कथाप्रबंधः. **-ally, -ously,** *adv.* नित्यं, सर्वदा, सततं, अनवरतं, अविश्रांतं, &c. **-ance, -ation, -ity,** *s.* प्रबंधः, प्रसक्तिः *f.*, अविरामः, अविच्छेदः, सातत्यं, संतानं, अनुबंधः ; 'c. of sorrow' शोकानुबंधः ; 'c. in life' स्थितिः *f.*, अवस्थानं, जीवितं ; 'continuation (of a story)' शेषः, उत्तरभागः-खंडः. परिशेषः ; श्रेणिः, अनुक्रमः. **-ator,** *s.* प्रवर्तकः, निर्वाहकः, उत्तरसाधकः.

Contort, *v. t.* आकुंच् c., वक्रीकृ 8 U, कुटिलीकृ ; 'having the features c. ed' विकृताकारः. **-ion,** *s.* आकुंचनं, वक्रता, वैरूप्यं, विकृतिः *f.*

Contour, *s.* आकारः, रूपं. **2** परि(री)णाहः, परिधिः ; 'covering the c.s of the breasts' स्तनयुगपरिणाहाच्छादिन् (S I).

Contraband, *a.* नि-प्रति-विरुद्ध ; धर्मविरुद्ध.

Contract, *v. t.* संकुच् 1 P. संकोचनी 1 P, आकुंच् c.; संहृ 1 P, समाकृष् 1 P, संक्षिप् 6 P, संपीड् 10 -हस् 'the body being c. ed through fear' भयसंपिंडितांगत्वात् (Ka. 34); 'c. ing the eye' अक्षिसंकोचेन. **2** अभिगम् 1 P, उपगम्; 'I c. ed friendship with him' तेन सह मित्रत्वं उपगतः, सख्यमवधां; 'c. acquaintance' परिचयं कृ; 'c. debt' ऋणं कृ, ऋणग्रस्त *a.* भू; 'c. a disease' व्याधिना अभिभू pass.; 'c. marriage' विवाहं कृ, दारान्परिग्रहं 9 P. *-v. i.* आ-सं-कुच pass., संकोचं, या-इ-गम्, संह-संपीड्-संक्षिप् pass. **2** समर्पं कृ 8 U, पर्ण-संविदं कृ, प्रतिपद् 4 A, संविद् 2 P. *-s.* समय, संविद् *f.*, नियमः, पणः, अभ्युपगमः; 'written c.' नियमपत्रं; 'a sale c.' क्रयपत्रं; 'marriage c.' वाग्दानं, वाग्निश्चयः. **-ed,** *a.* आकुंचित, संक्षिप्त, संहृत.संपीडित. **2** संकट, नियत, संबाध. **-ion,** *s.* संकोचः-चनं, आकुंचनं, समाकर्षः, संपीडनं, संवृत्ति *f.* **2** संक्षेपः-पणं. **-or,** *s.* कृतसंविद् *m.*, नियमकृत् *m.*, पणकर्तृ *m.*

Contradict, *v. t.* विरुध् 7 U, प्रति-नि-षिध्, 1 P, प्रत्याख्या 2 P, पराहन् 2 P, प्रतीपायते (D.); 'c. oneself' विप्रबंद् 1 U, विसंवद् 1 P. **-ion,** *s.* विरोधः, प्रतिषेधः, प्रत्याख्यानं, विपक्षता, प्रतिबंधः, प्रतिकूलता. **2** प्रतिवादः, वचनविरोधः. **3** विलापः. विरोधोक्ति *f.* 4 असंगतिः *f.*, विसंवादः, विरुद्धता. **-ory,** *a.* विरुद्ध, विरोधिन्, विपरीत, विरुद्धार्थ, प्रतीप, विसंवादिन्; परस्परविरुद्ध-विरोधिन्. **2** परस्परपराहत, संकुल, क्लिष्ट.

Contradistinguish, *v. t.* विरुद्धगुणैः विशिष् 7 P, or c. **-Contradistinction,** *s.* विपरीतता, व्यतिरेकः, विपक्षता.

Contraposition, *s.* संमुखस्थितिः *f.*; प्रतिष्ठापनं.

Contrary, *a.* (in direction) संमुखागत, प्रतीप, gen. ex. by प्रति pr.; 'c. wind' प्रतिवातः, प्रतीपपवनः. **2** प्रतिकूल, विरोधिन्, प्रति-वि-लोम, प्रतीप, विपरीत, विरुद्ध, विपक्ष, वैरिन्; oft. by इतर in comp.; 'the c. of true' सत्येतर. *-s.* विपर्ययः, विपरीतं, विपर्यासः, व्यतिक्रमः. **2** प्रतिपक्षः, 'c.-wise,' 'on the c.' प्रत्युत, पुनः, परंतु ; 'to the c.' विपरीततया. *-adv.* **-ly,** *-adv.* विपरीतं, विरुद्धं, प्रतिकूलं; 'c. to usage' आचारविरुद्धं, &c. **-Contrariety,** *s.* वैपरीत्यं, विरोधः, विपर्ययः, प्रतिकूलता, विपक्षता, व्यत्ययः, व्यतिक्रमः.

Contrast, *v. t.* अंतरं-भेदं-दृश् c. or वर्ण् 10, परस्परविपर्ययेण उपमा 3 A. *-v. i.* विपर्यस् 4 P; विरुद्ध pass., विरुद्ध *a.* भू 1 P. *-s.* अंतरं, भेदः, विशेषः; oft. by क-क; क कंदमूलफलाशी शांतो मुनिजनः कार्यं रागप्रायः प्रपंचः (Ka. 151). **2** विरोधः, प्रतिपक्षता, व्यतिरेकः, व्यत्ययः, वैलक्षण्यं.

Contravallation, *s.* परिखा, प्रतिकूपः.

Contravene, *v. t.* प्रति-वि-रुध् 7 U, व्याहन् 2 P, निषिध् 1 P; *See* **Oppose.** **-Contravention,** *s.* व्याघातः, निषेधः; वि-प्रतिरोधः, प्रतिबंधः.

Contretemps, *s.* उपप्लवः, व्यसनं, अंतरायः, प्रत्यूहः.

Contribute, *v. t.* स्वं स्वं अंशं दा 3 U. **2** (to) उपकृ 8 U, प्रवृध् c., कल्प् 1 A, (with dat.); *See* **Conduce.** **-ary,** *a.* एकराजाधीन. **2** प्रवर्धकः, पोषकः. **-ion,** *s.* अंशभाग-दानं. **2** अंशः, भागः, वृत्तांशः, उद्धारः. **-or,** *s.* अंशदातृ *m.* **2** साहाय्यकारिन् *m.*, उपकर्तृ *m.*, प्रवर्धकः.

Contrite, *a.* अनुशोकार्त, अनुशयपीडित, जातानुताप. **-ion,** *s.* पश्चात्तापः, अनुशयः, अनुतापः. **-ly,** *adv.* सानुशयं.

Contrive, *v. t.* चिंत् 10, निश्चि 5 U, निर्णी 1 P, उच्च् c., कल्प् c., युज् 7 U, 10, निरूप् 10, घट् c. (घटयति), संप्रधृ 10, विधा 3 U. *-v. i.* उपायं चिंत्, उपायं युज्. **-ance,** *s.* उपायः, प्रयुक्ति *f.*, साधनं, कल्पना, योजना, अप-व्यप-देशः, उपायचिंतनं,-क्लृप्ति *f.* **-er,** *s.* उपायज्ञः, उपायचिंतकः.

Control, *v. t.* यम् 1 P, सं-नि-°, दम् c. (दमयति), वश् नी 1 P, जि 1 P, आवृ 5 U, वशीकृ 8 U, नि-चिनि-ग्रह् 9 P, (passions &c.); निरुध् 7 U. **2** शास् 2 P, ईश् 2 A, (gen.); कथंचिदीशा मनसां बभूवुः (K. III. 34); 'could hardly c. their mind'; निगृह् 10 ; 'un-c. ed speech' अनियंत्रिता वाणी; 'un-c. ed weeping' निर्गलः प्रलापाः; 'with passions c. ed' जितेंद्रियः, संयमी, वशी. *-s.* संयमः, निग्रहः, निरोधः, नियंत्रणा, दमनं, 'self-c.' आत्मसंयमः, निग्रहः, इंद्रियजयः, वशित्वं. **2** अधिकारः, वशः, प्रभुत्वं; 'under the king's c.' राजाधीन, नृपायत्त; 'mental c.' अंतर्यमनं, मनोदंडः. **-ler,** *s.* शास्तृ *m.*, अध्यक्षः, अधिकारिन् *m.*, अधिष्ठातृ *m.*, ईशः, प्रभुः.

Controversy, *s.* वादः, विचारः, विवादः, वादानुवादः, विप्रतिपत्ति *f.*, वितर्कः, वादयुद्धं, हेतुवादः. **-al,** *a.* विवादसंबंधिन्, वितर्किन्, (*s.*) in comp. **-alist,** *s.* वादिन् *m.*, तार्किन् *m.*, तार्किकः.

Controvert, *v. t.* प्रत्याख्या 2 P, अधरीकृ 8 U, निरस् 4 U, निराकृ, खंड् 10. **2** विवद् 1 A, विचर् c. **-ed,** *a.* वादग्रस्त, विवादविषयीभूत. **-ist,** *s.* वादिन् *m.*, नैयायिकः, विवादकृत् *m.*, तार्किकः.

Contumacious, *a.* धृष्ट, दुर्विनीत, दृप्त, सगर्व. **2** प्रतीप, प्रतिकूल, दुःशील. **-ly,** *adv.* सगर्वं, धृष्टवत्. **-Contumacy,** *s.* धृष्टता, दुर्विनीतता; प्रतीपता, दुःशीलता.

Contumely, *s.* अवज्ञा, निष्ठुर-परुष-वचनं, निष्ठुरता, निंदा, तिरस्कारः, अवमानना. **-ous,** *a.* परुष, निष्ठुर, निंदक, अवमानिन्. **2** सावज्ञ.

Contuse, *v. t.* घृष् 9 P, क्षुद् 7 U, पिष् 7 P, क्षण् 8 P, चूर्ण् 10. **-ion,** *s.* मर्दनं, निष्पेषः, क्षतं.

Conundrum, *s.* प्रहेलिका, प्रवल्हिका.

Convalescence, *s.* स्वास्थ्यं, निरामयः, रोगोपशमः, प्रकृतिलाभः. **-Convalescent,** *a.* निरामय, वीतरोग, प्रकृतिस्थ, नीरुज.

Convene, *v. t.* समाहे 1 P, साह्वानं एकत्र कृ 8 U, समानी 1 P; *See* **Assemble.** *-v. i.* संमिल् 6 P, सं-इ 2 P, एकत्र भू.

Convenience, *s.* सुखं, सोपकारत्वं, सुस्थता. **2** योग्यता, पात्रता; उचितसाधनं. **3** अवसरः, अवकाशः; 'in c. ed by the shutting of the lotus' अंभोजविनिमीलनदुःस्थितः (Rat. 2); 'when it suits your c.' यथावसरं, अवसरं प्राप्य, कार्यातरांतरायमंतरेण. **-Convenient,** *a.* सुखकारक; उचित, अनुकूल, उपयुक्त; 'c. building' उचितसाधनयुक्तं भवनं; उपपन्न, यथाकामं, यथारुचि, यथोचित. **-ly,** *adv.* युक्तं, यथासुखं, यथावकाशं, यथावसरं; 'when may I c. ly see you' अन्यकार्यातिपातमंतरेण-कार्यांतरविरोधेन-भवान् कदा मया द्रष्टव्यः.

Convent, *s.* मठः, विहारः.

Conventicle, *s.* सभा, समाजः, मेलकः. **2** गूढसभा.

Convention, *s.* समयः, संविद् *f.*, नियमः, संकेतः. **2** सभा, संसद् *f.* **3** रूढि *f.*, लोकसंमति *f.*, आचारः. **-al,** *a.* लौकिक (की *f.*), लोकसंमत, निरूढ, रूढ, सांकेतिक (की *f.*); 'c. usage' जनरूढिः, लोकाचारः. **-alism,** *s.* रूढि *f.*, आचारविधिः, *m.*

Converge, *n. v.* सं-नि-पत् 1 P, एकस्थानं-एककेंद्रं-प्रति-या 2 P, (with loc.), पंथानः सिद्धिहेतवस्त्वय्येव निपतंति (R. x. 26); 'c. to thee alone.' **-ence,** *s.* समवायः, संनिपातः. **-ent,** *a.* एककेंद्राभिमुख (खी *f.*), संनिपातिन्.

Converse, *v. i.* सं-आ-लप् 1 P, संभाष् 1 A, संवद् 1 P, संवच् 2 P. **2** संसर्गं कृ 8 U, संवस् 1 P, संगम् 1 A, संव्यवह 1 P. *-s.* संलापः, संकथा, संभाषणं, संवादः. **2** संसर्गः, व्यवहारः, संगमः. **3** विपर्ययः, विपरीतं, व्यत्यासः, व्यतिक्रमः. **-ant,** *a.* निपुण, चतुर, कुशल, विचक्षण, अभिज्ञ; कोविद, ज्ञ, विद् in comp.; पटु, विशारद; 'c. with law स्मृतिज्ञः; 'not c. with love matters' अनभ्यंतरे आर्यां मदूनगतस्य वृत्तांतस्य, (S. 3). **-ance, -ancy,** *s.* नैपुण्यं, पाटवं, चातुर्यं, निदर्शना, &c. **-ation,** *s.* आ-सं-लापः; संभाषणं, संकथा, संवादः; कथायोगः, विश्रंभालापः. **2** आचारः, व्यवहारः, वृत्ति *f.* **-ly,** *adv.* विपर्ययेण, व्यतिक्रमेण, व्यत्ययेन, प्रतीपं.

Convert, *v. t.* विकृ 8 U, अन्यथा कृ, परिवृत् c.; oft. ex. by सात्; 'c. to ashes' भस्मसात्कृ; *See* **Reduce.** **2** स्वधर्म-पक्ष--मतं त्यज् c. 'to be c. ed' परधर्म-

6 U. 2 प्र-विनि-युज् 7 A, 10. 3 आलिख् 6 P, सूत्रपातं कृ. **-s.** अभिप्रायः, अर्थः, आकांक्षा, उद्देशः, संकल्पः, आशयः, हेतुः, चिकीर्षितं, प्रयोजन, कार्यं. 2 उपायः, चिंता, कल्पना, घटना, विधानं, व्यवसायः. 3 आलिखनं, सूत्रपातः, संस्कारः. **-edly,** *adv.* कामतः, यथाकामं, इच्छातः, बुद्धिपुरःसरं. **-er,** *s.* चिंतकः, परिकल्पकः. 2 आलेखकः, सूत्रपातकः. **-ing,** *a.* उपजापिन्, मायिन्, छलिन्, वंचनशील, प्रतारक, विदग्ध, कपटपटु, धूर्त. **-less,** *a.* निरर्थक, निष्प्रयोजन.

Designate, *v. t.* उप-लक्ष् 10, अप-व्यप-दिश् 6 P, निर्दिश्, सूच् 10, द्युत् c., अभिधा, 3 U, निर्वच् 2 P, गम् c. (गमयति). 2 नियुज् 7 A, 10, परि-सं-क्लृप् c. **-ing,** *s.* लक्षणं, उपलक्षणं, चिह्नं, विशेषणं, अभिधानं, संज्ञा, आख्या, नामन् *n.*

Desire, *v. t.* इष् 6 P, वांछ् 1 P, कम् 10 A, स्पृह् 10 (with dat.), इह् 1 A, आकांक्ष् 1 U, अभिलष् 1, 4 P. oft. ex. by desid. of roots. 2 अर्थ् 10A, याच् 1A, वृ 5U. **-s.** इच्छा, अभिलाषः, कामः, ईहा, आकांक्षा, समीहितं, आशा, इष्टं, ईप्सितं, मनोरथः, स्पृहा, अभीष्टं; 'according to one's d.' यथाकामं, यथेष्टं, स्वेच्छातः, स्वच्छंदं, स्वरुच्या; 'ardent d.' लालसा, औत्सुक्यं, उत्कंठा, लोभः, तृष्णा. **-able,** *a.* स्पृहणीय, काम्य. 2 इष्ट, प्रशस्त, श्रेयस्. **-ous,** *a.* सस्पृह, वांछिन्, इच्छु, ईप्सु; oft. by desid. forms, 'd. to speak' निवक्षुः, 'd. to take' जिघृक्षुः or by काम or मनस् in comp. with inf.; 'd. to take' आदातुकामः मनाः.

Desist, *v. i.* विरम् 1 P, निवृत् 1 A, विश्रम् 4 P, (with abl.) *See* **Cease.** **-ance,** *s.* विरामः, निवृत्ति *f.*, विश्रामः.

Desk, *s.* लिखनफलकः, लेखनाधारः.

Desolate, *a.* निर्मानुष (षी *f.*), निर्जन, शून्य, विविक्त, वसतिहीन, विजन. 2 उच्छिन्न, जीर्ण, उद्ध्वस्त, उत्सन्न. 3 असहाय, निराश्रय, अगतिक, अनाथ. **-v. t.** उच्छिद् 7 P, अवसद् c., निर्जनीकृ 8 U; उपपीड् 10, शून्यीकृ, प्रबाध् 1 A. **-ion,** *s.* उच्छेदः, अवसादनं, वसतिनाशः, निर्जनीकरणं. 2 शून्यता, निर्जनत्वं, विविक्तता.

Despair, *v. i.* निराश् *a.* भू 1 P, आशां हा 3 P, नैराश्यं गम्-व्रज् 1 P, विषद् 1 P, भग्नाश *a.* भू; 'd.ed. of success' जयविषये निराशीभूत. **-s.** नैराश्यं, निराशता, आशाहीनता, वैक्लव्यं, विषादः; 'being in d.' त्यक्ताश, गताश. **-Desperate,** *a.* निराश, आशातीत, त्यक्ताश, आशाहीन. 2 जीवितनिरपेक्ष, आततायिन्, निर्भय, साहसिक (की *f.*) 3 निष्प्रतीकार, उग्र, संरब्ध, साहसद्योतक, अत्यंत; 'a d. act' साहसं, आततायिता. **-ly,** *adv.* जीवितनिरपेक्षं, प्रसह्य, उग्रं, उन्मत्तवत्. 2 अति-सु pr.; अत्यंतं, भृशं. **-ness,** साहसिकता, उन्मादः, सरंभः जीवितनिरपेक्षता.

Despatch, *v. t.* (सत्वरं) प्रेष् c., प्रहि 5 P, प्रस्था c. (स्थापयति), विसृज् 6 P. 2 शीघ्रं, झटिति संपद् c., त्वर् c. (त्वरयति), आशु संविधा 3 U. 3 हन् 2 U, व्यापद् c.; *See* **Kill.** **-s.** त्वरा, शीघ्रता, शीघ्रकारित्वं, अदीर्घसूत्रता. 2 पत्रं, राजलेखः-लेख्यं, वाचिकपत्रं. 3 धावकः, प्रजविन् *m.*, वाताहरः, दूतः. **-ful,** *a.* त्वराशील, शीघ्रकारिन्, अविलंबिन्, अदीर्घसूत्र.

Desperado, *s.* साहसिकः, प्रसह्यचोरः, साहसिन् *m.*, आततायिन् *m.*, वधोद्यतः.

Despise, *v. t.* अवज्ञा 9 U, तिरस्कृ 8 U, अवमन् 4 A, परिभू 1 P, अवधीर् 10; *See* **Contemn.** **-er,** *s.* अवमंतृ *m.*, अवज्ञातृ *m.*, निंदकः. **-ingly,** *adv* सावज्ञं, सावमानं. **-Despicable,** *a.* अवमान्य, अवज्ञेय, गर्ह्य, निंद्य, नीच, निकृष्ट, अधम, तुच्छ, कुत्सित, क्षुद्र.

Despite, *s.* द्वेषः, जुगुप्सा, मात्सर्यं, ईर्ष्या, अभ्यसूया, असूया. 2 प्रतिरोधः, प्रतिकारः; 'in d. of' (prep.) अनादृत्य, अवगणय्य, or gen. abs.; 'd. the (presence of the) teacher' पश्यतोपि गुरोः; *See* 'in spite of' under **Spite.** **-ful,** *a.* द्वेषिन्, सासूय, अभ्यसूयक, मत्सरिन्, द्रोहबुद्धि. **-fully,** *adv.* सद्वेषं, सद्रोहं, ईर्ष्यया. **-fulness,** *s.* मात्सर्यं, असूया, दौर्जन्यं, द्रोहः, द्रोहबुद्धि *f.*

Despoil, *v. t.* हृ 1 P, अपहृ; *See* **Deprive;** 'd. ed of everything' हृतसर्वस्व. **-er,** *s.* अपहारकः. **-Despoilation,** *s.* अपहरणं.

Despond, *v. i.* निर्विद् 4 A, नैराश्यं-निर्वेदं-विषादं-गम् 1 P or आपद् 4 A, विषद् 1 P, आशां त्यज् 1 P, अंगानि मुच् 6 P. **-ency,** *s.* निर्वेदः, विषादः, नैराश्यं, उद्वेगः, अवसादः, विषण्णता. **-ent, -ing,** *a.* निर्विण्ण, विषण्ण, निराश, त्यक्ताश, म्लान, उद्विग्न; 'do not take a d. view' मा भवानंगानि मुंचतु (V. 2). **-ingly,** *adv.* सविषादं, सनिर्वेदं.

Despot, *s.* प्रजापीडकः, लोकोपप्लवकः, 2 अधीश्वरः, सम्राज् *m.*, सार्वभौमः, चक्रवर्तिन् *m.* **-ic, -ical,** *a.* स्वतंत्र, निष्प्रतिबंध, अनियंत्रण, अनियत, निर्यंत्रण. **-ically,** *adv.* स्वैरं, स्वेच्छातः, कामचारेण. **-ism,** *s.* प्रजापीडनं, निष्ठुरशासनं, प्रजोपप्लवः, स्वेच्छाचारित्वं, स्वेच्छाप्रभुत्वं; निर्यंत्रणाराज्यसरणिः *f.*

Despumate, *v. i.* उत्सिच् pass., फेनायते (D.)

Dessert, *v. t.* (भोजनांते) फलाहारः.

Destine, *v. t.* (**Destinate**) निरूप् 10, परि-प्र-क्लृप् c., निर्दिश् 6 P, नियुज् 7 A, 10,

समुपस्था 1 U, (न जाने भोक्तारं कमिह समुपस्थास्यति विधिः S. 2); oft. ex. by pot. pass. part., with or without अवश्यं, नूनं; 'he is d. ed to be a king' अनेनावश्यं राज्ञा भवितव्यं; 'man is d. ed to die' मनुष्या नश्वराः; 'who is able to avoid what is d. ed for him' लिखितमपि ललाटे प्रोज्झितुं कः समर्थः; तथा भवितव्यतया च तस्य तस्य वस्तुनः (Ka. 143) 'every thing being d. ed to occur' &c. **-ation,** *s.* ईप्सितं स्थानं, इष्टः प्रदेशः, निरूपित-निर्दिष्ट-स्थानं. **2** उपयोगः, प्रयोजनं, उद्देशः; अर्थः, अभिप्रायः. **-y,** *s.* दैवं, भवितव्यता, नियति, *f.*, भाग्यं, भागधेयं; विधातृ *m.*, विधिः, दिष्टं, अदृष्टं, नाक्तनं.

Destitute, *a.* निर्धन, अर्थहीन, निराश्रय, दुर्गत, अशरण, दीन, अकिंचन, दुःस्थित. **2** (of) हीन, रहित, वर्जित, शून्य, वियुक्त, हृत, विहीन, परिहीण, with instr. or in comp.; gen. by निर्-अ-वि- in comp.; 'd. of courage' धैर्यहीन-शून्य, &c.; निरुत्साह 'd. of energy'; 'd. of hands and feet' अपाणिपाद. **-ion,** *s.* दैन्यं, धनाभावः, अकिंचनत्वं, दारिद्र्यं, निराश्रयता. **2** हीनत्वं, राहित्यं, शून्यत्वं, अभावः, विरहः, वियोगः.

Destroy, *v. t.* नश् c., प्र-वि°; अव-उत्-सद् c., ध्वंस् c., प्र-वि°; विलुप् c., क्षै c. (क्षपयति), क्षि 5 P or c., संहृ 1 P, उत्-निर्-दल् c., उच्छिद् 7 P, प्रतिहन् 2 P. **2** (persons &c.) हन् 2 P, निषूद् 10, व्यापद् c., मृ c.; 'to be d. ed' वि-, नश् 4 P, ध्वंस् 1 A, क्षयं या-इ 2 P, or गम् 1 P, प्र-नि-ली 4 A. **-er,** *a.* नाशकः, हंतृ *m.*, निषूदनः, घातिन् *m.*, अंतकः, ध्वंसकः, हन्-अपह in comp; 'd. of Vritra' वृत्रहा, वृत्रनिषूदनः; 'd. of every thing' कृतांतः. **-Destructible.** *a.* नश्वर, विध्वंसिन्, भंगुर, क्षयिन्. **-Destruction,** *s.* नाशः, विनाशः, प्रणाशः; प्र-, वि-, ध्वंसः, क्षयः, उच्छेदः, संहारः; उद्दलनं, उत्पाटनं. **2** निषूदनं, घातः, वधः; 'd. of the whole world' प्रलयः, प्रत्यवहारः, कल्पांतः, संवर्तः. **-Destructive,** *a.* विनाशिन्, क्षयकर (री *f.*), घातिन्, अंतकर, घातुक, अपह-घ्न (घ्नी *f.*) in comp.; 'd. to life' जीवितापह, प्राणहर, निधनकारिन्.

Desuetude, *s.* विरति *f.*, निवृत्ति *f.*, विच्छेदः, विरामः, प्रवृत्तिविच्छेदः.

Desultory, *a.* असतत, उच्छृंखल, अस्थिर, लोल, अनियत, चंचल, अनवस्थित, अव्यवस्थित.

Detach, *v. t.* विश्लिष् c., विभिद् 7 P, विच्छिद् 7 P, वियुज् 7 A, 10, पृथक् कृ 8 U; *See* **Separate. -ed,** *a.* वियुक्त, विभिन्न, विच्छिन्न; असंसक्त, असंलग्न, गतसंग, विश्लिष्ट, असंगत. **-ment,** *s.* विभागः, वियोगः, विच्छेदः, विश्लेषः, विभेदः. **2** सैन्यदलं, गुल्मः-ल्मं.

Detail, *s.* विस्तरः, विस्तारः; वाग्विस्तरः, प्रपंचः. **2** वृत्तांताख्यानं; 'in d.' or 'd. ed' सविस्तर (*a.*), विस्तरेण, विस्तरतः-शः, सविस्तरं. **-v.** *t.* सविस्तरं विस्तरेण-वर्ण् 10 or आख्या 2 P. or कथ् 10, प्रपंचयति (D.).

Detain, *v. t.* धृ 1 P, निरुध् 7 U; जामातृयज्ञेन वयं निरुद्धाः (U. 1) 'd. ed by reason of' &c. **2** निवार् 10, निग्रह् 9 P. **3** (In custody) आसिध् 1 P, बंध् 9 P, निरुध्. **-Detention,** *s.* धरणं, निग्रहः, संरोधः, निरोधः. **2** आसेधः, प्रति-नि-रोधः, बंधनं, बलात्कारेण धरणं.

Detect, *v. t.* निरूप् 10, ज्ञा 9 U, अनुसंधा 3 U, अधि-अव-गम् 1 P; दृश् 1 P, उपलभ् 1 A, आसद् c. **2** धृ 1 P, प्रकाश् c., व्यंज् 7 P; 'd. ed in a crime' दृष्टदोषः; निर्णीतापराध. **-ion,** *s.* ज्ञानं, निरूपणं, अनुसंधानं, उपलंभः, अवगमनं. **-ive,** *a.* (Officer) चरः, चारः, प्रणिधिः, अपसर्पः; *See* **Spy**

Deter, *v. t.* (सभयं) निवृत् c., निवार् 10, विरम् c. (रमयति), भी c., निरुध् 7 U; *See* **Prevent. -ment,** *s.* निवर्तनं, निवारणं.

Deterge, *v. t.* शुध् c., मलं अपनी 1 P, परिमृज् 2 P. **-ent,** *a.* शोधन (नी *f.*), परिमार्जक.

Deteriorate, *v. i.* शि हा pass., -हस् 1 P, क्षयं गम् 1 P; दुष् 4 P, भ्रंश् 4 P, 1 A, अपकृष् pass. **-v.** *t.* अपकृष् 1 P, दुष् c. (दूषयति), विकृ 8 U, -हस् c. **-ion,** *s.* क्षयः, अपचयः, विकारः, विकृति *f.*, -हासः, भ्रष्टता. **2** अपकर्षः, दूषणं.

Determine, *v. t.* निश्चि 5 U, स्था c. (स्थापयति), संक्लृप् c., निरूप् 10, निर्णी 1 P, निर्-अव-धृ 10, निर्दिश् 6 P, लक्ष् 10, परिच्छिद् 7 P. **2** निरूप्, अनुसंधा 3 U, निर्णी (a dispute &c.). **-v.** *i.* व्यव-अव-सो 4 P, निश्चयं कृ 8 U; 'd. ed to go' गमने कृतसंकल्प, गंतुं व्यवसित. **-ate,** *a.* स्थिर, दृढ, निर्धारित, निश्चित, निर्णीत, नियत, सिद्ध, व्यवस्थित. **2** निश्चायक, निर्णायक. **3** (of persons) कृतनिश्चय, दृढसंकल्प, व्यवसित. **-ately,** *adv.* सनिश्चयं, सनिर्णयं, नूनं. **-ation,** *s.* निश्चयः, निर्णयः, संकल्पः, निर्धारणं, व्यवसायः, विचारः, निरूपणं, परिच्छेदः, अवधारणं-णा. **2** अभिनिवेशः, अध्यवसायः, निर्बंधः. **-ative,** *a.* निर्णायक, निर्धारक. **-ed,** *a.* निश्चित, निर्णीत, सिद्ध, नियत, व्यवस्थित, परिच्छिन्न, अवधारित. **2** (of persons) स्थिरनिश्चय, दृढ-कृतसंकल्प, अभिनिविष्ट, कृतनिश्चय. **-edly,** *adv.* स्थिरचेतसा, दृढं, दृढनिश्चयेन. **-er,** *s.* निर्णयकृत् *m.*, निर्णेतृ *m.*

Detest, *v. t.* विद्विष् 2 U, गर्ह् 1, 10 A, गुप् desid. (जुगुप्सते) (with abl.); *See* **Abhor. -able,** *a.* जुगुप्सित, गर्हित, निंद्य, गर्हणीय, विद्वेष्य. **-ation,** *s.* गर्हा, जुगुप्सा, घृणा, विद्वेषः. **-er,** *s.* द्वेषिन् *m.*, विद्वेष्टृ *m.*

Dethrone, *v. t.* राज्याद् भ्रंश् c. or च्यु c. or अवपत् c. or अवरुह् c. (रोपयति). **-ment,** *s.* राज्यभ्रंशः-च्युति *f.*

Detonate, *v. i.* सहसा स्तन् 1 P or ध्वन् 1 P. **-ion,** *s.* स्तनितं, आकस्मिकध्वनि *m.*

Detort, *See* **Pervert.**

Detract, *v.* अपकृष्-अपनी 1 P. **2** अपलप् 1 P, अपवद्-भाष् 1 A, अधिक्षिप् 6 P, निंद् 1 P, अनुपति (D.) (with dat.); मूल्यं न्यूनीकृ 8 U; लघूकृ; *See* **Depreciate. -ion,** *s.* अपकर्षः, लघूकरणं, -हासः. **2** असूया, अप-परि-वादः, आक्षेपः, गुणनिंदा, पैशून्यं, परदोषाविष्करणं, मात्सर्यं. **-or,** *s.* अपवादकः, अधिक्षेपकः, निंदकः, असूयकः, परिवादरतः. **-ory,** *a.* अपवादिन्, निंदक, अभ्यसूयक; पिशुन.

Detriment, *s.* हानि *f.*, अपकारः, क्षति *f.*, नाशः, अपायः, बाधा, विरोधः. **-al,** *a.* हानिकर (री *f.*), विरोधिन्, अपायकारक.

Detrude, *v. t.* अवपत् c., अधः क्षिप् 6 P, भ्रंश् c. **-Detrusion,** *s.* अवपातनं.

Detruncate, *v. t.* अवच्छिद् 7 P, निकृत् 6 P, वि-लू 9 U. **-ion,** *s.* अवच्छेदः, निकर्तनं.

Deuce, *s.* द्वयं, द्विकं. **2** पिशाचः, भूतः.

Devastate, *v. t.* उच्छिद् 7 P, उत्-अव-सद् c.; उपपीड् 10, वि-उप-प्लु 1 A, प्रबाध् 1 A, निर्जनीकृ 8 U. **-ion,** *s.* उच्छेदः, उपप्लवः, प्रबाधनं, विनाशः, निर्जनीकरणं.

Develop, *v. t.* पुष् 1, 4, 9 P, प्र-उप-चि 5 U, प्र-सं-वृध् c.; 'she d. ed her lovely limbs' पुपोष लावण्यमयान् विशेषान् (K. I. 25); also प्रचीयमानावयवा R. III. 7) उपचितांगी. **2** विकस् c., विस्तृ c., उद्भिद् c.; तस्य (कार्योपक्षेपस्य) विस्तारमिच्छन् (Mu. 4) 'wishing to d. it.' **-v.** *i.* प्र-उप-चि pass., उद्भिद् pass., क्रमशः विकस् 1 P, क्रमेण प्र-सं-वृध् 1 A. **-ment,** *s.* प्रचयः, उपचयः, संवर्धनं; विस्तारः, विकासः, उद्भेदः.

Devergence, *See* **Divergence.**

Deviate, *v. i.* अति-व्यति-इ 2 P, अतिक्रम् 1 U, 4 P, अति-व्यभि-चर् 1 P; 'did not d. even an inch from the beaten path' क्षुण्णाद्वर्त्मनो रेखामात्रमपि न व्यतीयुः (R. I. 17); अप-या-इ 2 P, चल् 1 P, प्र-वि-°; च्यु 1 A, भ्रंश् 4 P, 1 A, (with abl.). **-ion,** *s.* अतिक्रमः, विचलनं, च्युति *f.*, भ्रेषः, भ्रंशः, व्यभिचारः, त्यागः; 'd. from the right path' उत्पथयानं, विमार्गगमनं.

Device, *s.* उपायः, युक्ति *f.*, प्रयोगः, कल्पना, साधनं. **2** अप-व्यप-देशः, छलं, माया, छद्मन् *n.*, कैतवं, व्याजः. **3** लक्षणं, चिह्नं, अंकः. **4** निर्माणशक्ति *f.*, कल्पनाचातुर्यं.

Devil, *s.* भूतः, वेतालः, पिशाचः; 'I shall not raise a d. for my own destruction' नाहमात्मविनाशाय वेतालोत्थापनं करिष्यामि.

Devious, *a.* वक्र, कुटिल, जिह्म. **2** मर्यादातिक्रामिन्, व्यभिचारिन्.

Devise, *v.* चिंत् 10, उप-सं-कॢप् c., निरूप् 10, युज् 7 U, 10, आ-पर्या-लोच् 10, घट् c. **2** इच्छापत्रेण प्रदा 3 U. **-s.** इच्छापत्रेण रिक्थदानं. **-er,** *s.* धनाधिकारिन्, *m.* **-er,** *s.* उपायज्ञः, परिकल्पकः, प्रयोजकः.

Devoid, (of), *a.* *See* **Destitute** (of).

Devoir, *s.* स्वकर्तव्यं, कर्तव्यता, धर्मः. **2** सत्कारः, आदरः, पूजा, संमानः.

Devolve, *v. t.* निक्षिप् 6 P, न्यस् 4 P, संक्रम् c., सम्-ऋ c. (अपयति), आरुह् (रोपयति) 'having d. ed their property upon their sons' पुत्रसंक्रांतलक्ष्मीकाः (U. 1); गुणवत्सुतरोपितश्रियः (R. VIII. 11). **2** प्रपत् c., प्रसृ-प्रवह् c. **-v.** *i.* आगम् 1 P, आया 2 P, पत् 1 P, संक्रम् 1 U, 4 P; न्यस्-निक्षिप्-समृ c. pass.; 'after his death the kingdom d. ed upon his eldest son' नृपे परिगतवति ज्येष्ठपुत्रो राजपदभाग्बभूव. **2** अधः पत् 1 P, अवपत्. **-Devolution,** *s.* निक्षेपणं, समर्पणं, संक्रामणं.

Devote, *v. t.* प्र-विनि-युज् 7 A, 10, सम् ऋ c. (अर्पयति), निक्षिप् 6 P, उत्सृज् 6 P, सं-उप-क्लृप् c. **2** (Oneself to) आसंज्-अनुरंज्-pass., मनः युज् or बंध् 9 P or अभिनिविश् c., आसक्त-अभिनिविष्ट *a.* भू (all with loc.); भज् 1 U, आसेव् 1 A. **3** नाशाय कॢप् c; *See* **Doom. -ed,** *a.* सक्त, आ-प्र-व्या-सक्त; नि-, रत, अभिनिविष्ट, समाहित, पर-तत्पर-परायण in comp. **2** भक्त, दृढभक्ति, अनुरक्त, अनुरागिन्; 'd. to the king' राजनिष्ठ, नृपासक्तचित्त; 'a d. wife' एकपत्नी, पतिव्रता, साध्वी, सती, 'a d. husband' भार्यानिरतः, पत्नीसेविन् *m.* 'a d. friend' स्थिरप्रेम मित्रं, रूढसख्यः सुहृद् **-edly,** *adv* चित्तैकाग्रतया, भक्त्या, निष्ठ्या, अभिनिविष्ट, मनोभिनिवेशेन, मनोयोगेन, सुसमाहितं. **-edness,** *s* आसक्ति *f.*, भक्ति *f.*, अभिनिवेशः, परायणता. **-ee,** *s.* तापसः, यतिः, योगिन् *m.*, तपस्विन् *m.*, मुनिः, व्रतिन् *m.* **2** भक्तजनः, प्रणयिजनः, उपासकः, भक्तः. **-ion,** *s.* अभियोगः, अभिनिवेशः, अनुरागः

सेवा, उपासना, प्रसक्ति *f.*, आसक्ति *f.*, भक्तिः, निरति *f.*, परायणता. **2** नियमः, धर्मक्रिया, तपस् *n.* ईश्वरभक्ति *f.* सेवा; 'self-d.' आत्मोत्सर्गः-परित्यागः; 'd. to a husband' पातिव्रत्यं, पतिसेवा; 'to perform d. s' तपश्चर् 1 P or तप् 4 A, तपस्वति (D.). **-ional,** *a.* धर्मपर, धर्मनिष्ठ, भजनशील. **2** धर्मक्रियाविषयक, तपोमय (यी *f.*).

Devour, *v. t.* भक्ष् 10, अद् 2 P, खाद् 1 P, ग्रस् 1 A, गॄ 6 P. **2** उपयुज् 10, उपयोगेन विनश् c. **-er,** *s.* भक्षकः, खादकः.

Devout, *a.* धार्मिक, धर्म-परायणशील, धर्मनिष्ठ, धर्मात्मन्, भक्त, ईश्वरनिरत, पुण्यशील, प्रयत त्मन्, पुण्यात्मन्. **-ly,** *adv.* भक्त्या, भक्तिपूर्वकं, भक्तिपुरःसरं, श्रद्धान्वितं. **-ness,** *s.* धार्मिकता, धर्मात्मता, ईश्वरनिष्ठता, भक्ति *f.*

Dew, *s.* नीहारः, अवश्यायः, तुषारः, प्रालेयं, हिम-रात्रि-ख-जलं. **-v. t.** नीहारेण सिच् 6 P or प्रोक्ष् 1 P; 'd. drop' तुषारकणः-बिंदुः-शीकरः, and sim. comps. **-y,** *a.* तुषारमय (यी *f.*), अवश्यायावसिक्त; तुषारकणोपम.

Dexterous, *a.* कुशल, निपुण, पटु, दक्ष, लघुहस्त, करदक्ष. **-ly,** *adv.* निपुणं, दक्षतया, सपाटवं, हस्तलाघवेन. **-Dexterity,** *s* दक्षता, पटुता, नैपुण्यं, हस्तकौशलं, हस्तलाघवं.

Dextral, *a.* दक्षिण, अपसव्य, दक्षिणपार्श्वस्थ.

Diabetes, *s.* मधुमेहः, प्रमेहः, बहुमूत्ररोगः.

Diabolical, *a.* पैशाच (ची *f.*), पिशाचोपम. **2** घोर, दारुण, पापिष्ठ, अतिघोर-पाप, अतिनिंद्य.

Diacoustics, *s.* ध्वनिविद्या.

Diadem. *s.* मुकुटं, किरीटः-टं, मौलिः, उष्णीषः-षं, शिरोवेष्टनं, 'd. ed' किरीटिन्, किरीटधारिन्.

Diagnosis, *s.* रोगनिर्णयः निरूपणं, रोगनिदानं, मीमांसा, चिकित्सा.

Diagnostic, *s.* रोगलक्षणं-चिह्नं.

Diagonal, *s.* कर्णः, श्रुति *f.* **-ly,** *adv.* कोणाकोणि, कर्णाकर्णि.

Diagram, *s.* चित्रं.

Dial, *s.* शंकुयंत्रं, सूर्यघटी.

Dialect, *s.* प्राकृतभाषा, भाषा (as opposed to संस्कृत). **2** भाषणं, वचनं, उक्ति *f.*

Dialectic, *s.* तर्कः, न्यायः, हेतुविद्या, आन्वीक्षिकी विद्या. **-al,** *a.* तार्किक (की *f.*), न्यायिन्. **-ian,** *s.* तार्किकः, नैयायिकः, न्यायविद् *m.*

Dialogue, *s.* संलापः, संवादः, संकथा, संभाषणं, प्रश्नोत्तरं, कथोपकथनं. **-Dialogist,** *s.* संवादकः, उत्तरप्रत्युत्तरदायकः.

Diameter, *s.* व्यासः, विष्कंभः. **-Diametrically,** *adv.* विपरीतं, प्रतिकूलं, अत्यंतं, एकांततः.

Diamond, *s.* वज्रः-ज्रं, हीरं, हीरकः; 'd. cutter' हीरकारः-मार्जकः.

Diapason. *s.* स्वराष्टकं, स्वरग्रामः.

Diaper, *s.* चित्रितं क्षौमं. **-v. i.** क्षौमं चित्र् 10 or कर्बुरीकृ, &c.

Diaphanic, *a.* स्वच्छ, विशद; *See* **Clear.**

Diaphoretic, *a.* स्वेदन (नी *f.*), स्वेदजनक, घर्मोत्पादक; 'd. medicine' स्वेदनं.

Diaphragm, *s.* शरीरमध्यदेशः.

Diarrhœa, *a.* अतिसारः, प्रवाहिका; ग्रहणी-, रुज् *f.*

Diary, *s.* दिनपत्रिका, दैनिकवृत्तपुस्तकं.

Diatribe, *s.* अधिक्षेपः, कुत्सात्मको लेखः.

Dibble, *s.* लघुखनित्रं.

Dice, *s.* plural of **Die,** *s.* q. v.

Dictate, *v. t.* आज्ञापूर्वकं कथ् 10, आदिश् 6 P, आज्ञा c. (ज्ञापयति). **2** सूच् 10, प्रोत्साह् c., प्रचुद् 10, प्रेर् c.; 'd. ed by good motives' सदाशयप्रेरित. **-s.** आज्ञा, आदेशः, शासनं. **2** चोदनं-ना, प्रेरणं-णा. **-ion,** प्रोत्साहनं. **2** आज्ञापनं, आज्ञापूर्वकं कथनं. **-or,** *s.* एकाधिपतिः, अनन्याधीनः शास्ता, अनियंत्रणः प्रभुः. **2** आदशकः, शासितृ *m.* **-orial,** *a.* अवलिप्त; *See* **Arrogant.**

Diction, *s.* भाषा, वाणी, वाक्सरणि *f.*, वचोविन्यासः.

Dictionary, *s.* कोशः-षः, शब्दसंग्रहः; अभिधानं.

Dictum, *s.* वचनं, आदेशः, विधिः, नियमः.

Didactic,-al, *a.* उपदेशपर, प्रबोधक.

Die, *s.* अक्षः, पाशकः, देवनः; 'a loaded d.' कूटाक्षः. **-Dice,** (pl.) अक्षाः, &c. **-v. i.** अक्षैः दिव् 4 P, ग्लह् 1 P. **-er,** *s.* अक्षधूर्तः, अक्षदेविन् *m.*, धूर्तः, कितवः. **-ing,** *s.* द्यूतं, अक्षक्रीडा; 'd. board' अष्टापदं, शारिफलं; 'd. box' अक्षाधारः; 'the die is cast' कृतं दैवाधीनं (अप्रतिविधेयं) कर्म, अधुना यद्भावि तद्भवतु.

Die, *v. i.* मृ 6 A, प्राणान्-असून्-जीवितं त्यज् 1 P or उत्सृज् 6 P or हा 3 P, पंचत्वं या 2 P or गम् 1 P, उपरम् 1 P; परासु-गतासु-*a.* भू 1 P, देहं-तनुं त्यज्, प्र-इ 2 P, विपद् 4 A, संस्था 1 A, प्रमी pass. **2** विनश् 4 P, प्रली 4 A, ध्वंस् 1 A क्षि pass., अवसद् 1 P. **3** म्लै 1 P, विशॄ pass. **-Dead,** *a.* मृत, उपरत, संस्थित, प्रेत, परेत, परासु, गतासु, विपन्न, गतप्राण, विचेतन, प्राणहीन, प्रमीत. **2** निश्चल, निश्चेष्ट, जड, निस्तेजस्, निःसत्व, असार, निष्फल. **3** सुप्त, स्तब्ध (as of limbs); 'd. body' शवं, मृतशरीरं; कुणपः. 'd. language' अप्रचलिता भाषा; 'd. sleep' घोर-गाढ-निद्रा; 'd. loss' परिपूर्णा-सकला हानिः; 'd. letter' लुप्तार्थं वचनं, 'd. soul' निरभिमानः आत्मा. **-s.** (Of night) मध्यरात्रः, निशीथः, अर्धरात्रः. **2** मध्यं; *See* **Depth.** **-en,** *v. t.* दुर्बलीकृ. 8 U, शिथिलीकृ, तेजो हृ 1 P, नश् c.,

म्लानीकृ. **-v. i.** म्लै 1 P, शिथिलीभू. **-ly,** *a.* प्राणापहारक, जीवितापह, मारात्मक, निधनकारिन्, प्राणांतक, प्राणहारिन्, प्राणनाशक, जीवितघ्न (घ्नी *f.*). **2** अशाम्य; 'd. enmity' आमरणांतिकं वैरं, अशाम्यं वैरं; 'd. poison' हाला(ल)हलं विषं. **-adv.** मृतवत्; प्राणांतिकं; 'd. wounded' भिन्नमर्मन्, 'd. pale' प्रेतसवर्ण. **-ness,** *s.* दौर्बल्यं, निःसत्वता, जडत्वं, स्तंभः, वैकल्यं, निरक्ति, *f.*, शिथिलता. **-Death,** *s.* मरणं, मृत्युः, उपरमः, निधनः-नं, अंतः, पंचत्वं-ता, संस्थिति *f.*, कालधर्मः, दिष्टांतः, प्रलयः, अत्ययः, नाशः, प्राणनाशः, तनुत्यागः, &c. **2** यमः, कालः, कृतांतः. **3** वधः, घातः, व्यापादनं; 'he was pelted to d.' सलोष्ठघातं हतः; 'he was sentenced to d.' तस्य प्राणदंड आदिष्टः; 'to put to d.' हन् 2 P, व्यापद् c., वधं आदिश् 6 P; 'a violent d.' अपमृत्युः; अपघातः; 'angel of d.' यमदूतः; 'd. by fasting' प्रायः, प्रायोपवेशनं; 'd. bed' त्यु शय्या. **-less,** *a.* अमर, अनश्वर, अमर्त्य, चिरस्थायिन्.

Diet, *s.* आहारः, अन्नं, भोजनं, भक्ष्यं. **2** पथ्यं, पथ्यान्नं., पथ्याशित्वं. **3** राजसभा, शिष्टसभा. **-v. t.** पु c., भृ 3 U. **2** पथ्यं निर्दिश् 6 P.

Differ, *v. i.* भिद् pass., प्र-वि-°; विशिष् pass., (न कारणात्स्वाद्विभिदे कुमारः R. v. 35); gen. ex. by (*s.*); 'they two do not d.' न तयोर्भेदः, विशेषः, &c. **2** अन्यथा गम् 4 A, न संगम्, विनद् 1 A, भिन्नगत *a.* भू, विप्रतिपद् 4 A, (एवं हि विप्रतिपन्नाः प्राणेयत्तां प्रति श्रुतयः S. B. 702); 'I d. from you' मम मतं त्वन्मताद्भिन्नं. **3** विप्रति-रुध् pass. **-ence.** *s.* भेदः, विशेषः, अंतरं, (with gen.). **2** पार्थक्यं, इतरत्वं, भिन्नत्वं, व्यतिरेकः; 'that makes no d.' तेन न कोपि विशेषो जायते. **3** विरोधः, वैपरीत्यं, विपर्ययः, वैलक्षण्यं. **4** विप्रतिपत्ति *f.*, मतिभेदः, विसंवादः, वैमत्यं; कलिः, कलहः; विवादः. **5** असाम्यं, असादृश्यं; 'd. in quantity' वैषम्यं. **-ent,** *a.* भिन्न, वि-प्र-भिन्न, इतर-अन्य-पर-*pron. a.*, व्यतिरिक्त, विपरीत, पृथक्, विशिष्ट, (with abl.); अंतर in comp.; 'she is not d. from my body (myself)' अव्यतिरिक्तेयमस्मच्छरीरात् (Ka. 151); 'a d. sense' अर्थांतरं. **2** असदृश (शी *f.*), असमान, विषम, असम. **3** विविध, नानाप्रकार, नाना in comp.; तत्तत् *pron. a.*, 'd. S'âstras' तानि तानि शास्त्राणि; 'in a d. way' अन्यथा, भिन्नप्रकारेण. **-ential,** *a.* भेदकर (री *f.*), विशेषक. **-ently,** *adv.* अन्यथा, इतरथा, भिन्नरूपेण, अन्यप्रकारेण, पृथक्.

र, कठिन, दुष्कर, दुःसाध्य, कष्ट. **2** गहन, विषम, दुर्बोध, असुगम, कष्टज्ञेय गूढार्थ, दुर्ज्ञेय. **3** (With inf.) ex. by दुर्, दुःख, कष्ट, in comp.; 'd. to get दुष्प्राप, दुराप, कष्टसाध्य; दुरारोह, दुःखछेद्य, &c.; 'a d. case' सशल्योर्थः; 'a d. road' दुर्गसंचा(च)रः, संक्रमः; 'a d. place' विषमस्थानं, दुर्गं, दुर्गमस्थलं. **-ly,** *adv.* दुःखेन, कष्टेन, कृच्छ्रेण, कष्टं, आयासेन, दुर्, pr. **-y,** *s.* असौकर्यं, वैषम्य, कठिनता, दुष्करत्वं, कष्टता, दुःसाध्यता. **2** आयासः, वैक्लव्यं, विरोधः. **3** कृच्छ्रं, संकटं, विघ्नः, आयासः, दुर्गं, दुःखं, निरोधः, क्लेशः, बाधा, कष्टः-ष्टं. **4** विषमपदं, असुबोधं-दुर्बोधं पदं, असुगमं स्थानं; 'without d.' अनायासेन, सुखं; 'with d.' कथमपि, कथं कथमपि, कथंचित्, दुःखेन, कृच्छ्रेण; 'a commentary explaining the d. es' विषमपदविमर्शिनी टीका; 'beset with d. es' सशल्य, सकंटक; 'overcoming d. es' दुर्गलंघनं.

Diffidence, *s.* अविश्वासः, अप्रत्ययः, आ-, शंका. **2** (In oneself) अप्रगल्भता, विनयः, ह्रीः, लज्जा. **-Diffident,** *a.* अविश्वासिन्, शंकाशील, अप्रत्यय, साशंक; 'the mind feels d. of itself' आत्मन्यप्रत्ययं चेतः (S. 1). **2** अप्रगल्भ, अधृष्ट, विनीत, ह्रीमत्, लज्जावत्. **-ly,** *adv.* अप्रगल्भं, साशंकं, लज्जया, सविनयं.

Diffract, *v. t.* वियुज् 7 A, 10, विश्लिष् c.

Diffuse, *v. t.* प्रसृ c., वि-परि-स्तॄ c., विसृप् c., प्रचर् c. विकॄ 6 P, तन् 8 U, अभि-प्र-वृध् c. **2** प्र-चु c., विनु c., प्रक्षिप् P. **3** (Itself) व्याप् 5 P, विसृ-विसृप् 1 P विस्तॄ pass., व्यप् 5 A, सर्वत्र गम् 1 P, or प्रविश् 6 P. **-a.** वितत, सविस्तर, विस्तृत, असंक्षिप्त, विस्तीर्ण, सप्रपंच. **-ly,** *adv.* सविस्तरं, विस्तरेण, विस्तरशः, प्रपंचेन, असंक्षेपतः, असमासेन. **-ion,** *s.* प्रसारः, प्र-वि-सरः, विस्तारः, अभिवृद्धि *f.*, विततिं *f.*, प्रचारणं, प्रसरणं. **-ive,** *a.* वि-प्र-सारिन्, व्यापक, व्यापिन्, प्रसरणशील. **-iveness,** *s.* विस्तारः, विस्तृति *f.*, व्यापकत्वं. **2** वाग्विस्तारः, प्रपंचः, वाक्यविस्तरः.

Dig, *v. t.* खन् 1 P; 'd. down' (भूमिं) अवदृ 10, भिद् 7 U; 'd. in' निखन्. **2** निर्भिद्, छिद् 10, व्यध् 4 P. **-ger,** *s.* खनकः, खनितृ *m.*

Digest, *v. t.* (जठरे) जॄ c. (जरयति), पच् 1 P, परिपाकं नी 1 P, परिणम् c. (णमयति), दह् 1 P, **2** क्रमेण-यथाक्रमं-विन्यस् 4 U or रच् 10 or ग्रथ् 9 P or लिख् 6 P. **3** मनसा विचर् c. or चिंत् 10. **4** suffer, q. v. **-v. i.** जॄ 4 P, पच् pass., परिणम् 1 P. **-er,** *s.* पाचकं, जारणं, अग्निवर्धनं, रोचनं, रोचकं. **-ion,** *s.* पाकः, वि-परि-पाकः, पचनं, परिणामः. **2** जठराग्निः, जठरानलः, अग्निः; 'slowness of d.' अग्निमांद्यं; 'having a

good d. ' प्रदीप्ताग्निः. **-ive,** *a.* पाचन (नी *f.*), पाचक, अग्निवर्धक, परिपाकिन्.

Dight, *See* **Adorn.**

Digit, *s.* कला, लेखा, रेखा. **2** अंकः.

Dignity, *s.* महिमन् *m.*,माहात्म्यं, औदार्यं. **2** अनुभावः, प्रतापः, तेजस् *n.*, प्रौढि *f.*, प्रौढत्वं-ता. **3** प्रतिष्ठा, गौरवं, पदं, उत्कृष्ट-परमपदं, उत्कर्षः, उन्नति *f.*, आभिजात्य, प्रतिपत्ति *f.*, ओजस्विता, उच्चत्वं, कुलीनता; ' d. of style ' ओजस् *n.* **4** मानः, अभिमानः, गर्वः, दर्पः; ' d. of expression ' प्रौढत्वं वचसां. **-Dignify,** *v. t.* संमन् c., सत्कृ 8 U, पूज् 10. **2** उत्कृष्टपदे नियुज् 7 A, 10, पदमपदं गम् c., उत्कर्षं नी 1 P. **-ed,** *a.* महानुभाव, अनुभावत्, ग(गं)भीर, ओजस्विन्, प्रौढ, महाप्रभाव; ' d. in mien ' गंभीराकृति. **2** मानिन्, महाशय, महेच्छ. **3** उत्कृष्टपदनियुक्त, प्रतिपत्तिमत्, परमपदारूढ. **-Dignitary,** *s.* मान्यजनः, शिष्टजनः, कुलीनपुरुषः.

Digress, *v. i.* प्रस्तुतं न अनुसंधा 3 U, अप्रस्तुतं वद्-भण् 1 P or वच् 2 P, प्रकृतं-कथायोगं त्यज् 1 P; ' you are d.ing ' त्वया प्रस्तुतमनुसंधीयते. **2** उत्क्रम् 1 U, 4 P, विचल् 1 P, प्रच्यु 1 A, भ्रंश् 1 A, 4 P; *See* **Deviate. -ion,** *s.* प्रकृतत्यागः, अप्रस्तुतानुसंधानं; प्रसंगः, प्रासंगिकं वचनं; ' enough of d. ' अलं प्रासंगिकेन or प्रसंगेन, प्रकृतमेवानुसंधीयतां. **2** उत्क्रमः, विचलनं, भ्रंशः, च्युति *f.*, त्यागः. **-ive,** *a.* अनन्वित, अप्रस्तुत, अप्रकृत, असगत, असबद्ध.

Dike, *s.* सेतुः, सेतुबंधः,पिंडलः, धरणः, कूलकः-क. **2** कुल्या, परिखा, खातं, प्रणालः-ली.

Dilacerate, *See* **Tear.**

Dilapidate, *v. i.* जू 4 P, क्षिनशू 4 P, क्षि-उच्छिद्-pass., अवसद् 1 P. *-v. t.* उच्छिद् 7 P, अवसद् c., प्रध्वंस् c. क्षि c., क्षिनशू c.; *See* **Destroy. -ion,** *s.* क्षयः, ध्वंसः, नाशः, उच्छेदः, अवसादः.

Dilate, *v. t.* विस्तृ c., वितन् 8 U, प्र-वि-सु c., दीर्घीकृ 8 U. **2** (upon) पर्यंचयति (D.), सविस्तरं विवृ 5 U, or व्याचक्ष् 2 A, अति-विस्तृ. *-v. i.* वितन्-विस्तृ-विवृ pass., आयतीभू, दीर्घीभू. **-ed,** *a.* वितत, व्यायत; उत्फुल्ल, विकसित. **-ion,** *s.* विस्तारः, वितति *f.*, विस्तरणं, विवृति *f.*; विकासः-सनं. उत्फुल्लता.

Dilatory, *a.* दीर्घसूत्रिन्, दीर्घसूत्र, विलंबिन्, मंद, मंथर, चिरक्रिय. अक्षिप्रकारिन्. **-ly,** *adv.* सविलंबं, मंदंमंदं, कालक्षेपेण. **-ness,** *s.* दीर्घसूत्रता, विलंबः, कालक्षेपः, मांद्यं, कार्यजडता.

Dilemma, *s.* उभयसंभवः, विकल्पः.

Diligent, *a.* उद्योगिन्, व्यवसायिन्, उद्युक्त, सोद्योग, उद्यमिन्, अनलस, अभिनिविष्ट, उद्यम-व्यवसाय-पर, उद्योगतत्पर. **2** (of things), अनवरत, सतत, नित्यप्रवृत्त, प्र-आ-सक्त, अभ्यस्त, प्रसित, अविच्छिन्न. **-ly,** *adv.* प्रयत्नतः, सोद्योगं, सोद्यमं; 'अनवरतं, प्रसक्तं. **-Diligence,** *s.* उद्यमः, अध्यव-व्यवसायः, उद्योगः, अभियोगः, अभिनिवेशः, प्रयत्नः, अभ्यासः; प्रसक्ति *f.*, उत्साहः. **2** सातत्यं, अविच्छेदः, अविरामः, नैरंतर्यं.

Dill, *s.* सालेयः, मधुरिका.

Dilute, *v. t.* जलेन मिश्र् 10, or संसृज् 6 P, विली c., तनूकृ 8 U, क्षीणीकृ; मिश्रणेन शक्तिं तनूकृ **-ion,** *s.* जलसंसर्गः, जलमिश्रणं; तनूकरणं. **-Diluent,** *s.* विलयनं, तनूकरणं.

Dim, *a.* मंदद्युति, मंदप्रभ, मलिनकांति, मलिन, निष्प्रभ, निस्तेजस्क, स्तिमित. **2** अप्रकाश, अव्यक्त, अस्पष्ट, दुरालोक, दुर्दृष्ट; ' seeing d.-ly ' हतदृष्टि, अस्पष्टदृश्; ' of d. understanding ' मंदमति, जड-स्थूल-धीबुद्धि, &c. *-v. t.* अंधीकृ 8 U, अस्पष्टीकृ, कलुषीकृ, निष्प्रभीकृ, मलिनयति (D.). **-ly,** *adv.* अस्पष्टं, अव्यक्तं, निष्प्रभं,मलिनं. **-ness** *s.* तिमिरं, अस्पष्टता, तेजोहानि *f.*, दुरालोकता, मालिन्यं, अस्पष्टता. **2** स्थूलमतिता, बुद्धिमांद्यं.

Dimension, *s.* प्रमाणं, परिमाणं, मात्रा, मानं, विस्तारः.

Diminish, *v. t.*, *v. i.* *See* **Decrease. -Diminution,** *s.* न्यूनीकरणं,ह्रासः, क्षयः, अपचयः, अवसादः, हानि *f.* **-Diminutive,** *a.* अल्पकाय, क्षुद्र, अल्प, स्तोक, सूक्ष्म, लघु. **2** अल्पार्थ (प्रत्ययः); 'कन् is a d. termination' अल्पार्थे कन्.

Dimity, *s.* दृढं कार्पासवस्त्रं.

Dimple, *s.* कपोलिभंगः, गंडतरंगः; कपोलीमि *f.* ऊर्मि *f.*, भंगुरता, दंतुरता, भंगः, तरंगः. **-Dimply,** *a.* भंगुर, ऊर्मिमत्, दंतुर.

Din, *s.* कलकलः, निनादः, कोलाहलः, तुमुलरवः, निःस्वनः, उच्चघोषः, तुमुलः. *-v. t.* (श्रवणपुटं) जर्जरीकृ 8 U, कर्णौ उपहन् 2 P or जर्जरयति (D.); *See* **Stun.**

Dine, *v. i.* भुज् 7 A, आहारं-भोजनं-सेवृ 1 A, or निर्वृत् c., शरीरस्थितिं कृ 8 U or कल्पय् c. *-v. t.* भुज् c., अश् c. **-Dinner,** *s.* भोजनं, आहारः, अशनं; *See* **Food. 2** उत्सवः, जगिधि *f.*, भोजनोत्सवः.

Ding, *v. t.* ताडयति (D.), नद्-स्वन्-क्रुष् 1 P; ' ding dong ' घंटानादः-शब्दः; किंकिणीरवः-शब्दः-नादः, सततनादः.

Dingle, *See* **Dale.**

Dingy, *See* **Black.**

Dint, *s.* प्रहारः, आघातः, अभिघातः. **2** बलं, प्रभावः, सामर्थ्यं; ' by d. of ' बलेन, प्रभावेण, सामर्थ्यात्, योगेन. *-v. t.* प्रहारेण अंक् 10 or चिह्न् 10.

Diocesan, *s.* प्रधानधर्माध्यक्षः.

Diorthesis, *s.* वक्रांगचिकित्सा.

Dip, *v. i.* नि-,मज्ज् 6 P (with loc.); अवि-गाह् 1 A, प्र-नि-विश् 6 P, आप्लु 1 A, (acc.). **2** व्याप् 6 A, व्याप्त *a.* भू. *-v. t.* अवगाह् c., मज्ज् c. (मज्जयति), प्रवेशू c. **2** सिच् 6 P, क्लिद् c., आर्द्रीकृ 8 U; ' d. in a business ' इदं व्याप् or प्रवृत् 1 A; ' d. into books ' चुंबू 1 P; अल्पशः अधि-इ 2 A. *-s.* निमज्जनं, अवगाहः, प्रवेशः. **2** अवपातः, नम्रता, आनति *f.*

Diphtheria, *s.* मांससंतानिका.

Diphthong, *s.* स्वरद्वयं, संयुक्तस्वरः, संध्यक्षरं.

Diploma, *s.* पदवी अधिकार-दायकं पत्रं.

Diplomacy, *s.* सामन् *n.*, नीति *f.*, दौत्यकर्मन् *n.* **2** राजदूतमंडले-समूहः. **-Diplomatical,** *a.* दूतकार्यविषय. **-Diplomatist,** *s.* सामयोगज्ञः., राजनीतिकुशलः; दौत्यकार्यनिपुणः, सामकुशलः.

Dipsomania, *s.* मद्यासक्ति *f.*

Dire,-ful, *a.* दारुण, घोर, उग्र, तीव्र. **2** भीषण, क्रूर, भयानक, रौद्र. **-ness,** *s.* दारुणत्वं, घोरता, रौद्रता.

Direct, *v. t.* संधा 3 U, लक्ष्यीकृ 8 U, उद्दिश् 6 P, प्रेषू c., अधिकृत्य क्षिप् 6 P, (a missile &c.); ' d. attention or mind ' मनो नियुज् 7 A, 10, मनः समाधा or बंध् 9 P or आवंज् c. or निक्षिप्. **2** शास् 2 P, विनियम् 1 P, प्रणी 1 P, निवह् c., आधिष्ठा 1 P, अवेक्ष् 1 A. **3** आ-निदृ-उप-दिश्, प्रदृश् c. **4** नियुज्, आदिश्, आज्ञा c. (ज्ञापयति), प्रचुद् 10. **5** विधा 3 U, प्र-युज्. **6** (A letter &c.) *See* **Address.** *-a.* ऋजु, अवक्र, सरल, अकुटिल, अविलोम, अजिह्म, अनुलोम; ' d. descendants ' अनुलोमाः, अनुलोमवंशजाः. **2** क्रमागत, अविप्रकृष्ट. **3** व्यक्त, स्पष्ट, सस्पष्ट-व्यक्त, प्रत्यक्ष, साक्षात् *ind.* **-ion,** *s.* शासनं, नियोगः, निर्देशः, आज्ञा, आदेशः. **2** संधानं, उद्देशः, प्रेरणं. **3** प्रणयनं, प्रशासनं, विनियमनं, अधिष्ठातृत्वं, अधिष्ठानं, अवेक्षा-धानं. **4** दिश् *f.*, दिशा, आज्ञा, काष्ठा, ककुभ् *f.*, हरित् *f.* **5 Address** q. v. **-ive,** *a.* निर्देशक, सूचक. **-ly,** *adv.* सपदि, सद्यः, अचिरात्, तत्क्षणं-णात्, अविलंबितं, शीघ्रं, आशु. **2** स्पष्टं, प्रत्यक्षं, सुव्यक्तं,अगूढतया, भिज्ञायै. **3** अनुलोमं, सरलतया. **-or,** *s.* शासित-अधिष्ठातृ *m.*, अनुशासकः, अध्यक्षः, अधिकारिन् *m.*, अवेक्षकः, निर्वाहकः. **-ory,** *s.* विधिसंहिता. **2** नामधामसूचकं पुस्तकं.

Direption, *s.* अपहरणं, अपहारः, लुंठनं.

Dirge, *s.* करुणगीतं, करुणरससंगीतं.

Dirigible, *a.* नियम्य.

Dirigle, *s.* *See* **Balloon.**

Dirk, *See* **Dagger.**

Dirt, *s.* मलः-लं, पंकः, कर्दमः,जंबालः-लं,कल्कं, किट्टं. **-y,** *a.* मालिन, समल,मलीमस, पंकिल, कलुष, आविल, मलदूषित, सकर्दम. **2** नीच, कुत्सित, खल, गर्ह्य. *-v. t.* मलेन-पंकेन-दुष् c. (दूषयति) or लिप् 6 P. मलिनीकृ 8 U, मालिनयति-आविलयति (D.).

Diruption, *See* **Eruption.**

Disable, *v. t.* अनुपयुक्त *a.* कृ 8 U, विहस्तीकृ, (रुजा विहस्तचरणां देवीं M. 4); अशक्त-असमर्थ *a.* कृ. **2** अवसद् c., विफलीकृ, उपहन् 2 P, दुर्बलीकृ. **-Disability,** *s.* अशक्ति *f.*, असामर्थ्यं, अक्षमता, अयोग्यता; अनुपयोगः.

Disabuse, *v. t.* भ्रमं विरस् 4 U or अपहिद् 7 P or अपनी 1 P, or हृ 1 P or अपाकृ 8 U, भ्रांतिर्सृज् 6 P.

Disaccustom, *v. t.* अभ्यासं लुप् c.

Disadvantage, *s.* अहितं, अलाभः, अपकारः, अनर्थः, अनिष्टं, अपायः, हानि *f.*, पीडा, बाधा; 'at a d.' विषमावस्थ *a.*, असमवस्थ *a.* **-ous,** *a.* अहितकर (री *f.*), प्रतिकूल, अहित, अनुपकारक, विरोधिन्. अपायावह, क्षतिकारक. **-ously,** *adv.* अहितं, अनिष्टं, सापकारं.

Disaffect, *v. t.* विरंज् c., अपरागं उत्पद् c., उपजप् 1 P. **-ed,** *a.* वि-अप-रक्त, विप्रिय, असंतुष्ट, अप्रीत, अननुरक्त. **-ion,** *s.* विरागः, असंतोषः, विरक्तिं *f.*, अभक्तिं *f.*

Disaffirmance, *s.* प्रत्याख्यानं, प्रत्यादेशः, प्रत्यावर्तनं.

Disagree, *v. i.* न संसृज् 4 A, विरुद् 1 A, भिद् pass., विरुध् pass., असदृशीभू; *See* **Differ. -able,** *a.* अनभिमत, अप्रिय, अनिष्ट, अहित, अप्रीतिकर (री *f.*), अरुचिर, अनाह्लादक. **2** विरुद्ध, प्रतिकूल. **-ment,** *s.* विसंवादः, विवादः, भेदः, विप्रतिपत्ति *f.*, विमति *f.*; *See* **Difference.**

Disallow, *v. t.* न अनुज्ञा 9 U, निषिध् 1 P, निंद् 1 P **2** प्रत्याख्या 2 P, प्रत्यादिश् 6 P; *See* **Deny, -ance,** *s.* प्रत्याख्यानं, निषेधः; निवारणं, निरसनं.

Disanimate, *See* **Discourage.**

Disannul, *See* **Abolish.**

Disappear, *v. i.* अंतर्-तिरः-धा pass., अंतर्इ 2 P, तिरोभू 1 P, अदृश्य *a.* भू. **2** नश् 4 P, क्षर्य-नाशं-या 2 P, प्र वि-ली 4 A, प्रवि-ध्वंस् 1 A; ' the pigeons having d. ed ' चक्षुर्विषयातिक्रांतेषु-नयनपथातीतेषु-अदृष्टिगोचरेषु-कपोतेषु. **-ance,** *s.* अंतर्धानं, तिरोधान, अदृशनं; नाशः, लयः, &c.; better ex. by (*v. i.*).

Disappoint, *v. i.* आशां भंज् 7 P or प्रतिवि-हन् 2 P or विफलीकृ or मोघीकृ 8 U or खंड् 10; विप्रलभ् 1 A; ' he was d. ed in his request ' तस्य याच्ञा मोघी बभूव, स

भग्नाशो बभूव; ' d. ed in love ' खंडितप्रणय, खंडित. **-ed,** *a.* भग्नाश, मोघाश, भग्नोद्यम, अकृतार्थ, प्रतिहत, मनोहत, प्रतिबद्ध. **-ment,** *s.* आशाभंगः, प्रणयवैफल्यं, विफलीकरणं, नैराश्यं, विप्रलंभः.

Disapprove, *v. t.* निंद् 1 P, गर्ह् 1, 10 A, न प्रशंस् 1 P; not **approve** q. v. **-Disapprobation,** *s.* निंदा, असमतिः *f.*, विरागः, अप्रीतिः *f.*, विमतिः *f.*, अनभिनंदनं.

Disarm, *v. t.* अस्त्राणि अपहृ 1 P or अपनी 1 P, निरायुधीकृ 8 U, निःशस्त्रीकृ **2** (*fig.*) शम् c. (शमयति), सांत्व् 10. **-ed,** *a.* निरायुध, निःशस्त्र; ' d. of anger ' शांतरोष, क्षीणमन्यु.

Disarrange, *v. t.* क्रमं भंज् 7 P, व्यस् 4 U, संकृ 6 P, संकुलीकृ 8 U. **-ment,** *s.* अक्रमः, क्रमभंगः, व्यस्तता.

Disarray, *v. t.* अपनह् 4 P, उच्छद् 10, विवस्त्रीकृ 8 U. **2** क्रमं भंज् 7 P. *-s.* व्यूहभंगः, पिंजलः, समुत्पिंजः.

Disaster, *s.* आपद्-विपद् *f.*, व्यसनं, उपप्लवः, विपत्ति *f.*, उपद्रवः, अत्याहितं, अनर्थः. *-v. t.* पीड् 10, बाध् 1 A, उपप्लु 1 P, उपद्रु 1 P. **-Disastrous,** *a.* विपद्युक्त, दुर्भाग्य, दुरंत; अनर्थावह, दारुण, घोर.

Disavow, -al, *See* **Deny, Denial.**

Disband, *v. t.* युद्धव्यापारात् मुच् 6 P or c. सैन्यभंगं कृ 8 U. **2** मुच्, विमोक्ष् 10. *-v. i.* युद्धव्यापारान् मुच् 6 P.

Disbark, *v. t.* नौकायाः अवतृ c.

Disbelieve, *v. t.* Not **believe** q. v. **-er,** *s.* नास्तिकः, अविश्वासिन् *m.* **-Disbelief,** *s.* अप्रत्ययः, अविश्वासः.

Disbend, *See* **Relax.**

Disbranch, *v. t.* निःशाखीकृ 8 U, शाखां लू 9 U.

Disburden, *v. t.* भारं अवतृ c. or अपनी 1 P, निर्भार-रिक्तभार *-a.* कृ 8U; 'd one's mind ' मनोगतं अन्यस्मै आख्या 2 P ; ' the afflicted should d. their grief ' कर्तव्यानि दुःखितैर्दुःखनिर्वापणानि (U. 3).

Disburse, *v. t.* व्यय् 10 P (व्यययति), उत्सृज् 6 P, वि-नियुज् 7 A, 10, व्ययीकृ 8 U. **-ment,** *s.* व्ययः, उत्सर्गः, विनियोगः, त्यागः; ' receipt and d. ' आयव्ययौ.

Disc, *s.* *See* **Disk.**

Discard, *v. t.* अपास् 4 U, अवधू 5, 9 U, अपक्षिप् 6 P, तिरस्कृ 8 U, अवसृज् 6 P, अपहा 3 P; निःसृ c., अपच्छद् 6 P.

Discern, *v. t.* वि-विच् 3, 7 P, विचार् c., परिच्छिद् 7 P, निर्णी 1 P, परीक्ष् 1 A. **2** निर्वर्ण् 10, दृश् 1 P, ईक्ष् 1 A, आलोक् 1 A, 10, आलक्ष् 10, विभू c. **-er,** *s.* विवेचकः, ईक्षितृ *m.* **-ible,** *a.* दृश्य, दृष्टिगोचर, विभाव्य, प्रत्यक्ष. **-ing,** *a.* सूक्ष्मदर्शिन्, दीर्घ-दूर-दृष्टि, विवेकिन्, परिणामदर्शिन्, विचारशील. **-ingly,** *adv.* सविवेकं, सविचारं, सपरिच्छेदं. **-ment,** *s.* विवेकः, विवेचनं, परिच्छेदः, विचारः-रणा, परीक्षा, दूरदृष्टिः *f.*, अवबोधः, विज्ञान.

Discerption, *s.* व्यवच्छेदः; विभेदनं, विदारणं.

Discharge, *v. t.* (A load &c.) भारं अवतृ c. or अपनी 1 P. **2** उद्-गृ 6 P, उदीर् c., प्रसृज् 6 P, उज्झ् 10, उन्मुच् 6 P, मुच् c., उद्गम् 1 P. **3** (Arrow &c.) मुच्, अस् 4 P, विसृज्, क्षिप् 6 P, प्रेर् c. निपत् c. ; ' d. a gun ' लोहना-ोस्थं आग्नेयं चूर्णं ज्वल् c. 4 (अधिकारात or पदात) निःस c., अपकृष् 1 P, अवरुह् c. (रोपयति), निष्कस् c., निराकृ 8 U, अपास् 4 U, च्यु c., भ्रंश् c. **5** (Duty) कृ, अनुज्ञा 1 P, विधा 3 U, निष्पद्-संपद् c., निर्वह् c., आचर् 1 P. **6** (Debt) (ऋणं) शुध् c., निर्यत् 10, निराकृ, निस्तृ c., विर्ली, आनृण्यं गम् 1 P. **7** मुच्, मोक्ष् 10, विसृज् 6 (As a river) अवतृ 1 P, द्रु 1 P; सागरं वर्जयित्वा कुत्र वा महानद्यवतरति (S. 3) ' will d. itself &c. ' *-v. i.* मुच् pass. ; स्रु 1 P. *-s.* भारावतरणं. **2** उद्गारः, प्रस्रावः, विसर्गः, उद्वमनं, उच्चारणं, उदीरणं. **3** क्षेपणं, मोक्षः. **4** अवरोपणं, अधिकारभ्रंशनं, पदच्युतिः *f.*-भ्रंशः. **5** अनुष्ठानं, निर्वाहः, विधानं, संपादनं. **6** आनृण्यं, ऋणशोधन-निस्तारः. **7** मोक्षः, मुक्तिः *f.*, मोचनं.

Disciple, *s.* शिष्यः, छात्रः, अंतेवासिन् *m.*, विद्यार्थिन् *m.*

Discipline, *v. t.* विनी 1 P, शिक्ष् c., शास् 2 P, अधि-इ c. (अध्यापयति). **2** नियम् 1 P, विनियम्, शास्, दंड् 10, दम् c. (दमयति). **3** व्यायम् ; अभ्यस् 4 U. *-s.* विनयः, अनुशासनं, शिक्षा-क्षणं, अध्यापनं, अभ्यासः. **2** नियमः, व्यवस्था, विधिः, शासनं, नीतिः *f.* **3** दंडः, निग्रहः, दमनं, शिष्टिः *f.*, विनियमः-मनं; ' military d. ' युद्धाभ्यासः, युद्ध-रण-शिक्षा; ' d. in arms ' शस्त्राभ्यासः.

Disclaim, -er, *See* **Deny, Denier.**

Disclose, *v. t.* विवृ 5 U, प्रकाशू c., व्यंज् 7 P, प्रकटं कृ 8 U, स्पष्टीकृ, भिद् 7 P or c., निर्विद् c., ख्या c, (ख्यापयति); ' d. ing secrets ' रहस्यभेदः. **-ure,** *s.* विवृतिः *f.*, प्रकाशनं, निवेदनं, भेदः.

Discolour, *v. t.* वर्णांतरं ग्रह् c., कालुष्य-मलिनीकृ 8 U, विवर्ण् 10, कुवर्णीकृ. **-ation,** *s.* वैवर्ण्यं, कालुष्यं, मालिन्यं.

Discomfit, *v. t.* वि-प्र-ध्वंस् c., व्यूहं भंज् or भिद् 7 P (as an army); पराजि 1 A, विजु c.; *See* **Defeat, Baffle. -ure,** *s.* भंगः, व्यसनं, पराजयः, पराभवः.

Discomfort, *v. t.* पीड् 10, व्यथ् c., बाध् 1 A; *See* **Afflict. -s.** अस्वास्थ्यं, दुःखं, पीडा, व्यथा, क्लेशः, बाधा.

Discommend, *See* **Censure.**

Discompose, *v. t.* क्षुभ् c., व्याकुल् c., संभ्रम् c. (भ्रमयति), आकुलीकृ 8 U, बाध् 1 A. **-ed,** *a.* आकुलित, क्षुब्ध, व्याकुल, कातर, व्याकुलचित्त. अनवस्थित, व्यग्र, भ्रांत, पारिप्लव, विक्लवचित्त. **-ure,** *s.* क्षोभः, आकुलत्वं, व्यग्रता, वैक्लव्यं, उद्वेगः, अस्वास्थ्यं, अस्थिरता.

Disconcert, *v. t.* खंड् 10, मोघीकृ 8 U, प्रति-व्या-हन् 2 P, *See* **Baffle. 2 Discompose,** *q. v.*

Disconformity, *s.* विरोधः, विरुद्धता, असादृश्यं, असंगतिः *f.*, विसंवादः, विगतिपत्तिः *f.*

Disconnect, *See* **Separate. -ion,** *s.* विश्लेषः, असंगतिः *f.*, वियोगः.

Disconsolate, *a.* खिन्न, विषण्ण, दीन, उद्विग्न, म्लान, *See* **Dejected. -ly,** *adv.* सविषादं, सखेदं, सोद्वेगं.

Discontent, *a.* असंतुष्ट, अतृप्त. *-s.* असंतोषः, अतृप्तिः *f.*, अप-वि-रागः, विरक्तिः *f.*, अप्रीतिः *f.* *-v. t.* असंतोषं उत्पद् c. or जन् c.

Discontinue, *v. t.* त्यज् 1 P, विच्छिद् 7 P, विरम् c. (रमयति), निवृत् c., उज्झ् 6 P, विलुप् c. *-v. i.* वि उप-रम् 1 P, निवृत् 1 A, (with .abl.); *See* **Cease. -ance, -ation,** *s.* विच्छेदः, विरामः, निवृत्तिः *f.*; उपैशमः, भंगः, अंतरायः.

Discord, *v. i.* विसंवद् 1 P, विभिद्-न युज्-विरुध् pass. *-s.*, **-ance,** *s.* भेदः; भिन्नता, विसंवादः, मतभेदः, विरोधः, विगतिः *f.*, वैमत्यं, वैपरीत्यं, वैलक्षण्यं; ' d. of sound ' स्वरविरोधः; अपस्वरः. **-ant,** *a.* विषम, प्रतिकूल, विरुद्ध, विसंवादिन्, परस्परविरुद्ध, विभिन्न, असंगत, विपरीत; ' d. sound ' विस्वरः, अपस्वरः, कर्कशध्वनिः.

Discount, *v. t.* भागं उद्-हृ 1 P. *-s.* उद्धारः, उद्धृतभागः.

Discountenance, *v. t.* न अनुमन्-मुद् 9 P, न उपकृ 8 U, न अनुमुद् 1 A.

Discourage, *v. t.* उत्साहभंगं कृ 8U, अप-वि-सद् c., विषादं जन् c., विषण्णीकृ, धैर्यं ध्वंस् c., मनः or आशाः भंज् 7 P. **2 Deter,** *q. v.* **-ed,** *a.* भग्नोत्साह, हताश, भग्नोद्यम, विषण्ण, अवसन्न, खिन्न, निरुत्साह, म्लानेंद्रिय, प्रतिबद्ध, भग्नाश, धैर्यच्युत, स्खलितधैर्य. **-ing,** *a.* विषादजनक, धैर्यध्वंसिन्. **-ment,** *s.* धैर्यध्वंसः, उत्साहभंगः, आशा-उद्यम-भंगः; विषादः, अवसादः, खिन्नता, धैर्य-च्युतिः *f.* स्खलनं.

Discourse, *v. i.* संवद् 1 P, संभाष् 1 A, समालप् 1 P. **2** भाष् 1 A, वद्-गद् 1 P, अधिकृत्य वच् 2 P. *-s.* संवादः, संभाषणं, संकथा, संलापः. **2** वचनं, भाषणं, उक्तिः *f.*, वचस् *n.*; *See* **Converse. -ation. -er,** *s.* वादिन् *m.* वक्तृ *m.* **-ive,** *a.* तार्किक (कीः *f.*), ऊहिन्, तर्कविषय.

Discourteous, *a.* असभ्य, अशिष्ट, अविनीत, दुःशील, अनार्य. **--ness, -Discourtesy,** *s.* अविनयः, अनार्यता, असभ्यता, मर्यादातिक्रमः, अशिष्टाचारः.

Discover, *v. t.* विवृ 5 U, दृश् c., प्रकाशू c., आविष्कृ 8 U, स्पष्टीकृ, व्यक्तीकृ, प्रकटीकृ, व्यंज् 7 P, ज्ञा c. (ज्ञापयति), आनि-विद् c. **2** निरूप् 10, ज्ञा 9 U, उपलभ् 1 A, निर्णी 1 P. **3** समा-आ-सद् c., प्राप् 5 P, विद् 6 U, दृश् 1 P, अधिगम् 1 P, इ-या 2 P. **-er,** *s.* निर्णेतृ-अधिगंतृ *m.*, निरूपकः. **-y,** *s.* प्रकाशनं, विवरणं. **2** ज्ञानं, अवगमः, दर्शनं, निर्णयः, उपलब्धिः *f.*, समासादनं, निरूपणं, प्राप्तिः *f.*

Discredit, *v. t.* न विश्वस् 2 P, न प्रति-इ 2 P, अविश्वास्य *a.* मन 4 A, प्रामाण्यं लघ्-यति (D.). **2** कलंकयति (D.), अकीर्तिं आवह् 1 P, दुष् c. (दूषयति), मलिनीकृ 8 U, मलिनयति (D.). *-s.* अपयशस् *n.*, अपकीर्तिः *f.*, दूषणं, कलंकः, अप्रतिष्ठा, अकीर्तिः *f.*; 'bring d. on ' दुष् c. मलिनयति; (यदा मेधाविनी शिष्योपदेशं मलिनयति M. 1). **-able,** *a.* अकीर्तिकर-अयशस्कर (रः *f.*), गर्हित, कलंककर, दूषणीय, गर्ह्य, निंद्य.

Discreet, *a.* समीक्ष्य-विमृश्य-कारिन्, विचक्षण, स्ववहित, विचारशील, सावधान, दीर्घ-दूर-दृष्टि. **2** (Of acts.) साधु, अपघ्न. **-ly,** *adv.* विमृश्य, समीक्ष्य, विचार्य. **-Discretion,** *s.* विवेकः, विमृश्यकारित्वं, समीक्षणं, विचक्षणता, विचारः, विज्ञता. **2** स्वातंत्र्यं, स्वाधीनता, ' having reached the years of d. ' प्राप्तव्यवहारदशः. **3** विकल्पः, कामः, रुचिः *f.*, छंदः; ' at d. ' विना संयमन; ' this matter is left to your d. ' यथा भवानुचितं मन्यते तथा क्रियतां ; स्वरुच्या-कामतः-वर्तता भवान्; ' at one's own d. स्वच्छंदं, स्वेच्छया, स्वरुच्या, कामत **-ally,** *adv.* स्वेच्छानुसारेण, यथाकामं **-ary,** *a.* स्वाधीन, वैकल्पिक-यादृच्छिक (कीः *f.*), स्वेच्छानुवर्तिन्.

Discrepant, *a.* विभिन्न, विरुद्ध, विपरीत, अवि-संगत, विसंवादिन्, विरोधिन्, प्रतिकूल. **-Discrepance, -cy,** *s.* विभेदः, विरोधः, विगतिपत्तिः *f.*, असंगतिः *f.*, विसंवादः, वैलक्षण्यं, वैपरीत्यं.

Discrete, *a.* विभिन्न, विविक्त. **2** अवधारणार्थक.

Discriminate, *v. t.* वि-विच् 3, 7 P, विशिष् 7 P or c., परिच्छिद् 7 P. विज्ञा 9 U, विज् 3 U, विचार् c. **2** लक्ष् 10, परीक्ष् 1 A, सं-अव-ईक्ष्. **-ion,** *s.*

विवेकः, परिच्छेदः, विज्ञानं, विचारणं-णा; विशेषः, अवधारणा ; 'd. of proper and improper' पात्रापात्रविचारणा ; 'd. of right and wrong' सदसद्विवेकः. **-ing, -ive,** *a.* विशेषज्ञ, गुणदोषविद्, विवेकिन्, परिच्छेदक.

Discursive, *a.* नानाविषय, अनेकप्रसंग; अस्थिर, चंचल, अनवस्थित. **2** तार्किक (की *f.*), ऊहिन्.

Discus, *s.* चक्रं.

Discuss, *v. t.* विचर् c., पर्यालोच् 10, वितर्क् 10, निमृश् 6 P, परीक्ष् 1 A, निरूप् 10, अनुसंधा 3 U, 'al. in detail, at length, exhaustively' प्रपंचयति (D.), प्रपंचं कृ 8 U, सविस्तरं-विस्तरेण-वर्ण् 10. *-v. i.* विवद् 1 A, वादे व्याप् 6 A. **-ion,** *s.* विचारः-रणा, वितर्कः, परीक्षा, निरूपणं, विमर्शः, वादविवादः, पर्यालोचनं ; 'to turn to the subject under d.' प्रकृतं-प्रस्तुतं-अनुसृ 1 P or अनुवृत् 1 A or अनुसंधा; 'subject under d.' प्रस्तावः, प्रस्तुत-प्रकृत-विषयः, प्रस्तुतं, प्रकृतं; 'result of d.' मथितार्थः.

Discussive, Discutient, *a.* शोथघ्न (घ्नी *f.*), शोथहृत्, दुष्टधातुनाशक.

Disdain, *v. t.* अवमन् 4 A, अवज्ञा 9 U, अवगण् 10, तिरस्कृ 8 U; *See* **Contemn.** *-s.* औद्धत्यं, सावज्ञावलेपः, अवमानः-नना, अवहेलना; *See* **Contempt. -ful,** *a.* सावज्ञ, सावलेप, अवमानिन्; उद्धत, अवलिप्त, सावमान.

Disease, *s.* रोगः, गदः, व्याधि *m.*, आमयः, उपतापः, रुजा, रुज् *f.*, विकारः, पीडा, क्लेशः, अस्वास्थ्यं. *-v. t.* रोगेण व्यध् c. or पीड् 10 or क्लिश् 9 P. **-ed,** *a.* व्याधिग्रस्त. रोगोपसृष्ट, रोगार्त, सरोग, सरुज, सामय, आतुर, विकृत, अस्वस्थ.

Disembark, *v. i.* पोतात्-नौकायाः अवतॄ 1 P, or अव-रुह् 1 P. *-v. t.* अवतॄ-रुह् c. **-ation,** *s.* अवरोहणं, उत्तरणं.

Disedge, *See* **Blunt.**

Disembarrass, *See* **Clear.**

Disembitter, *v. t.* तिक्तत्वं-कटुत्वं-अपनी 1 P, मधुरीकृ 8 U, सुरस *a.* कृ.

Disembody, *v. t.* *See* **Disband. 2** देहबंधान्मुच् c. **-ed,** *a.* अशरीर, देहहीन, कायहीन, and sim. comps.

Disembogue, *v. i.* निर्गम् निसृ 1 P, समुद्रं अवतॄ 1 P or प्रविश् 6 P or प्रस्र-द्र 1 P (of a river.). *-v. t.* सलिलं सागरे निर्गम् c., &c.

Disemploy, *See* **Discharge.**

Disenable, *See* **Disable.**

Disembroil, *v. t.* उद्वेगात्-सभ्रमाद्-मुच् c. or उद्वृह् 1 P.

Disenchant, *v. t.* प्रतिकृ 8 U, मंत्रवशाद् उद्वृह् 1 P.

Disencumber, *v. t.* प्रतिबंधान् अपनी 1 P or अपनुद् 6 P; निर्विघ्नीकृ 8 U, निष्प्रत्यूह *a.* कृ.

Disengage, *v. t.* वियुज् 7 A, 10, विश्लिष् c. **2** मुच् 6 P or c., मोक्ष् 10, उद्-हृ 1 P; 'd. the mind' मनो निवृत् c. *-v. i.* मुच् pass., निवृत् 1 A, विश्रम् 4 P आत्मानं निवृत् c. **-ed,** *a.* मुक्त, उद्धत, उत्तीर्ण. **2** लब्धक्षण, प्राप्तावकाश, प्राप्तावसर, अव्यापृत, कायरहित-शून्य, कायविरत, निर्व्यापार. **-ment,** *s.* मोक्षणं, &c. **2** अवसरः, क्षणः; अवकाशः.

Disentangle, *v. t.* Disengage, q. v. **2** वियुज् 7 A, 10, विश्लिष् c.

Disenthral, *v. t.* दास्यात् मुच् 6 P, or c. or मोक्ष् 10.

Disentrance, *s.* मूर्च्छनात्प्रबुध् c.

Disesteem, *v. t.* अवमन् 4 A, अवज्ञा 9 U; *See* **Contemn. -s.** अनादरः, अवमानः, अवज्ञा, उपेक्षा.

Disfavour, *v. t.* न अनुग्रह् 9 P, न उपकृ 8 U, न अनुमुद् 1 A. *-s.* अकृपा, अननुग्रहः. अप्रसादः, अनुपकारः, पराङ्मुखता, विरक्ति *f.*, अप-वि-रागः, अप्रीति *f.*, असंतोषः.

Disfigure, *v. t.* विरूप् 10, विरूपीकृ 8 U, विकृ 8 U, व्यंगयति (D.), विकलीकृ, विप्रकृ c., (रूपं प्रसाधनैर्विप्रकार्यते S. 4). **-ed,** *a.* वि-कृ-अप-रूप, विकृताकार, विकृत, व्यंग (गी *f.*). **-ment,** *s.* विरूपता, वैकल्यं, व्यंगता, विप्रकारः.

Disfranchise, *v. t.* पारत्वं-पौराधिकारं-हृ 1 P or विलुप् c.

Disgorge, *v. t.* उद्-गॄ 6 P, उद्वम् 1 P, विच्छर्द् 10. **-ment,** *s.* उद्गारः, उद्वमनं, वमथुः, प्रच्छर्दिका.

Disgrace, *s.* अपमानः, अव-वि-मानना, परि-अभि-भवः, निकृति *f.*, अ-अप-कीर्ति *f.*, अ-अप यशस् *n.*, कलंकः, दूषणं. **2** कलंकास्पदं. अवमानहेतुः; 'a d. to the family' कुलांगारः, कुलपांसुलः. *-v. t.* अप-अव-मन् c., कलंकयति (D.), अकीर्तिं-अयशः-कृ; परि-अभि-भू 1 P, दुष् c. (दूषयति); गर्ह् 1, 10 A, सावज्ञं निर्भर्त्स् 10 A. **2 Degrade,** q. v. **-ful,** *a.* अयशस्कर (री *f.*), कलंककर (री *f.*); गर्हित, अपमानहेतुक; लज्जाकर (री *f.*), अवमानजनक; निंद्य, दूषणीय. **-fully,** *adv.* गर्हितं; लज्जाकरं, सापमानं. **-ious,** *a.* अप्रसन्न, अननुकूल.

Disguise, *v. t.* कपटवेशेन-वेशांतरेण-गुह् 1 U or आच्छद् 10, 'd. ed as' वेष-रूप-धारिन् in comp.; 'd. ed as ascetics' तपस्विव्यंजनोपेताः, तापसच्छद्मना, तापसरूपधारिणः, &c. **2** (Oneself) वेषांतरं-वेषपरिवर्तनं कृ 8 U

or विधा 3 U, अन्यवेषं परिधा 3 U, वेषं परिवृत् c.; 'd. ing himself differently' वेषांतरं विधाय, परिहितान्यवेषः; 'd. ed himself with a lion's skin सिंहमर्चपरिच्छन्नः बभूव. **2** अप-नि-ह्नु 2 A, गुप् 1 P, 10, गुह्; *See* **Conceal. -s.** कपट-छद्म-वेषः, वेषांतरं, आकारगोपनं, विडंबनं, अभिनयः. **2** छद्मन् *n.*, छलं, व्याजः, अप-व्यप-देशः, लक्षं. **-ed,** *a.* कपट-छद्म-वेषिन्, कपटवेष, कपटरूप, रूपवेष, &c., in comp.; 'd. praise' व्याजस्तुति *f.*

Disgust, *v. t.* उद्वेगं-निर्वेदं-उत्पद् c., अरुचिमुत्पद् c., उद्विज् c.; निर्विद् c. *-s.* जुगुप्सा, उद्वेगः, घृणा, निर्वेदः; अरुचि *f.*, विरक्ति *f.*, बीभत्सं; 'in d.' सनिर्वेदं. **-ing, -ful,** *a.* बीभत्स, अरुचिर, कुत्सित, गर्ह्य, उद्वेगकर (री *f.*), जुगुप्सावह; 'to be d.ed with' उद्विज् 6 A (with abl.); निर्विद् pass., निर्विण्ण *a.* भू (with instr.), बध् desid. (बीभत्सते) (with abl.).

Dish, *s.* शरावः, पात्रं, भाजनं. **2** भोजनं; आहारविशेषः.

Dishabille, *a.* विवस्त्र, कुचेल, अकृताभरण. *-s.* लघुवासस् *n.*

Dishearten, *See* **Discourage.**

Dishevel, *v. t.* प्र-वि-कॄ 6 P, स्रंस् 1 A. **-ed,** *a.* प्र-वि-कीर्ण, पर्याकुल, स्रस्त; 'having d. hair' मुक्त-स्रस्त-केश.

Dishonest, *a.* अशुचि, असरल, अनृजु, सव्याज, जिह्म, कुटिल, कापटिक (की *f.*), छाटिक (की *f.*), शठ, धूर्त, सव्यलीका, 'a d. woman' असती, भ्रष्टा, व्यभिचारिणी. **-ly.** *adv.* अन्यायेन, कपटेन, कुटिलं, धूर्ततया, सव्याजं, छलेन. **-y,** *s.* अशुचित्वं, कापट्यं, कौटिल्यं, माया, &c.

Dishonour, *v. t.* Disgrace, q. v. **2** अवमन् 4 A, अवज्ञा 9 U, अवधीर् 10, अनादृ 6 A; *See* **Contemn;** 'd. a maiden' दुष् c. (दूषयति), सतीत्वाद् भ्रंश् c. *-s.* अपमानः, अनादरः, अयशस् *n.*, अकीर्ति *f.*, कलंकः, अप्रतिष्ठा. **-able.** *a.* अनार्य, कलंककर (री *f.*); *See* **Disgraceful.**

Dishumour, *s.* स्वभाववक्रता, वक्रशीलता, प्रकृतिकर्कशत्वं, प्रतीपता.

Disillusion, *v. t.* मोहं or भ्रमं निरस् 4 P.

Disincline, *v. t.* विरंज् c., विरागं जन् c.; or उत्पद् c. **-ation,** *s.* अस्पृहा, निरीहत्वं, विरागः, विरक्ति *f.*, द्वेषः, अनीहा, विमुखता, अनिच्छा, अरुचि *f.*, अप्रीति *f.* **-ed,** *a.* विरक्त, वि-पराङ्-मुख (खी *f.*), अनिच्छु, निरीह, निःस्पृह.

Disinfect, *v. t.* शुध् 4 P, निर्दोषं कृ 8 U. **-ant,** *a.* विषघ्न.

Disingenuous, *a.* अनुदार, अदक्षिण, असरल; *See* **Dishonest.**

Disinherit, Disherit, *v. t.* रिक्थाधिकाराद् भ्रंश् c., पैतृकं धनं लुप् c. **-ed,** *a.* अनधिकार, पैतृकधनहीन. **-ing,** *s.* पैतृकरिक्थच्छेदः-लोपः.

Disintegrate, *v. t.* वियुज् 10, संहतिं भिद् 7 P, विश्लिष् c.; *See* **Separate. -ion,** *s.* वियोगः, विश्लेषः, संहतिभेदः.

Disinter, *v. t.* (शवं) उत्खन् 1 P.

Disinterested, *a.* निःस्पृह, उदासीन, निर्मम, निष्काम, मुक्तसंग, निःसंग, अपक्षपातिन्, निरीह, आत्महितनिरपेक्ष, निष्कारण; 'a d. friend' निष्कारणो बंधुः. **-ly,** *adv.* निर्ममं, स्वार्थनिरपेक्षं, निःस्पृहं. **-ness,** *s.* निरीहता, निःसंगता.

Disjoin, Disjoint, *v.* *See* **Separate. 2** (Disjoint) विसंधा 3 U, संधिं भंज् 7 P, or त्रुट् c. **3** व्यवच्छिद् 7 P, अवकृत् 6 P. **-ed,** *a.* असंश्लिष्ट, असंहत, असंगत, असंबद्ध, अनन्वित, असंलग्न.

Disjunct, *a.* वियुक्त, विश्लिष्ट, असंलग्न, विभिन्न. **-ion,** *s.* वियोगः; विश्लेषः, विभेदः, असंगतता, असंधानं. **-ive,** *a.* वियोगिन्.

Disk, *s.* बिंबं, मंडलं, परिवेषः, परिधिः. **2** चक्रं.

Dislike, *s.* अरुचि *f.*, विरागः, विरक्ति *f.*, विमुखता, द्वेषः; *See* **Disinclination. -v. t.** द्विष् 2 U, विरज् pass. (with loc.), न रुच् 1 A, न अभिनंद् 1 P, न इष् 6 P. **-ed,** *a.* अप्रिय, अनिष्ट, विद्विष्ट, अनीप्सित.

Disliken, *v. t.* असमीकृ 8 U, अतुल्यीकृ.

Dislocate, *v. t.* संधेः चल् c. or च्यु c., संधिं त्रुट् c. or भंज् 7 P, विसंधा 3 U. **-ion,** *s.* संधित्रोटनं, संधिभंगः, विसंधानं, संधिच्युति *f.*

Dislodge, *v. t.* अप-निः-सृ c., निरस् 4 P, निष्कस् c.; *See* **Drive. 2** वि-प्र-वस् c., निर्वस् c., गृहाद्बहिष्कृ 8 U. *-v. i.* अपसृ 1 P, स्थानांतरं गम् 1 P, स्थानांतरे निविश् 6 P.

Disloyal, *a.* भक्तिहीन, राजद्रोहिन्, राजापथ्यकारिन्, अराजनिष्ठ, अप-वि-रक्त, असंतुष्ट. **-ly,** *adv.* भक्तिहीनतया, राजद्रोहेण, अपरागेण. **-ty,** *s.* राजद्रोहः, अभक्ति *f.*, अप-वि-रागः, राजापथ्यकारिता, असंतोषः.

Dismal, *a.* उदासीन, अप्रसन्न, सशोक, सखेद, निरानंद, निरुल्लास. **2** उग्र, दारुण, घोर, रौद्र (द्री *f.*), भैरव (वी *f.*), भयप्रद, भयानकं. **-ly,** *adv.* उग्रं, भयानकं. **-ness,** *s.* दारुणता, उग्रता; औदासीन्यं.

Dismantle, *v. t.* वस्त्रं अपहृ 1 P, विवस्त्रीकृ 8 U. **2** उपकरणादिकं हृ, उपस्करादि अपनी 1 P.

Dismask, *v. t.* कपटवेशं अवतॄ c.

Dismast, *v. t.* कूपकं भंज् 7 P.

Dismay, *s.* सं-, त्रासः, साध्वसं, भयं, भीति *f.*, उद्वेगः, सविस्मयः त्रासः, आकुलत्वं; कातर्यं; 'filled with d.' पर्याकुल, संभ्रांतचित्त,

-*v. t.* संत्रस् c., विस्मयं-साध्वसं उत्पद् c., भयेन उपहन् 2 P, उद्विज् c.; *See* **Daunt.**

Dismember, *v. t.* अंगानि विघट् c.(घटयति) or पृथक् कृ 8 U, अवयवशः छिद् 7 P; विभज् 1 U, विश्लिष् c., वियुज् 7 A, 10. **-ment,** *s.* अंगव्यवच्छेदः, अवयवशः विभागः, विश्लेषः; भंगः.

Dismiss, *v. t.* विसृज् 6 P or c., प्रस्था c. (स्थापयति), संप्रेष् c., गंतुं अनुज्ञा 9 U or आदिश् 6 P. **2** (From office &c.) अधिकारात्-पदात् च्यु c. or भ्रंश् c. or अवरुह् c., *See* **Discharge;** 'd. ed from office' अधिकारच्युत-भ्रष्ट, भ्रष्टाधिकार. **3** अपास् 4 P, हा 3 P, उत्सृज्, अपनी 1 P, अपनुद् 6 P, त्यज् 1 P, दूरीकृ 8 U, निरा-अपा-कृ, मुच् 6 P; 'd. all anxiety' सर्वथा वीतचिंतो भव, औत्सुक्यमपाकुरु. **4** प्रत्याख्या 2 P, प्रत्यादिश् 6 P. **-ion, -al,** *s.* प्रस्थापनं, विसर्जनं. **2** पदाद् अवरोपणं; अधिकारभ्रंशः-च्युति *f.*, पदहानि *f.* **3** निराकरणं; प्रत्यादेशः, त्यागः, &c.

Grow, *v. i.* स्फुट् 6 P, विकस् 1 P, फुल्ल् 1 P, उद्भिद् pass. (generally of plants). **2** रुह् 1 P, ऋध् 4, 5 P, एध् 1 A; पुष् 4 P, वृध् 1 A, उपचि pass., स्फाय् 1 A, प्यै 1 A, वृद्धिं या-इ 2 P. **3** सं-,जन्, 4 A, भू 1 P. ' the beard having begun to g. ' उद्भिद्यमानश्मश्रुराजितया (Ka. 29). **4** जन्, उत्पद् 4 A; उद्-इ 2 P, भू, उत्-सं-भ°. **5** विस्तृ pass., व्याप् 5 P; ' g. up ' संवृध्, एध्, प्रौढीभू, ' bad boys g. to be bad men ' कुबालाः कुनरएव निष्पद्यंते-भवंति; ' he was grown up ',' he grew up to man 's estate (majority)' यौवन-पूर्वावस्थांशः, समाप्तबालभावः, प्रौढः, प्राप्त-यौवनः, यौवनदशामापेदे, अतीत-गत-शैशवः; ' g. old ' जृ 4 P. *-v. t.* वृध् c., रुह् c. **-ing,** *a.* वर्धमान, उपचीयमान, वर्धिष्णु **2** रोहिन्, रुह, रुहु, भव, उद्भव, प्रभव, ज, जात, उत्थ, समुत्थ, भू, in comp.; ' g.-ing in size' प्र-उप-चीयमान-अवयव. **-Growth,** *s.* वृद्धि, आगमः, वर्धनं, उपचयः, ऋद्धि *f.*, स्फीति *f.*, अभ्युदयः, विस्तारः. **2** उत्पत्ति *f.*, सं-प्र-भवः, जननं, जन्मन् *n.* **3** प्रौढि *f.*, प्रवृद्धता.

Growl, *v. i.* भष् 1 P, गर्ज् 1 P, रै 1 P, घुर्घुररवं कृ 8 U. *-s.* भषणं, गर्जितं, घुर्घुररवः.

Grub, *See* **Dig.** *-s.* कीटः, कृमिः, कोशस्थः. **2** वामनः, खर्वः, ह्रस्वः.

Grudge, *v.* ईर्ष्य् 1 P, द्रुह् 4 P, असूयति (D.), (with dat.): न सह् 1 A, न मृष् 4 P, 10; *See* **Envy.** **2** अकामतः-अनुत्साहं-अनिच्छया-कृ 8 U or दा 3 U or ग्रह् 9 U. **3** परि-देव् 1 A, परिदेवं 10 A, विलप् 1 P; *See* **Complain.** *-s.* असूया, मत्सरः, मात्सर्यं, ईर्ष्या. **2** वैरं, वैरभावः, विद्वेषः, चिर-दीर्घ-द्वेषः-वैरं. **-ingly,** *adv.* असूयया, साभ्यसूयं-सेर्ष्यं. **2** अकामतः, अनिच्छया, अनुत्साहं, कृच्छ्रेण, दुःखेन.

Gruel, *s.* यवागूः, उष्णिका, भाणा, विलेपी, तरला; ' sour g. ' आरनालकं, सौवीरं, कुल्माषाभिषुतं, अवंतीसोमं, धान्याम्लं, कुंजलं, कांजिकं.

Gruesome, *a.* भीषण **2** खेदकर.

Gruff, *a.* कर्कश, परुष, निष्ठुर, रूक्ष, कठोर, कटु, ककेशस्वभाव. **2** (Voice) गंभीर, गंभ्र.

Grumble, *v. i.* खिद् pass., असंतोषाद् विलप् 1 P or परिदेव् 1 A or परिदिव् 10 A, विषण्ण-*a.* भू 1 P, न तुष् 4 P, विषद् 1 P. **2** गर्ज् 1 P, स्तन् 1 P. **-ing,** *s.* विलापः, विलपनं, परिदेवनं-देवितं, असंतोषोद्गारः, विषादः. **2** गर्जनं, स्तनितं, गंभीरनादः-ध्वनिः-शब्दः.

Grume, *See* **Clot.**

Grumpy, *a.* दुःशील, उदासीन, उद्विग्न, विषण्ण, अंतःकुपित.

Grunt, *v. i.* गर्ज् 1 P. *-s.* **-ing,** *s.* गर्जितं, शूकरनादः-गर्जितं. **-ling,** *s.* बालशूकरः, शूकरशावकः.

Guarantee, *s.* प्रत्ययः, विश्वासः, प्रातिभाव्यं. **2** प्रतिभूः, लग्नकः, बंधकः. *-v. t.* Ex. by (*s.*); प्रातिभाव्यं दा 3 U, प्रतिभूः स्था 1 P; 'I g. you the security of your property ' त्वद्वित्तरक्षणेहं प्रतिभूस्तिष्ठामि.

Guard, *v. t.* सं-,परि-,रक्ष् 1 P; पा 2 P; पा c. (पालयति), त्रै 1 A, अव् 1 P, गुप् 1 P; *See* **Protect.** **2** वृ c., वार् 10, निं°; ' g. against ' अव-धा 3 U; सावधान-अवहित-*a.* भू; *See* **Beware.** *-s.* रक्षा, रक्षणं, गुप्तिं *f.*, गोपनं पालनं, त्राणं. **2** रक्षकः, रक्षिन् *m.*, रक्षिवर्गः, रक्षाधिकृतः, सैनिकः, परिचरः; वारणं, त्राणं, त्रं, in comp.; 'finger-g.' अंगुलित्रं, तलत्राणं, &c., 'arm-g. in shooting ' गोधा, तलं, ज्याघातवारणं; ' on one's g. ' सावधान-अप्रमत्त-अवहित-*a.*; ' off one's g. ' प्रमत्त *a.*; 'g.-room' रक्षकनिवासः, उद्घाटः. **-ed,** *a.* रक्षित, त्राण-त्र, &c. **2** (g.-ful) अवहित, सावधान, स्ववहित, समीक्ष्यकारिन्, समीक्ष्यकृत्. **-edly,** *adv.* सावधानं, विपृश्य, अवधानेन, स्ववहितं. **-er,** *s.* पालकः, रक्षकः, गोप्तृ *m.*, त्रातृ *m.*, पालः-लकः in comp. **-ian,** *s.* रक्षकः, रक्षितृ *m.*, गोप्तृ *m*, नाथः; 'orphan's g.' पितृस्थानीयः; 'g. deity' लोकपालः, दिक्पालः. **-ianship,** *s.* पालकपदं, रक्षा. रक्षणं.

Guerdon, *See* **Reward.**

Guess, *v. t.* ऊह् 1 A; अनु-मा 3 A, 2 P; आशंक् 1 A, तर्क् 10. *-s.* वि-,तर्कः, ऊहा, अभ्यूहः-हनं; अनुमानं, अनुमिति *f.*, शंका; ' your g. is plain ' प्रसन्नस्ते तर्कः.

Guest, *s.* अतिथिः, अभ्यागतः, प्राघूर्णकः, प्राघुणकः, आगंतुः, आवेशिकः, गृहागतः, आगंतुकः; ' friendly to g.s ' आतिथेय (यी *f.*).

Guide, *v. t.* नी 1 P, पंथानं-मार्गं (way, q. v.) दृश् c. or आ-उप-दिश् 6 P. **2** प्र-अनुशास् 2 P, निद्-उप-दिश्, विनि-यम् 1 P, प्र-णी 1 P, वि-धा 3 U; अधिष्ठा 1 P. *-s.* अध्वदर्शिन् *m.*, पुरोगः, सुखरः, मार्गोपदेशकः, नेतृ *m.*, नायकः, मार्गदर्शकः, उपदेशकः, निर्देशकः. **2** शास्तृ *m*, अध्यक्षः, अधिष्ठातृ *m.* **-ance,** *s.* नयः, नीति *f.*, मार्गदर्शनं, अध्वोपदेशः. **2** अनुसरणं, अनुवर्तनं.

Guild, *s.* श्रेणि-णी *f.*, निगमः, वाणिक्समाजः-संसर्गः. **2** संघातः, समाजः, गणः.

Guile, *s.* माया, कपटः-टं, छलं, व्याजः, कैतवं, शाठ्यं, छद्मन् *n.*; *See* **Fraud.** **-ful,** *a.* मायिन्, वचनशील, शठ, धूर्त, कापटिक (की *f.*), सव्याज, वंचक, मायान्वित, कितव. **-fully,** *adv.* सव्याजं, सकपटं, छद्मना, मायया. **-less,** *a.* निष्कपट, अकपट, अव्याज, अनुपधि,सरल, निर्व्यलीक, विमलास्मन्; *See* **Frank.** **-lessly,** *adv.* अमायया; निष्कपटं, निर्व्याजं, &c.

Guillotine, *s.* शिरश्छेदनयंत्रं.

Guilt, *s.* अपराधः, दोषः, पापं, पातकं, अघं, एनस् *n.*, पापकर्मन् *n.*, दुष्कृति *f.*, आगस् *n.*, दुरितं. **2** सदोषता, पापत्वं, अपराधिता. **-less,** *a.* निरपराध, अनपराधिन्, अनागस्, अपाप, निष्पाप; अकृतदोष, निर्दोष, अनघ, शुद्ध, पाप-दोष-हीन. **-lessly,** *adv.* निरपराधं, पापं-दोषं-विना. **-y,** *a.* पापिन्, अपराधिन्, सापराध, अपराद्ध, सपाप, पापकर्मन्, सदोष, कृतागस्, कृतापराध, दोष-पाप-वत्, पातकिन्, दुष्कृतिन्, पापात्मन्, पाप.

Guinea-worm, *s.* स्नायुकः.

Guise, *s.* वेशः-षः, वस्त्रं, परिधानं, रूपं, आकारः, छद्मन् *n.*; *See* **Disguise.**

Guitar, *s.* वीणा, वल्लकी, विपंची; सारंगी, पिनाकी; 'seven-stringed g.' परिवादिनी.

Gulf, *s.* अखातं, समुद्रवंकः, पुटभेदः. **2** अगाधं-अतल-स्पर्श-खातं, रंध्रं. **3** Whirlpool, q. v.

Gull, *v. i.* वंच् 10, प्रतृ c.; *See* **Cheat.** *-s.* सुप्रतार्यः, सुखं वंचनीयः. **2** जलकुक्कुटः, विश्वका; ' g.-catcher ' वंचकः, प्रतारकः. **-ery,** *s.* प्रतारणा, वंचनं-ना, छलं, कपटं.

Gullet, *s.* गलः, गलस्रोतस् *n.*, निगरणः.

Gully, *s.* प्रणालः-लीं, कुल्या, जलमार्गः, परि(रि)वाहः.

Gulosity, *s.* अतिभोजनं, घस्मरता, अत्याहारः.

Gulp, *v. t.* नि-गृ 6 P, ग्रस् 1 A. **2** उद्-गृ, उत्क्षिप् 6 P. *-s.* निगरणं, ग्रसनं. **2** उद्गिरणं, उद्गमः-मनं.

Gum, *s.* निर्यासः, रसः. **2** (Of teeth) दंतमांसं, दंतमूलं. **3** श्यान-सांद्र-द्रव्यं; ' g.-boil ' दंतव्रणः-विस्फोटः. **-my,** *a.* श्यान, सांद्र, निर्यासमय (यी *f.*).

Gumption, *s.* चातुर्यं, बुद्धि *f.*, ज्ञानं.

Gun, *s.* लोहसुषि *f.*, गुलि-गुलिका-प्रक्षेपिणी लोहनाडिः-डी *f.*, अग्न्यस्त्रं; ' g.-powder आग्नेयचूर्णं.

Gunny, *s.* शाणं.

Gurge, *See* **Whirlpool.**

Gurgle, *v. i.* घर्घररवं कृ 8 U, गद्गदं नद् 1 P, (कुहरेषु गद्गदनदद्दोदावरीवारयः U. 2).

Gush, *v. i.* निष्पत् 1 P, बहुशः स्रु 1 P or नि-स्यंद् 1 A or क्षर् 1 P; वेगात् निः-स्रु 1 P or प्रवृत् 1 A; तस्यास्तु मद्दर्शनादेव आबद्धधारमश्रु प्रावर्तत (D. K. II. 3) ' tears g. ed forth from her eyes in torrents &c.', उद्बाष्पे नयने जाते. *-s.* जलप्रपातः, उत्पीडः, वेगेन निःसरणं, प्रवृत्तिः *f.*

Gust, *s.* चंडवातः, वात्या, प्रकंपनः, जवानिलः, वायुवेगः, तीव्र-प्रबल-वातः-वायुः. **2** रुचि *f.*, आस्वादः, रसः. **-ful,** *a.* सरस, रुचिर. **-less,** *a.* विरस, अस्वादु. **-y,** *a.* पवनक्षिप्त, वातुल, वातमय (यी *f.*).

Gut, *s.* अंत्रं, पुरीतत् *n.*; शिरा, अंतनांडी. **2** उदरं, जठरः-रं. *-v. t.* अंत्राणि बहिष्कृ 8 U or निष्कृष् 1 P. **2** सर्वस्वं अपहृ 1 P.

Gutter, *s.* जलमार्गः, परि(रि)वाहः, प्रणालः-लीं.

Guttler, *See* **Glutton.**

Guttural, *a.* कंठ्य, कंठस्थ-स्थानीय.

Guzzle, *v. t* अतिमात्रं पा 1 P or ग्रस् 1 A or नि-गृ 6 P.

Gymnasium, *s.* व्यायामभूमि *f.* -शाला. **-Gymnastic,** *a.* व्यायामशील-पर-सेचिन्. **2** व्यायामसंबंधिन्; ' g. s ' व्यायामः, व्यायामविद्या, मल्लक्रीडा.

Gyna(e)cology, *s.* स्त्रीरोग-विज्ञान-शास्त्रं

Gyrate, *See* **Revolve.**

Gyre, *s.* मंडलं, आवृत्ति *f.*, चक्रगति *f.*

Gyves, *s.* निगडः-डं, शृंखला-लं, पाशः, बंधनं.

H.

Ha, *interj.* हा, अहो, अयि, बत, हंत.
Haberdasher, *s.* क्षुद्रपण्यविक्रयिन् *m.*
Habergeon, *s.* वक्षस्त्राणं, उरश्छदः.
Habiliment, *See* **Dress.**
Habit, *s.* **Dress,** q. v. **2** शीलं, भावः, प्रकृति *f.*, स्थिति *f.*, वृत्ति *f.*, अवस्था, दशा, स्वभावः. **3** अभ्यासः, नित्यप्रवृत्ति *f.*, आचारः, नित्यक्रिया, व्यवहारः, रीति *f.*, प्रचारः, क्रमः, आवृत्ति *f.*, अनुशीलनं; 'in the h. of' शील or वृत्ति in comp.; 'in the h. of stealing' चौर्यवृत्ति; मृगयाशील, &c.; 'bad h.' व्यसनं, दुर्गुणः; 'having bad h.s.' दुर्वृत्त, दुराचार, पापवृत्ति, भ्रष्टचरित्र. **-v. t. Dress,** q. v. **-able,** *a.*, वासक्षम, वसतियोग्य. **-ation,** *s.* वासः, धामन् *n.*, वसति *f.*, आलयः, गृहं, गेहं, आगारं; *See* **House. -ual,** *a* अभ्यासज, नित्य, सतत, अनुशीलित, आभ्यासिक-व्यावहारिक-स्वाभाविक (की *f*); 'a h. drunkard' नित्यपानासक्तः; 'a h. worker' क्रियावान्, कर्मसु उद्यतः कार्मः, कर्मशीलः. **-ually,** *adv.* नित्यं, सततं, यथाभ्यासं, यथारीति, यथाव्यवहारं. **-uate,** *v. t.* अभ्यस् 4 U, अनुशील् 10, शिक्ष् c., परिचि c., अभ्यस्त-परिचित *-a.* कृ. 8 U; 'h. ed to distress' ज्ञातदुःख, परिचितक्लेश, दुःखशील, दुःखाभिज्ञ.
Hack, *v. t.* खंडशः कृत् 6 P or छिद् 7 P, बहुलवशः व्रश्च् 6 P or विदॄ 10, व्यवच्छिद्. **-s.** प्रहारः, छेदः, आघातः. **2** पण्याश्वः, कदश्वः, जीर्णः अश्वः, सर्वप्रयोज्यः-सर्वसाधारणः-अश्वः. **3** हीनवृत्तिः, नीचकर्मकारिन् *m.* व्रातीनः, सर्वप्रयोज्यः, पण्यः.
Hackle, *s.* उमामार्जनी-शोधनी.
Hackney, *s. See* **Hack** (*s.*). **2** पण्यस्त्री, सर्वोपभोज्या. **-v. t.** हीनकर्मणि नियुज् 7 A, 10; 'h.-coach' पण्यवाहनं, पण्य-साधारण-रथः. **-ed,** *a.* जीर्ण, साधारण, बहुप्रयुक्त, सर्वसाधारण.
Hades, *s.* पाताललोकः, पातालं, अधोलोकः-भुवनं.
Hæ(e)morrhage, *s.* रक्तस्रावः.
Haft, *See* **Handle.**
Hag, *s.* जरती, स्थविरा, कुरूपिणी. **-Haggard,** *a.* परिकृश, क्षाम, क्षीण, क्षाम-शुष्कवदन, रूक्ष, उग्रदर्शन. **2** जरठ, स्थविर.
Haggle, *v. i.* क्रयविक्रयकाले विलंब् 1 A or विवद् 1 A.
Hagiology, सिद्धचरित्रलेखः.
Hail, *interj.* नमः, स्वस्ति, (with dat.); oft. ex. by जि 1 P; जयतु जयतु देवः 'h. to Your Majesty'; कुशलं भूयात्, अभिवादये. **-s.** शिलावृष्टि *f.*, करकानिपातः; 'h.-stone' करका वर्षोपलः, वर्षशिला, पयोघनः, घन-मेघ-कफः; 'h.-storm' करकासारः, शिलावर्षः. **-v. i.** उपलान् वृष् 1 P or निपत् c., करकासारं पत् c. **-v. t.** वंद् 1 A, अभिवद् 10 A, संबुध् c., आमंत्र् 10 A, आ-अभि-भाष् 1 A, आ-ह्वे 1 P. **2** (fig.) प्रीत्या-मुदा-अंगीकृ 8 U; अभिनंद् 1 P.
Hair, *s.* केशः, कचः, बालः, चिकुरः, कुंतलः; 'h. on the head' शिरोरुहः, मूर्धजः, शिरसिजः. **2** (Of the body gen.) रो(लो)मन् *n.*, तनूरुहः-हं, तनूजः; 'quantity of h.' कैश्यं, कैशिक. **3** केश(स)रः; 'whole collection of h.' केशकलापः-पक्षः-हस्तः-पाशः; 'h. hanging on the forehead' भ्रमरकाः; 'lock of h.' काकपक्षः, शिखंडकः; 'matted h.' जटा, सटा; 'a braid of h.' कबरी, केशवेशः; 'curled h.' अलकः, चूर्णकुंतलः; 'braided h.' वेणि-णी *f.*, धम्मिल्लः; 'crest-h.' शिखा, चूडा, केशपाशी; 'clean h.' शीर्षण्यः, शिरस्यः, 'h.-broom or brush' केशमार्जनी-शोधनी; 'h.-dressing' केशरचना-संस्कारः; 'even a h.'s breadth, रेखामात्रमपि; 'a h.-breadth escape' कथमपि लब्धा मुक्तिः. **-less,** *a.* अकेश, केशहीन, विकेश. **-y** *a.* लोमश, लोमावृत प्रचुर-बहु-लोमन्, लोममय (यी *f.*), लोमवत्, लोमपूर्ण, केशव, केशिन्, केशिक.
Halberdier, *s.* प्रासिकः, शाक्तीकः.
Halcyon, *s.* मत्स्यरंगः. **-a.** शांत, निरुद्वेग, निराकुल, प्रसन्न, अक्षुब्ध, निर्वात.
Hale, *a.* सुस्थ, नीरोग, कल्य, निरामय, नीरुज्-ज, आविष्याविरहित. **-v. t.** आकृष् 1 P; *See* **Pull.**
Half, *a.* अर्ध, सामि in comp.; 'h. done' सामिकृतं. **-s.** अर्धः-र्धं, अर्धभागः, अर्धांशः; in comp. ex. by अर्ध; अर्धांग, पूर्वार्धः, &c.; 'a year and a h.' सार्धवत्सरः; 'h. eaten' अर्धभुक्त; अर्धविवृत, अर्धच्छिन्न, &c.; 'h.-brother' वैमात्रेयः, सापत्नः, अन्योदर्यः, वैमात्रः; h.-blood' भिन्नोदर, भिन्नगर्भ, अन्योदर्य; 'h. dead' मृतकल्प-प्राय, मरणोन्मुख, आसन्नमृत्यु, मुमूर्षु, कंठगतप्राण; h.-hearted' निरुत्साह, उत्साहहीन, आस्थारहित, 'h. moon' अर्धेंदुः, चंद्रार्धः; 'h.-sister' वैमात्रेयी, वैमात्री, अन्योदर्या; 'h. starved' क्षुधावसन्नप्राय, क्षुत्क्षामकल्प; 'h. way' अर्धमार्गे-पथे, मध्यमार्गे; 'h. year' अर्धवर्षं, 'h. yearly' षाण्मासिक-आर्धवार्षिक (की *f.*); 'h. a bread is better than no loaf' सर्वनाशे समुत्पन्ने अर्धं त्यजति पंडितः or अर्धेन कुरुते कार्यं.
Hall, *s.* कक्षा, मंडपः, बाह्यकोष्ठः.
Halloo, *interj.* हंहो, अहो, अरे, अये, भोभोः. **-v. t.** उच्चैः शब्दायते (D.), दूराद् उत्क्रुश्-आह्वे, 1 P or उद्-घुष् 10.

Hallow, *v. t.* पवित्रीकृ 8 U, पूज् 10, मह् 1 P, 10, अर्च् 1 P, 10. **2** संस्कृ, प्रोक्ष् 1 P, अभिषिच् 6 P.
Hallucination, *s.* मतिविभ्रमः; माया, मोहः, भ्रमः, व्यामोहः, वंचना, इंद्रजालं.
Halm, *s.* पलालः-लं, तृणं.
Halo, *s.* प्रभा-तेजो-मंडलं, परिवेषः-शः, परिधिः, द्युति or दीप्ति-मंडलं-चक्रं-माला, 'h. crown of silver light' रजतधवलप्रभामंडलं; 'with a h. of brilliant lustre' स्फुरत्प्रभामंडल *a.*
Halser, *s.* नौगुणः-रज्जु *f.*
Halt, *v. i.* निविश् 6 P, अव-स्था 1 A, प्रयाणभंगं कृ 8 U, अध्वमध्ये स्था. **2** विरम् 1 P, विश्रम् 4 P. **3** लंग् 1 P. **-a.** पंगु, गतिविकल, श्रोण. **-s.** निवेशः, अवस्थिति *f.*, अवस्थानं, प्रयाणभंगः, याननिवृत्ति-विरति *f.*; विश्रामः; 'h. ing place' निवेशस्थानं. **2** लंगनं.
Halter, *s.* पाशः, गुणः, रज्जु *f.*, कंठपाशः. **-v. t.** कंठपाशेन बंध् 9 P or संयम् 1 P.
Ham, *s.* जंघा, प्रसृता. **2** वल्लूरं-रः. **3** मंदिरः.
Hamadryad, *s.* वन-तरु-देवता.
Hamlet, *s.* ग्रामः, क्षुद्रग्रामः, कुग्रामः, पल्लि-ल्ली *f.*
Hammer, *s.* मुद्गरः, घनः, अयोघनः, द्रुघणः-नः. **-v. t.** बलेन-ताडनेन-प्रविश् c. **2** मुद्गरेण तड् 10 or प्र-हृ 1 P. **-v. i.** सोद्योगं यत् 1 A or परिश्रम् 4 P. **-ing,** *s.* मुद्गराघातः.
Hammock, *s.* प्रेंख, दोला, प्रेंखोलनं.
Hamper, *s.* पेटिका, पेटकः, पारंडः, पिटः, कंडोलः. **-v. t.** प्रति-नि-वि-रुध् 7 U, प्रति-वि-हन् 2 P, कुंठ् 10, बाध् 1 A, निघ्नयति (D.), स्तंभ् 9 P, प्रतिबंध् 9 P. **-ed,** *a.* कुंठित-निरुद्ध-गति, प्रतिहत, निरुद्ध, बाधित, कुंठित, प्रतिबद्ध.
Hamstring, *s.* मंदिराशिरा.
Hand, *s.* हस्तः, पाणिः, करः, शयः, पंचशाखः, भुजादलः. **2** पार्श्वः, भागः, पक्षः. **3** करणं, विधानं, चेष्टा, क्रिया, व्यापारः. **4** वशः-शं, अधिकारः, शक्ति *f.*, प्रभुत्वं. **5** कर्तृ *m.*, कारः-कारकः in comp.; कर्मकरः. **6** प्रदेशिनी, सूचिनी; कीलः; सूचि *f.* **7** लिपि *f.*, लिबि *f.*, अक्षरसंस्थानं, लिखितं; 'h. to hand' हस्ताहस्ति, बाहूबाहवि, मुष्टीमुष्टि; 'h. to h. fight' नियुद्धं, बाहुयुद्धं; 'on the one h.-on the other h.' एकतः-अन्यतः, इतः-इतः, एकंच-अपरंच; oft. by च-च; 'on the other h.' विपर्यये, प्रत्युत, तु, तावत्; 'if on the other h.' अथ, यदि; 'on all h.s' सर्वथा, सर्वत्र; 'at h.' प्रत्यासन्न, समीपवर्तिन्, आसन्न, संनिहित, समीपं-पे; 'in h.' हस्ते, हस्तगत, हस्तवर्तिन्, करतलगत; 'subject in h.' प्रकृतं, प्रस्तुतं; 'h. in h.' एकत्र, समवायसंबंधेन; सह, सहितं, समं, संभूय; 'to give a helping h.' हस्तावलंबं दा 3 U; 'given a helping h.' दत्तहस्तावलंब, 'living from h. to mouth' उत्पन्नभोजिन्; दुर्गत, कृच्छ्रगत; 'on h.' अनुपयुक्त, अव्यापृत; (of books &c.) अविक्रीत; 'sword in h.' खड्गहस्त, कृपाणपाणि; 'off-h.' आशु, अविचार्य, अविलंबं; आकस्मिक-प्रत्युत्पन्न-अचिंतित-पूर्व- *a.* 'out of h.' सपदि, तत्क्षणात्; 'to take in h.' आरभ् 1 A, प्रस्तु 2 U, उपक्रम् 1 A; lend a h. उपकृ 8 U, अनुग्रह् 9 P, साहाय्यं कृ; 'lay h.s on' धृ 1 P, ग्रह्, आधृष् c., परामृश्-स्पृश् 6 P, 'to have a h. in' सहकारिन् *a.* भू, सहायः भू; 'have or get the upper h.' अभि-भू, प्र-भू, अतिरिच् pass, 'under-h.' निंद्य, छलेन, सकपट; 'clap the h.s' करतालं वद् c.; 'to support with the h.' करेण अव-आ-लंब् 1 A, हस्तावलंबं दा; 'the open or extended h.' चपेटः, चर्पटः, प्रहस्तः, प्रतलः; 'hollow of the h.' करपुटं, हस्तकोषः; 'two open h.-s joined together' संहततलः, प्रतलः; 'folded h,' प्रसृतिः; 'folded h.s joined' अंजलिः; 'clenched h.' मुष्टि *m. f.*; 'h. with the fist clenched' रत्निः. **-v. i.** हस्ते-करे-निक्षिप् 6 P or दा 3 U or ऋ c. (अर्पयति); 'h. down' परंपरया-क्रमेण-संचर् c. or संक्रम् c.; 'to be h. ed down' परंपरया आगम् 1 P; उप-, संक्रम् 1 U, 4 P, (यानि भगवतः कृशाश्वात्कौशिकमृषिमुपसंक्रांतानि U. 1;); (in sacred texts) आ-समा-म्ना pass.; 'h.-book' हस्तलेखं दुस्तरं; लघुग्रंथः; 'h.-cuff' हस्तपाशः-निगडः, करबंधनं; (*v. t.*) पाशेन हस्तौ बंध् 9 P or संयम् 1 P or यंत्र् 10; 'h.-kerchief' करवस्त्रं; 'h.-maid' चेटी, दासी, परिचारिका; 'h.-mill' हस्तचालिता पेषणी; 'h.-weapon' हस्तायुधं, करशस्त्रं; 'h.-writing' लिखितं, लिपिबि *f.*, अक्षरसंस्थानं; 'one's own h.-writing' हस्तलेखः, स्वहस्ताक्षरं. **-ful,** *s.* मुष्टि *m. f.*; 'a h. of grass' तृणमुष्टिः. **2** अल्पस्तोक-संख्या, oft. by अल्प-स्तोक-*a.* **-Handicraft,** *s.* शिल्पं, हस्तलाघवं, हस्तशिल्पं-कर्मन् *n.* शिल्पविद्या; 'h. s-man' शिल्पिन् *m.*, शिल्पकारः, कर्मकरः. **-Handiwork,** *s.* हस्तकृतं कर्म. **-Handy,** *a.* दक्ष, लघुहस्त, करदक्ष, सुप्रयोगवत्, कुशल, निपुण, चतुर, पटु, क्षिप्रकारिन्. **2** सुखनेय, लघुभार, अदुर्वह. **3** आसन्न, निकट, प्रत्युत्पन्न. **-ly,** *adv.* हस्तलाघवेन, दक्षतया, सपाटवं, युक्त्या, चतुरं, दाक्ष्येण. **-ness,** *s.* दक्षता, हस्तलाघवं, करदक्षता, कौशलं, चातुर्यं, नैपुण्यं.
Handle, *s* मुष्टि *m. f.*, दंडः, कर्णः, वारंगः, तलः-लं. **2** (Of swords) त्सरुः, सरुः. **3** (Of ploughs) ईषादंडः; 'to give h.' अवसरं-अवकाशं-दा 3 U; 'serve as a h.'

उपकरणीभू 1 P. -*v. t.* (A subject) विचर् c., विमृश् 6 P, निरूप् 10, परीक्ष् 1 A, पर्यालोच् 10; *See* **Examine.** **2** प्रयुज् 7 A, 10; वृत् 1 A, व्यव-हृ 1 P, आचर् 1 P (with loc.). **3** प्र-णी 1 P, वि-धा 3 U, निर्वह् c. **4** हस्तेन स्पृश्-परामृश् 6 P or आ-समा-लभ् 1 A.

Handsel, *s.* प्रथमव्यवहारः विक्रयः.

Handsome, *a.* कांतिमत्, सुंदर (री *f.*), रूपवत्, सुरूप, चारु, शुभ, शोभन, कांत, वाम, सुगात्र (त्री *f.*), सुदृश्य, सु in comp.; *See* **Beautiful.** **2** विपुल, यथेष्ट, प्रचुर. **3** उदार, वदान्य, स्थूललक्ष्य ; ' h. is that h. does ' आचारसौष्ठवमेव परमार्थतः सौष्ठवमित्युच्यते. **-ly,** *adv.* चारुतया, शोभनं, सु pr. **-ness,** *s.* कांति *f.*, रूपं, लावण्यं, शोभा.

Hang, *v. t.* बंध् 9 P, नि-धा 3 U, अनु-वि-संज् (षंज्) 1 P, आ-अव-लंब् c., आंदोलयति (D.); ' hung by a loop ' काचित, शिक्यित. **2** उद्-बंध्, उद्बध्य व्या-पद् c. or हन् c. (घातयति). **3** आ- अव-नम् c. (नमयति), नम् c., नम्रीकृ 8 U, नम्रतां नी 1 P; *See* **Bend;** ' with his lotuslike face hung down ' अवनतमुखपुंडरीकः; ' h.-ing the head ' अवनतमुख-शिरस्, नतमूर्धन्. **4** आच्छद् 10, वि- भूष् 10, प्र-साध् c., मंड् 10, अलंकृ 8 U, परिष्कृ. -*v. i.* प्र-अव-लंब् 1 A, लुल् 1 P, लुठ् 6 P, 1 A, चंच् 1 P, दोलायते (D.), पेंख् 1 P, उद्-बंध् pass ; ' h. between ' त्रिशंकुरिवांतरा तिष्ठ (S. 2). **2** (Stick) आसंज् pass., लग् 1 P, अनुबंध् pass., संलग्नीभू 1 P. **3** (On, upon) अवलंब्, आ-श्रि 1 U, उप-अनु-जीव् 1 P: *See* **Depend;** ' thereby h. s a tale ' तदनुविद्धा काचिदाख्यायिका वर्तते; ' h. over ' उन्नम् 1 P, उप-स्था 1 U, प्रत्यासद् 1 P. **-er,** *s.* उद्बंधकः; ' h. on ' आश्रितः, पादसेविन् *m.*, पीठमर्दः, अनु-उप-जीविन् *m.*, पराधीनः, परपिंडादः. **-ing,** *s.* उद्बंधनं. **2** परिच्छदः, वसनं; जवनिका, प्रच्छदपटः, चित्रयवनिका. **-Hangman,** *s.* घातकः, दंडपाशिकः, वध्यापुरुषः.

Hank, *s.* काष्ठवलयः. **2 Cheat,** q. v.

Hanker, *v. i.* अभिलष् 1, 4 P, स्पृह् 10, वांछ् 1 P, उत्कंठ् 1 A; लुभ् 4 P; *See* **Long;** oft. by उत्क, उत्सुक, पर्युत्सुक, पर, तत्पर, परायण, in comp. **-ing,** *s.* अतिस्पृहा, उत्कंठा, औत्सुक्यं, अत्यभिलाषः.

Hap, *s.* दैवं, दैवयोगः-घटना, यदृच्छा. **-less,** *a.* अधन्य, मंदभाग्य, दुर्दैव. **-ly,** *adv.* दैवात्, दैवयोगात्, दैववशात्.

Haphazard, *a.* असमीक्ष्य, अविचार्य; दैवायत्त, दैवाधीन.

Happen, *v. i.* वृत् 1 A, भू 1 P. घट् 1 A; संवृत्, सं-भू, सं-समा-पद् 4 A. स्था 1 P, आ-सं-पत् 1 P, प्रसंज् pass. **2** अकस्मात्, यदृच्छया, दैवात्, दैववशात् with verbs; *See* **Chance.**

Happy, *a.* सुखिन्, प्रीत, हृष्ट, सानंद, सुखित, सुखभाज्, प्रमुदित, आह्लन्न, निर्वृत, निश्चिंत, तृप्त, संतुष्ट. **2** भाग्यवत्, शुभान्वित, शुभंयु, समृद्ध, श्रीमत्, निरापद्, कुशलिन् निर्वृतिमत्, क्षेम; धन्य, कृतिन्, कृतार्थ; ' h. is it for me that &c.' इदमेव तावन्मम परमभाग्यं मन्ये. **3** शुभ, शिव, कल्याण (णी *f.*), मंगल, पुण्य, भद्र, भव्य, आनंदप्रद, भावुक, प्रशस्त; ' a h. result ' सुफलं, कल्याणोदर्कः. **-ly,** *adv.* सुखेन, सुखं, निर्विघ्नं, स्वास्थ्येन, यथासुखं. **2** दिष्ट्या, दैवात्, अकस्मात्, यदृच्छया, दैववशात्, सौभाग्येन, पुण्योदयात्. **-ness,** *s.* सुखं, सौख्यं, आनंदः, धन्यता, हर्षः, कृतार्थता शर्मन् *n.*, संतोषः, निर्वृति *f.*, श्रीः, संपद् *f.*, पुण्योदयः. **2** कल्याणं, भद्रं, क्षेमः-मं, शिवं, स्वास्थ्यं, कुशलं.

Harangue, *s.* उच्चैः वचस् *n.*, तारस्वरेण भाषणं, सालंकारं वचनं. -*v. i.* सालंकारं-सदर्प-वद् 1 P or भाष् 1 A. **-er,** *s.* वागीशः, प्रवचनपटुः, वाक्पटुः.

Harass, *v. t.* अर्द् 1 P or c., व्यथ् c. (व्यथयति), पीड् 10, क्लिश् 9 P, दु 5 P, सं-परितप् c., उपहन् 2 P, विप्र-कृ 8 U, नि-कृ, उपप्लु 1 A, बाध् 1 A, प्रतिरुध् 7 U. **2** खिद् c., श्रम् c., क्लम् , c. आयस् c., ग्लै c. (ग्लग्ला-पर्यंति). **-er,** *s.* पीडकः, उपप्लावकः, खेदकः, आयासकः. **-ing,** *a.* दुःख-क्लेश-कर (री *f.*), पीडाप्रद, क्लेशावह.

Harbinger, *s.* अग्रे(ग्र)सरः, अग्रदूतः. अग्रपुरांगः-गामिन् *m.* वार्ताहरः, संदेशहरः (of news); ' h. of spring ' वसंताग्रदूतः; ' antecedent good omens are the h. s of the coming happiness ' आवेदयंति प्रत्यासन्नमानंदं अग्रजातानि शुभानि निमित्तानि (Ka. 65).

Harbour, *s.* खातं, क्रोडः, नौकाशयः. **2** शरणं, गति *f.*, आश्रयः, संश्रयः, अवकाशः, वासस्थानं. -*v. t.* वस् c., आश्रयं-वासस्थानं-दा 3 U, सत्कृ 8 U. **2** धृ 1 P, 10, मनसि कृ or उपलभ् 1 A or ग्रह् 9 U or नि-धा 3 U. **3** आश्रि 1 U, निवस् 1 P. **-age,** *s.* आश्रयः; *See* (*s.*). **-less,** *a.* निराश्रय, अगतिक, अशरण.

Hard, *a.* दृढ, घन, संहत, कठिन, दृढसंधि, कठोर, कर्कश, कीकस; ' becoming h. (solid) ' कठिनतामापद्यमान. **2** उग्र, दारुण; निर्घृण, निर्दय, क्रूर, नृशंस, निष्ठुर, कठोर; ' oh h. fate ' अहो दारुणो दैवदुर्विपाकः, अहो वामता-वक्रता-विधेः, अहो वक्रं विधेः क्रीडितं. **3** (Lesson) दुर्बोध, असुगम, दुर्ज्ञेय, गहन. **4** क्लेशावह, दुःखद,

व्यथा-पीडा-कर (री *f.*), क्लेशिन्. **5** (Sound) कर्कश, कठोर, रूक्ष, परुष. **6** अननुकूल, वाम, विरुद्ध, प्रतिकूल, प्रतीप, वक्र. **7** असुकर, दुष्कर, कष्ट, दुःसाध्य, कठिण, दुर्-दुःख-कष्ट in comp.; *See* **Difficult.** **8** शुक्त, अम्ल. -*adv.* प्रयत्नतः, आयासेन, सोद्योगं, बलेन, बलवत्, सोत्साहं, प्रसभं, तीक्ष्णं, सप्रयत्नं, सोद्यमं. **2** दुःखेन, कष्टेन, कृच्छ्रेण, प्रयासेन, दुर् pr. **3** त्वरितं, शीघ्रं; ' h.-pressed by hunger ' क्षुधया नितरां-बलवत्-पीडित, प्रबलक्षुधावसन्न; ' h. by ' समीपे-पे, अनतिदूरे-रे, निकटे-टे, उपांते, आरात्; ' h.-drinker ' पानरतः, अतिपानासक्तः; ' h.-earned ' कष्टोपार्जित, श्रमेण लब्ध; ' h.-featured ' दुर्मुख. कदाकार; ' h. fisted ' दृढ-बद्ध-मुष्टि, अमुक्तहस्त, व्ययपराङ्मुख; ' h.-hearted ' कठोर, नृशंस, क्रूर, निर्दय, निर्घृण, कठोर-कठिण-हृदय, पाषाण-वज्र-हृदय, अयोहृदय, वज्रमय (यी *f.*), निरनुक्रोश; ' h.-ware ' लोहभांडानि (pl.). **-en,** *v. t.* कठिनीकृ 8 U, दृढीकृ, घनीकृ, कृ with (*a.*). **-ly,** *adv.* कथं कथमपि, कष्टेन, दुःखेन, कष्टं, कृच्छ्रेण, नैव. **-ness,** *s.* काठिन्यं, दृढता, कठोरता, निष्ठुरता, दुर्बोधता, दुष्करत्वं, उग्रता, &c. **-ship,** *s.* कष्टः-ष्टं, क्लेशः, दुःखं, पीडा, बाधा, काय-देह-क्लेशः; कृच्छ्रं, आयासः, खेदः. **-Hardy,** *a.* साहसिन्, प्रगल्भ, शूर, वीर, धीर, निर्भय, प्रतिभानवत्, साहसिक (की *f.*), विक्रांत, निःशंक. **2** दृढ or कठिन-देह-शरीर-काय; ' of a h. frame सिंहसंहनन; वज्रदेह. **-hood,** *s.* वीर्यं, शौर्यं, साहसिकता, प्रागल्भ्यं, साहसं; धृष्टता, प्रतिभा, निर्लज्जता. **-ness,** *s.* शौर्यं, वीर्यं, देहकाठिन्यं.

Hare, *s.* शशः, शशकः; ' h.-brained ' अविमृश्यकारिन्, चपलबुद्धि, भ्रांतचित्त, साहसपर.

Harem, *s.* अवरोधः-धनं, शुद्धांतः, अंतःपुरं, अवरोधगृहं, स्त्रीगृहं; ' men of the h. ' अवरोधः, परिग्रहः, अं[illegible]रं.

Hark, *interj.* ननु, [illegible], आकर्णय, अवधीयतां.

Harlequin, *s.* वैहासिकः, भंडः, विदूषकः.

Harlot, *s.* वेश्या, पण्यस्त्री, वार-स्त्री-योषित्-योषा, पण्यांगना, गणिका, वारांगना, रूपाजीवा; बंधकी, पुंश्चली, कुलटा. **-ry,** *s.* वेश्यावृत्ति *f.*, वेश्यासेवा.

Harm, *s.* क्षति *f.*, हिंसा, अपायः, नाशः, पीडा, बाधा, अपचयः, अपकृति *f.*, विरोधः, अपकारः, हानि *f.*, उपद्रवः. **2** दोषः, अपराधः, पापं, नियमव्यतिक्रमः. -*v. t.* दु 5 P, क्लिश् 9 P, अर्द् 1 P or c., हिंस् 7 P, उपद्रु 1 P, पीड् 10, बाध् 1 A, अपकृ 8 U, उपहन् 2 P, द्रुह् 4 P (with dat.), क्षण् 1 P, वि-प्र-कृ. **-ful,** *a.* हिंस्र, अपकारिन्, उपद्रविन्, हिंसक, अपकारक, हिंसात्मक, क्षतिकारक; घातुक, शरारु, शारुक (animals). **-less,** *a.* अनपकारिन्, अहिंस्र, निरुपद्रव, अहिंसक, अघातुक. **2** निर्दोष, निरपराध, निष्पाप. **-lessness,** *s.* अहिंसा, अद्रोहः, अनपकारः, हिंसात्यागः. **2** निरपराधता.

Harmony, *s.* तालैक्यं, स्वरैक्यं, स्वरसंगः, एकतालः-नः; ' the triple h. ' तौर्यत्रिकं. **2** कलता, सुश्राव्यता, स्वरमाधुर्यं, सुस्वरता. **3** संवादः, अविरोधः, ऐक्यं, एकता, संगः, संयोगः, आनुरूप्यं, सादृश्यं; ' h. of thought or mind ' चित्तैक्यं, संमति *f.*, एकचित्तता, मतसंवादः. **4** स्नेहभावः, प्रीति *f.*, मैत्र्यं, स्नेहः. **-ic,-ical,** *a.* एकताल-न, सम-एकस्वर, सुस्वर. **-ize,** *v. t.* सदृशीकृ 8 U. **2** स्वरैक्यं-तालैक्यं-उत्पद् c. -*v. i.* सदृशीभू 1 P, एकी-तुल्यी-भू, सं-वद् 1 P, न विरुध् pass. **-ous,** *a.* एकताल-न, एक-सम-स्वर, एकस्वन, संगतस्वर-स्वन, एकलय. **2** मधुरस्वर-स्वन, सुस्वर, सुखश्रव, श्रोत्राभिराम, सुश्राव्य, श्रुतिसुख, कल, श्रवणसुभगं. **3** संवादिन्, सदृश (शी *f.*), अविरुद्ध, अनुगुण, अनुरूप. **-ously,** *adv.* एकस्वरेण-स्वनेन. **2** मधुरस्वरेण-स्वनेन, कलं, मधुरं, सुस्वरं. **3** चित्तैक्येन, अविरोधेन.

Harness, *v. t.* सज्जीकृ 8 U, सन्नह् 4 P or c., सज्ज *a.* कृ. **2** (रथे) युज् 7 U, 10, नि-आ-सम्°. -*s.* सज्जा, सन्नाहः, प्रसाधनं, परिच्छदः. आभरणं. **2** अश्वसज्जा.

Harp, *s.* वल्लकी, वीणा, सारंगी, विपंची. -*v. i.* वीणां वद् c., ' praise by h. ing ' उपवीणयति (D.); ' h. on ' पुनरुक्त्या-पौनःपुन्येन-वद् 1 P, प्रपंचयति (D.). **-er,** *s.* वीणावादकः.

Harpoon, *s.* तिमिवेधनी. **-er,** *s.* तिमिवेधकः

Harpy, *s.* राक्षसी.

Harridan, *s.* वृद्धवेश्या, जरती गणिका.

Harrow, *v. t.* अत्यंतं पीड् 10 or तुद् 6 P. संतप् c., प्रबाध् 1 A; *See* **Grieve.** **2** लोष्टानि भिद् 7 P or विद् 10 -*s.* कोटि(टी)-शः, लोष्टभेदनः. **-ing,** *a.* हृदय -मर्म-च्छिद्, अरुंतुद्, हृदिस्पृश्, अतिदुःखावह.

Harry, *See* **Harass.**

Harsh, *a.* कर्कश, परुष, रूक्ष, निष्ठुर, कठोर, उग्र, कठिन, क्रूर, कटु; ' h. to the touch ' अमसृण, दुःखस्पर्श, रूक्ष; ' h. to the taste ' शुक्त, कषाय; ' h. to the ear ' विस्वर, कर्णकटु, दुःश्राव्य, परुष, कर्कश. **-ly,** *adv.* निष्ठुरं, परुषं, रूक्षं; क्रौर्येण, उग्रं. **-ness,** *s.* पारुष्यं, कार्कश्यं, रूक्षता, काठिन्यं.

Harslet, *s.* शूकरांत्राणि (pl.).

Hart, *s.* मृगः, हरिणः, एणः, कुरंगः-गमः.

Harum-scarum, *a.* प्रमादिन्, असावधान, साहसिन्.

Harvest, *s.* लवः, शस्यसंग्रहकालः, शस्यलवन-संचय-समयः. **2** शस्यानि, संगृहीत-लून-शस्यं. **-v.** *t.* शस्यं लू 9 U or संग्रह् 9 P or संचि 5 U; 'h.-lord' प्रधानः शस्यसंग्राहकः; 'h.-man' शस्यसंग्राहकः-छेत्तृ *m.*

Hash, *See* **Hack.**

Haste, *s.* त्वरा, वेगः, जवः, तूर्णं *f.*, संभ्रमः, सीमता, क्षिप्तता, तरत् *m.*, रभसः-सं, त्वरित-आशु-गति *f.*- गमनं. **-en,** 'make h.' त्वर् 1 A, सत्वरं आशु-गम् or चल् or धाव् 1 P; 'h. towards' अभिद्रु 1 P. **-v.** *t.*, **-en,** त्वर् c. (त्वरयति). **-tasty,** *a.* सत्वर, त्वरित, क्षिप्र, तूर्ण, शीघ्र, त्वरावत्, द्रुत, अविलंचिन्, आशुकारिन्. **2** साहसिन्, अविमृश्य-असमीक्ष्य-कारिन् or-कृत्. **3** शीघ्र-कोपिन्, सुलभकोप. **-Hastily,** *adv.* शीघ्रं, क्षिप्रं, सत्वरं, अविलंबं, त्वरितं, आशु, झटिति, द्रुतं. **2** सहसा, सरभसं, ससंभ्रमं, वेगेन. **3** कोपेन, संरंभेण.

Hat, *s.* शिरस्त्राणं, मस्तकावेष्टनं, शिरोभूषणं.

Hatch, *v. t.* उत्पद् c., उद्भू c., जन् c., निर्गम् c. **2** घट् c. (घटयति), चिंत् 10, निरूप् 10; *See* **Contrive.** **-s.** पक्षिशावक-गणः. **2** चिंतनं, घटनं-ना. **3** नौझर्खं.

Hatchel, *s.* अतसीमार्जनी-शोधनी.

Hatchet, *s.* परशुः, कुठारः, वृक्षादनी, परश्वधः, वृक्षभेदित्र् *m.*; h. for cutting stones' दं(ते)-कः, पाषाणदारणः.

Hate, *v. t.* वि-,द्विष् 2 U, गुप् desid. (जुगुप्सते) (with abl.), गर्ह् 1, 10 A, वि-प्र-°, कुत्स् 10 A, द्रुह् 4 P (with dat.), अभि-द्रुह् (with acc.). **-s.** **-Hatred,** *s.* वि-द्वेषः, जुगुप्सा, गर्हा, कुत्सा, घृणा, अप्रीति *f.* **-er,** *s.* द्वेष्टृ *m.*, द्विष्-द्वेषिन् *m.*, द्वेषणः. **-ful,** *a.* विद्विष्ट, गर्हित, घृणार्ह, गर्ह्य, विद्वेष्य, अक्षिगत, कुत्सित.

Haughty, *a.* उद्धत, उत्सिक्त, मत्त, सगर्व, गर्वित, मानिन्, मानवत्, दृप्त, सदर्प, साटोप, साहंकार, अवलिप्त, मदोद्धत, मदोद्वृत्त; 'to be h.' दृप् 4 P. **-ly,** *adv.* सगर्वं, सदर्पं, सावलेपं, उद्धतं. **-ness,** *s.* उत्सेकः, दर्पः, औद्धत्यं, गर्वः, मदः, अहंकारः, अवलेपः, मानः, अभिमानः, आटोपः, प्रागल्भ्यं.

Haul, *v. t.* कृष् 1 P, हृ 1 P, आनी c. **-s.** आकर्षः, हरणं.

Haulm, Haum, *s.* पलालः-लं.

Haunch, *s.* जघनं, नितंबः, कटि-टी *f.*, श्रोथः, श्रोणि-णी *f.* **2** उत्संगः, अंकः.

Haunt, *v. t.* सदा-नित्यशः (Frequently, q. v.) आ-श्रि 1 U or सेव् 1 A or अभि-गम् 1 P; जुष् 6 A, उपसृज् pass.; आक्रम् 1 U, 4 P; 'h. ed by devils' भूतोपसृष्ट, पिशाचसेवित-जुष्ट. **-s.** नित्यस्थानं, नित्यागमनस्थानं; आश्रयः, निलयः.

Hauteur, *s.* दर्पः, गर्वः, आटोपः, *See* **Haughtiness.**

Have, *v. t.* ex. by भू 1 P, अस् 2 P, वृत् 1 A, विद् 4 A (with gen. of possessor); भू 1 P, 10, धा 3 U, भृ 3 U; 'I h. two sons' मम पुत्रौ स्तः-विद्येते, &c.; 'he had many sons by Gangā' गंगायां स बहून् पुत्रानुदपादयत्. **2** (With inf.) by pot. pass. part.; 'I h. to go' मया गंतव्यं. **3** प्राप् 5 P, लभ् 1 A, आ-सद् c.; *See* **Get,** 'h. one's own way' स्वातंत्र्यमवलंब् 1 A, यथाकाम-स्वरुच्या-वृत्, कामचारेण् *a.* भू 4 (Make) Ex. by causal of verbs; 'I would h. you go' त्वं गच्छेरित्यहमिच्छामि or त्वां गमयेयं. **-ing,** *a.* ex. by the terminations वत्, मत्, मिन्, इन्, विन्, वल्, &c. or by उपेत, धारिन्, युक्त, अन्वित, सनाथ, उपपन्न, भृत् in comp.; or by Bah. comp.; 'h. three eyes' त्रिलोचनः; धनवत्, रजस्वल, गुणोपेत, &c. **-s.** भोगः, भुक्ति *f.*, स्वत्वं, सत्ता, अधिकारः, वशः-शं, धरणं.

Haven, *See* **Harbour.**

Havoc, *s.* प्रमाथः, निर्दलनं, निर्मथनं, निमाराः, वि-प्र-ध्वंसः, संहारः, उच्छेदः, महाप्रलयः, महाविप्लवः, संक्षयः. **-v.** *t.* उच्छिद् 7 P; *See* **Destroy.**

Hawk, *s.* श्येनः, पत्रिन् *m.*, शशादनः, कपोतारिः, खगांतकः, 'h.-eyed' सूक्ष्म-दूर-दृष्टि. **2** उत्कासनं, श्लेष्मोत्क्षेपः. **-v.** *i.* उत्कासं 1 A, श्लेष्माणं उत्क्षिप् 6 P. **2** पक्षिणः ग्रह् 9 U or भृ 1 P. **-v.** *t.* घोषणापूर्वं विक्री 9 A. **-er,** *s.* श्येनपालकः-पोषकः.

Hay, *s.* शुष्कतृण-शूर्ण-घासः; 'make h. while the sun shines' अनुकूलेऽवसरे स्वकार्यसिद्धिं कुरु or इष्टसिद्धिं संपादय; 'h.-cock or-stack' शुष्कतृणराशिः- उत्करः-चिति *f.*; 'h.-market' तृणविक्रयस्थानं.

Hazard, *s.* संकटं, संशयः, शंका, संदेहः, विकल्पः. **2** दैवं, दैवयोगः-घटना, दैवगति *f.*; 'h. of life' जीवितसंशयः; 'at any h.' सप्तपरिस्थितेपि संशये. **-v.** *t.* संकटे-संशये-निक्षिप् 6 P or पत् c., संशयस्थ-संदेहदोलास्थ-दैवाधीन-*a.* कृ 8 U; 'he who h.s his life' संकटितजीवितः. **-ous,** *a* संदिग्ध, संशयस्थ, संशयाक्रांत, सांशयिक (की *f.*), असंदेह, दैवाधीन, दैववशग, 'a h. position' संशयस्थानं, शंकास्पदं.

Haze, *s.* धूमिका, कुज्झटिका, कुहेडिका. **-Hazy,** *a.* सधूमिक, सांधकार, साभ्र, कुज्झटिकाच्छन्न. **2** अस्पष्ट, अव्यक्त; संकुल, संकीर्ण.

Hazel, *a.* ईषत्कापिशवर्ण, आलाम्र.

He, *pron.* सः, एषः, असौ, अयं.

Head, *s.* शिरस् *n.*, शीर्षं, शीर्षकं, मूर्धन् *m.*, मस्तकः-कं, मौलि *m. f.*, वरांग, उत्तमांगं, मुखः-खं. **2** अग्रणीः, अध्यक्षः, धौरेयः, धुर्यः, धूर्वहः, धुरीणः, पुरोगः, पतिः, नायकः, अधिपः-पतिः, मुखरः, अग्रः, अधिष्ठातृ *m.*, मुख्य-प्रधान in comp. **3** विषयः, पदं, स्थानं, अधिकरणं. **4** अग्रं, शिरस्, चूडा, शिखरं. **5** मूलं, प्रभवः, उद्गमः, उद्भवः, आदिहेतुः. **6** मति *f.*, बुद्धि *f.*, धीः; 'to be placed at the h. of' धुरि कीर्तनीय-or प्रतिष्ठापयितव्य-*a.*; 'h. merchant' श्रेष्ठिन् *m.*, विद्यपतिः; 'the h. of a family' कुलपतिः, कुटुंबभारवाहकः; 'at the h.' ex. by आदि प्रमुख in comp. or धुरि-मूर्ध्नि-स्था, &c.; 'with Indra at their h.' इंद्रादयः- इंद्रप्रमुखाः (देवाः); 'he stands at the h. of all' स सर्वेषां धुरि-मूर्ध्नि-तिष्ठति; 'h. over ears in debt' ऋणराशौ निमग्न or ऋणग्रस्त; 'to get a-h. of' अतिक्रम् 1 U, 4 P, अतिरिच् pass., अभिभू; 'make h. against' प्रत्यवस्था 1 A, विरुध् 7 U, प्रतिकूलयति (D.). **-v.** *t.* नी 1 P, अधिष्ठा 1 P, अग्रे-मूर्ध्नि-पुरः-गम् or स्था 1 P; 'h. ed by Vasishtha' वशिष्ठाधिष्ठिताः; gen. ex. by प्रमुख-पुरोग-पुरस्सर- in comp.; 'h.-ache' शिरोवेदना, शीर्ष-व्यथा-पीडा, शिरः-शूलं-रोगः; *See* **Ache;** 'h.-band' शिरोवेष्टनं-बंधनं, ललाटपट्टः; 'h.-dress' शिरोभूषणं, किरीटः-टं, मुकुटं; 'h.-land' अंतरीपः-पं, भूशिरः, भूनासिका; 'h.-long or 'h. foremost' अवाक्शिरस्, अधोमुख-अवाङ्मुख (खी *f.*), अवाच्, साहसिक, सरभस, साहसिन्, क्षिप्र-अविमृश्य-कारिन्-कृत्; प्रवण, पातुक, पतयालु; (*adv.*) अवाक्, अधोमुखेन, सोत्पातं, सवेगं; 'h.-most' अग्र्य, प्राग्र्य प्रमुख, मुख्य, वर, वरेण्य, उत्तम, प्रधान, in comp.; 'h.-piece' शिरस्त्रं, शिरस्त्राणं, शिरस्कं; 'h.s-man' घातकः, वधाधिकृतः, वध्यापुरुषः, मृतपः; 'h.-strong' दुर्दांत, अप्रतिविधेय, अवश्य, दुर्दम, उच्छृंखल, अविधेय, प्रमत्त, अस्थिर, चंचल. **-less,** *a.* मस्तकहीन, अशिरस्. **-y,** *a.* साहसिन, साहसिक, क्षिप्रकारिन्. **2** संरंभिन, झाघ-सुलभ-कोप, अमर्षण.

Heal, *v. t.* शम् c. (शमयति), साध् c., समुत्था c. (समुत्थापयति), व्याधेः मुच् c.; *See* **Cure;** 'to h. a wound' व्रणं वि-रुह् c. (रोपयति); sore-h.-ing oil' व्रणविरोपणं तैलं (S. 4). **2** समा-सं-प्रतिसमा-धा 3 U, शम् c. **-v.** *i.* रुह् 1 P. **2** प्र-,शम् 4 P. **-er,** *s.* रोगहरः, चिकित्सकः. **-ing,** *s.* उप-शमः-शांति *f.*, रुक्प्रतिक्रिया, चिकित्सा, प्रतीकारः, समुत्थानं. **2** विरोपणं-रोहणं. **-c.** शांतिद्, रोगहर, शांतिकर (री *f.*), विरोपण.

Health, *s.* कुशलं, अरोगः, सुस्थता, वार्त्त, रोगाभावः, निरामयत्वं, सुस्थितिः *f.*, आरोग्यं, स्वास्थ्यं, अनामयं, कल्यत्वं-ता, शरीरसुखं, अरोगिता. **2** प्रकृतिः *f.*, शरीरावस्था, शरीर-स्थितिः-प्रकृतिः; 'of a delicate h.' प्रकृति-कोमल-दुर्बल; 'he is in good h.' सुस्थोसौ, कुशलमस्य. **-ful,** **-y,** *a.* आरोग्यवत्, अरोगिन्, नीरोग, नीरुज-ज्, स्वस्थ, व्याधि-रहित, निरामय, वार्त्त, सुस्थ, कल्य, कुशलिन्, निर्व्याधि, 'became as h. as before' पूर्ववत् प्रकृतिस्थः समजायत. **2** आरोग्य-सुख-कर (री *f.*), पथ्य, हित, स्वास्थ्यजनक, सुखावह **-fulness,** *See* (*s.*).

Heap, *s.* राशिः, नि-सं-चयः; चिति *f.*, निकरः, स्तोमः, पुंजः, गणः, ओघः, संभारः; *See* **Collection.** **-v.** *t.* राशीकृ 8 U, सं-आ-प्र-चि 5 U, एकीकृ, समाक्षिप् 6 P, सं-भृ 3 U, पिंडीकृ, आ-समा-स्तृ 5 U; *See* **Collect;** 'why do you h. accusations (calumnies) upon us' किमस्मान् संभृतदोषैरधिक्षिपथ (S. 5)

Hear, *v. t.* श्रु 5 P, समा-आ-कर्ण् 10, निशम् 4 P or c. (शामयति); 'h. cases' व्यवहारान् दृश् 1 P, कार्याणि अवेक्ष् 1 A or विचर् c. or अनुसं-धा 3 U. **-v.** *i.* वार्तां श्रु; 'I have not heard from him for a long time' चिरं तद्वार्तां मया न श्रुता. **-er,** *s.* श्रोतृ *m.*, श्रावकः, आकर्णयितृ *m.* **-ing,** *s.* श्रवणं, श्रुति *f.*, आकर्णनं, निशामनं. **2** (In law) दर्शनं, अवेक्षणं, अनुसंधानं; 'the organ of h.' श्रवणेंद्रियं, श्रोत्रं; 'within h.' श्रवणगोचरे, श्रुतिपथ-वर्तिन्. **-Hearsay,** *s.* जनश्रुति *f.*, कर्ण-परंपरा, जनवादः-प्रवादः, किंवदंती; 'know it by h.': इति कर्णपरंपरया श्रुतं.

Hearken, *See* **Hear.**

Hearse, *s.* प्रेत-शव-यानं-वाहनं.

Heart, *s.* हृदयं, हृद् *n.* **2** (The substance) मज्जा, अग्रमांसं, बुक्काग्रमांसं. **3** (Mind) चित्तं, मनस् *n.*, चेतस् *n.*, मानसं, हृदयं, अंतःकरणं, आत्मन् *m.*, अंतरात्मन् *m.*, स्वांतं. **4** उरस् *n.*, वक्षस् *n.*, वक्षःस्थलं. **5** मर्मन् *n.* **6** स्नेहः, प्रणयः, रागः, भावः. **7** उदरं, गर्भः, अभ्यंतरं, अंतस् in comp. **8** सत्त्वं, धैर्यं, पौरुषं, तेजस् *n.*; 'take h.' आ-समा-श्वस् 2 P; धैर्यं अवलंब् 1 A, अवष्टभ् 9 P; 'learn or get by h.' कंठस्थ *a.* कृ 8 U, अभ्यस् 4 P; 'keep in the h.' चित्तेकृ, अवधृ 10; 'out of h.' दूनि-खिन्न-चित्त; 'at h.' अंतः; 'with all one's h.' 'h. and soul' प्रकामं, कामं, सोत्साहं, सर्वात्मना; 'he has applied himself to the work h. and soul' सर्वात्मना तस्मिन् कर्मणि स व्यापृतः; 'to one's h.'s content' यथेच्छं, यथेप्सं, आत्मितोषं, कामं, प्रकामं, निकामं, इष्टं, यथेप्सितं; 'from the h.' निर्व्याजं, सोत्साहं, निर्व्यलीकं; 'h.-ache' हृदयसंतापः, मनो-

व्याधिः, हृदयव्यथा-पीडा-वेदना, मनस्तापः, मानसी व्यथा; ' h.-broken ' भग्नमानस, अंतर्भिन्न, भिन्नहृदय; ' h.-burn ' हृदयवेदना, मनस्तापः; हृल्लासः, अम्लपित्तं; ' h.-ease ' हृदयस्वास्थ्यं-सुखं, चित्तशांति, निर्वृति *f.*; ' h.-felt ' अव्याज, निर्व्याज, वास्तविक (की *f.*), अकृत्रिम; ' h.-breaking, -rending, -wounding ' मर्मभिद्-स्पृश्-च्छिद्, हृदय-मर्म-भेदिन्-च्छेदिन्, हृद्विस्फोट, शर्कृत्व, चित्तोद्वेगजनक; ' h.-robbing ' मनोहर, चित्तहारिन्; ' h.-sick ' दुर्मनस्, उद्विग्नचित्त, खिन्न-विषण्ण-हृदय; *See* **Dejected**; ' h.-struck, -wounded ' छिन्नमर्मन्, क्षत-छिन्न-हृदय; ' h.-whole ' अक्षत-अभिन्न-हृदय. **-less,** *a.* निर्वीर्य, निस्तेजस्, भीरुहृदय, निस्सत्त्व, निष्पौरुष, क्लीब. **2** निर्दय, क्रूर, कठोरहृदय, निर्घृण. **-lessly,** *adv.* निर्वीर्यं, क्लीबवत्. **2** निर्दयं, क्रूरतया. **-lessness,** *s.* अपौरुषं, क्लीबता, निर्वीर्यत्वं. **2** निर्दयत्वं, कठोरता. **-Hearty,** *a.* सरल, निर्व्यलीक, निष्कपट, निर्व्याज, शुद्धांतःकरण; *See* **Frank.** **2** अकृत्रिम, अकृतक, सोत्साह, उत्सुक, सोल्लास, सस्नेह, हृद्य; हृदयंगम, स्नेहनिर्भर; ' a h. friend ' हृदयंगमः सखा. **3** वीर्यवत्, सपौरुष; कल्य, सुस्थ. **-ly,** *dv.* निर्व्यलीकं, निष्कपटं, निर्व्याजं. **2** सोल्लासं, सोत्साहं, सकामं, सर्वात्मना, संतुष्टचेतसा, कामतः, सानंदं, साह्लादं, चित्तसंतोषेण. **3** सवीर्यं. **-ness,** *s.* सारल्यं, अकृत्रिमता, अव्याजत्वं; उत्साहः, औत्सुक्यं, वीर्यं, तेजस् *n.*, पौरुषं.

Hearth, *s.* अग्निकुंडं, चुल्लि-ल्ली *f.*, अंतिका, अंदिका, उद्धानं, उधमानं, अधिश्रयणी, अश्मतं. **2** (Portable fire-place) अंगारधानिका, अंगारशकटी, हसनी, हसंती.

Heat, *v. t.* तप् c., परि-प्र-सं°; उद्-,दीप् c., ज्वल् c., संधुक्ष् 10; दह् 1 P. *-s.* तापः, संउत्-परि-तापः, दाहः; उष्णता, उष्मः, तिग्मता, प्रखरत्वं, ऊ-उष्मन् *m.*, चंडता. **2** आतपः, घर्मः, निदाघः; ' affected by h.' उष्णालुः; ' exposed to the sun's h.' सूर्यातपे स्था 3 U. **3** (Summer) ग्रीष्मः, निदाघः, घर्मकालः, उष्णकालः, निदाघसमयः. **4** उत्तापः, संक्षोभः, चंडता, तीक्ष्णता, तीव्रता, उग्रता, व्यग्रता. **5** संरंभः, मदः, क्रोधः, उद्दीपनं, संधुक्षणं; आवेशः, आक्रमः; ' in the h. of excitement ' रोषावेशेन. **6** कपोलरागः, ' h. of youth ' यौवनगर्वः-दर्पः, यौवनोन्मादः, तारुण्यमदः. **-ing,** *s.* तापनं, दीपनं. *-a.* तापक, दीपन.

Heath, *s.* जंगलभूमि *f.*, वनभूमिः. **2** प्रचारः.

Heathen, *s.* मूर्ति-प्रतिमा-पूजकः-उपासकः-अर्चकः. *-a.*, **-ish,** *a.* प्रतिमापूजकानुरूप. **2 Barbarous,** q. v. **-ism,** *s.* मूर्तिपूजा-अर्चनं-उपासना.

Heave, *v. t.* उन्नम् c. (नमयति), उत्क्षि 1 P, उच्छ्रि 1 U, उद्-ह्-धृ 1 P, उद्यम् 1 A, उत्था c. (उत्थापयति), उत्क्षिप् 6 P, उत्तुल् 10; ' h. a sigh' निश्वस् 2 P, दीर्घं निश्वस्; ' h.-ing deeply' दीर्घं-स्थूलस्थूलं-निश्वस्य. *-v. i.* स्पंद् 1 A, स्फुर् 6 P, कंप् 1 A. वेप् 1 A. **2** निश्वस्, कृच्छ्रेण उच्छ्वस्. **3** उत्लुप् 1 P, प्र-लुप् 6 P, 1 A, लुल् 1 P, तरंगायते (D.), उन्नम् 1 P. *-s.* उन्नमनं, उत्क्षेपः, उत्तोलनं, उद्धरणं. **-ing,** *s.* स्पंदनं, स्फुरणं, कंपनं, वेपथुः. **2** निश्वासः, कृच्छ्रेण उच्छ्वासः, दीर्घनिश्वासः. **3** उत्सर्पणं, प्रलोठनं, लोलनं, उन्नमनं. *-a.* स्पंदमान, उत्सर्पिन, लोल.

Heaven, *s.* दिव् *f.*, द्यो *f.*, स्वर्गः, त्रिदिवः-वं, सुरलोकः, त्रिदशालयः, त्रिविष्टपं, नाकः, स्वर् *ind.*; ' h. of Vishnu ' वैकुंठं; ' this is a h. on earth' भूस्वर्गायमानमेतत्स्थलं, स्थानांतरगतः स्वर्गः (V. 2). **2** आकाशः-शं, नभस् *n.*, गगनं-गं; *See* **Sky.** **3 God,** q. v.; परमेश्वरः, विधिः, ईश्वरः; ' h. and earth' द्यावापृथिव्यौ, द्यावाभूमी, रोदसी-स्यौ, द्यावाक्षमे; ' h.-born ' दिविज, स्वर्गीय, स्वर्गोत्पन्न. **-ly,** *a.* दिव्य, स्वर्गीय, अपार्थिव (वी *f.*), स्वर्ग्य, त्रिदिवस्थ, दिविष्ठ, ' h. body ' नक्षत्रं; ' h. voice ' आकाशवाणी, अशरीरिणी वाच्, ' h. nymph ' सुरांगना, स्वर्वेश्या, दिव्यांगना. **2** परम, उत्तम. **-wards,** *adv.* स्वर्गाभिमुखं, अभिगगनं.

Heavy, *a.* गुरु, भारवत्. **2** गाढ, दीघ, गुरु, तीक्ष्ण, महत् तीव्र, अत्यत, उग्र, दारुण, उच्चंड, महा-सु-अति- in comp.; ' h. shower' महासारः. अतिवृष्टि *f.* **3** आकुल, क्षुब्ध; ' h. sea' सागरक्षोभः, क्षुब्धसागरः, ऊर्मिमालाकुलः सागरः. **4** अवसन्न, खिन्न, दीन, चिंताकुल, विषण्ण. **5** मंद, स्थूल, जड, मंथर, अलस, मंदधी-मति, जड-स्थूल-दुर्बुद्धि-धीः; ' h.-headed ' मंद-स्थूल-धीः; ' h. -laden ' गुरुभाराक्रांत, सुभारवत्. **-ly,** *adv.* गुरुभारेण, गुरुतया. **2** भृशं, तीव्रं, बलवत्, अत्यंतं, सु-अति pr.; *See* **Exceedingly.** **3** सविषादं, मंदं, शनैःशनैः. **-ness,** *s.* गुरुता, गुरुत्वं, भारः, गरिमन् *m.*, विषादः, दैन्यं, मांद्यं, स्थूलता, &c.

Hebetate, *v. t.* *See* **Blunt, Dull.**

Hecatomb, *s.* शतबलिदानं.

Hectic, *a.* संतत, अविरत. **2** ज्वरसूचक, अंतर्दाहसूचक.

Hector, *s.* विकत्थिन् *m.*, आत्मश्लाघिन् *m.*, पिंडीशूरः, शूरमन्यः. **2** कलहकारः, भर्त्सकः. *-v. i.* विकत्थ् 1 A, प्रगल्भ 1 A; *See* **Boast.** **2** तर्ज्-भर्त्स् 10 A.

Hedge, *s.* वृति *f.*, प्राचीरं, प्राकारः, आवरणं, वेष्टनं, आवारः, क्षेत्रावरोधकं, क्षेत्रवेष्टनं; ' h.-born' अंत्यज, हीन-जाति-वर्ण, अधम-नीचजातीय; ' h.-hog ' शल्यः, शल्यकंठः; ' h.-sparrow ' कलविंकः, चटकः. *-v. t.* वृत्या परिवेष्ट् c. or आवृ 5 U or अवरुध् 7 U.

Hedonic, *a.* सुखपर-विषयक.

Heed, *v. t.* आदृ 6 A, अवेक्ष् 1 A, गण् 10, मन् c., अभिनंद् 1 P; सेव् 1 A. **2** अव-धा 3 U, मनो दा 3 U, सावधान *a.* भू, अस् 5 P; *See* **Hear.** *-s.* अवधानं, अवेक्षा, सावधानता, मनोयोगः; ' take h.' सावधानो भव. **-ful, -less,** *n.* *See* **Careful, -less.**

Heel, *s.* पार्ष्णि *m. f.*, पादतल-मूलं; ' to be at one's h.s' पार्ष्णि ग्रहु 9 U, अनुसृ, पदं अनुगम् 1 P; ' I shall be close upon your h.s' अहमनुपदमागत एव (S. 3) ' to take to or show h.s ' पलाय् 1 A, शंकस् 1 U, 4 P; ' betake to h.s ' जंघाबलमवलंब् 1 A; ' h. s over head ' अवाक्शिरस् *a.*, ऊर्ध्वपाद् *a.* *-v. i.* एकपार्श्वे पत् 1 P or परिवृत् 1 A or प्र-लंब् 1 A.

Heft, *s.* उद्योगः, यत्नः, उत्साहः. **2** सृष्टि *m. f.*, स्सरुः.

Hegemony, *s.* नायकत्वं, आधिपत्यं.

Heifer, *s.* वत्सतरी, वत्सा ; ' h. one year old ' एकहायनी ; so द्विहायनी, त्रिहायणी.

Heigh-ho, *interj.* हंहो, अहो, भो भोः, रे रे.

Height, *See* under **High.**

Heinous, *a.* घोर, दारुण, अतिनिंद्य, गर्ह्यतम, अतिदुष्ट, महत्, अतिपापिन्, अतिघोर, पापिष्ठ. **-ly,** *adv.* घोरं, दारुणं. **-ness,** *s.* घोरता, दारुणत्वं.

Heir, *s.* दायादः, रिक्थहरः, अंशहरः-हारिन् *m.*, रिक्थभागिन् *m.*, रिक्थिन् *m.*, धनाधिकारिन् *m.*, उत्तराधिकारिन् *m.*, अंशभाक्, अंशिन् *m.*; ' sole h.' समग्रधनभाक्; ' h.-apparent ' युवराजः; ' h.-loom ' क्रमायातं जंगमद्रव्यं. **-ess,** *s.* धनाधिकारिणी, &c. **-less,** *a.* दायादशून्य-हीन. **-ship,** *s.* धनाधिकारित्वं.

Heliolatry, *s.* सूर्योपासना.

Heliotrope, *s.* सूर्यकमलं, श्रीहस्तिनी.

Hell, *s.* नरकः, निरयः, नारकः, दुर्गति *f.* **2** पातालं, रसातलं, अधोलोकः, अधोभुवनं; ' h.-tortures ' कारणा, यातना, तीव्रवेदना, ' river of h. ' वैतरणी. **-ish,** *a.* नारक (की *f.*), नरकीय, नारकीय (यी *f.*), नरकस्थ. **2** Cruel, q. v. **3** अतिनिंद्य, दुष्टतम.

Helm, *s.* कर्णः, केनिपातः-तकः, अरित्रं. **2 Helmet,** q. v.; ' placed at the h. of (royal) affairs ' राज्यधुरायां स्थापित. **-Helmsman,** *s.* कर्णधारः, नाविकः.

Helmet, *s.* शिरस्त्रं, शिरस्कं, शिरोभूषणं, शिरस्त्राणं, शीर्षकं पर्य.

Help, *s.* साहाय्यं, उपकारः, उपकृत-कृति *f.*, साहित्यं, अनुग्रहः, आनुकूल्यं. **2** गति *f.*, आश्रयः, शरणं; ' help ! help ! ' परित्रायध्वं, परित्रायध्वं. *-v. t.* साहाय्यं कृ 8 U, सहायः भू, अनुग्रहु 9 P, उपकृ (gen.); न हि द्वीपो परस्परस्योपकुरुतः (S. B. 420); तान्यपि तत्त्वज्ञानायोपकुर्वंति (S. B. 447) ' h. a right understanding'. **2** संबुध् c., प्रबुध् c., पुरस्कृ, उद्युज् 10; ' h. ed him on his legs' उत्थातुं तस्य साहाय्यं चकार; ' God h. s those who h. themselves ' दैवमुपायसायत्तं, विना पुरुषकारेण दैवं न सिध्यति; दैवं पुरुषकारेण साध्यसिद्धिनिबंधनं, न स्वयं दैवमादत्ते पुरुषार्थमपेक्षते (S. R. 104); ' can't h. ' का गतिः, किमन्यच्छरणं, ' to h. himself to a mouthful ' ग्रासग्रहणेन आत्मानं तर्पयितुं; ' a h. ing hand ' हस्तावलंबः-बनं; दैवेनेत्थं दत्तहस्तावलंबे प्रारंभे (Rat. 1); ' he could not h. laughing ' हासं निग्रहीतुं न शशाक; ' I cannot h. going ' मयावश्यं गंतव्यं; ' to h. at table ' परिविष् 10. **-er,** *s.* उपकारकः, उपकर्तृ *m.*, सहायः. **-ful,** *a.* उपयोगिन्, सहाय, उपकारक, साहाय्यकारिन्. **-less,** *a.* अनाथ, निराश्रय, अगतिक, अशरण, गतिहीन, निरवलंब, असहाय. **2** अप्रतिकार्य, अपरिहार्य, अप्रतिविधेय, निरुपाय; ' we are simply h. in that matter ' तस्मिन्विषये अस्माकमन्या गतिरेव नास्ति. **-Helpmate,** *s.* सहधर्मिणी. **2** सहायः, सहकारिन् *m*

Helve, *s.* दंडः, सुष्टि *m. f.*

Hem, *s.* अंचलः, वसनप्रांतः, वस्त्रपः-दशाः (pl.). **2** उत्कासनं. *-v. t.* अंचलं सिव् 4 P. **2** (in) परिवेष्ट् 1 A or c., परि-चु 5 U or c., निरुध् 7 U

Hemicrania, *s.* अर्धावभेदकः.

Hemicycle, *s.* गोलार्धं.

Hemiplegy, *s.* पक्षाघातः, पक्षाघायुः.

Hemisphere, *s.* गोलार्धं, अर्धगोलः.

Hemistich, *s.* श्लोकार्धं, अर्धश्लोकः.

Hemorrhage, *s.* रक्त-रुधिर-स्रावः, रक्तरक्षणं.

Hemorrhoids, *s.* अर्शस् *n.*, गुदकीलः.

Hemp, *s.* शणं, भंगा, मातुलानी. **-en,** *a.* शाण (णी *f.*), शण in comp.

Hen, *s.* कुक्कुटी; ' h.-hearted ' भीरु, भीरुहृदय, कातर, कापुरुष; ' h.-house ' कुक्कुटपालिका; ' h.-pecked ' स्त्रीवश, स्त्रीविधेय, स्त्रीजित, स्त्रीवश्य, स्त्रीवशवर्तिन्, भार्यांटक; ' h.-roost ' कुक्कटालयः.

Hence, *adv.* इतः, अस्मात् स्थानात्. **2** अतः, एतस्मात् कारणात्, तस्मात्; अत एव. **3** (From h.) अतःपरं, अतः or इतः-परं or ऊर्ध्वं; अद्यप्रभृति; ' hence ! ' अपेहि, अपपाहि, अपसर; ' h.-forth,-forward ' अतः or इतः-परं or ऊर्ध्वं; अद्यप्रभृति, अद्यारभ्य, अद्यावधि.

Hepatic, *a.* यकृत्संबंधिन.

Heptagon, *s.* सप्तभुजा-सप्तकोणा-आकृतिः.

Herald, *s.* घोषकः, बंदिन् *m.*, राजदूतः. **2** (fig.) अग्रदूतः, प्रथमवार्ताहरः, अग्रेसरः. **-Heraldry,** *s.* वंशावलीज्ञानं.

Herb, *s.* ओषधि-धी *f.*, शाकः, शाकलता, हरितकं. **-Herbage,** *s.* तृणं, शस्यं, घासः, यवसं. **-Herbal,** *s.* वृक्षायुर्वेदः.

Herculean, *a.* भगीरथ in comp.; 'h. efforts' भगीरथप्रयत्नाः. **2** अतिप्रबल, अतिशक्तिमत्.

Herd, *s.* यूथं, गणः, संघः, वृंदं, कदंबः, कुलं, समूहः, व्रजः, निवहः; 'h. of cattle' गोकुलं, पाशवं, गोवृंदं, गोत्रा; 'h. of oxen' औक्षणं; 'h. of calves' वात्सकं; 'h. of elephants' हास्तिकं. **-v.** *i.* यूथेन चर् 1 P, यूथशः संमिल् 6 P or संगम् 1 A, एकीभू, एकत्र भू or मिल्. **-Herdsman,** *s.* गोरक्षकः, गोपालः, गोपः, गोयुक्, आभीरः, गोसंख्यः, बल्लवः.

Here, *adv.* अत्र, इह (gen. in this world). **2** इह लोके; ex. by demon. pron.; 'h. comes your mother' एषागच्छति ते माता; 'h. am I' अयमस्मि. **-***Interj.* भो भोः; 'h. and there' इतस्ततः, अंतरांतरा, असमग्रं, असंपूर्णं; 'h. about' इतो नातिदूरे, इह समीपे; 'h.-after' इतः परं-ऊर्ध्वं, अतः, परतः, परस्तात्, अनंतरं, पश्चात्, उत्तरतः, उत्तरत्र, अग्रे, उपरिष्टात्, अतः परं; (in the next world) परत्र, अमुत्र, परलोके; (*s.*) उत्तरकालः, पर-भावि-आगामि-कालः; 'h.-at' अत्रांतरे, अथ; 'h.-by' अनेन, तस्मात्, 'h.-in' अत्र, अत्र-स्थाने-विषये; 'h.-before' इतः पूर्वं, पूर्वकाले, पुरा, प्राक्, अतीत-गत-काले; 'h.-upon' ततः, अनंतरं, तदुपरि, तच्छ्रुत्वा.

Hereditary, *a.* पितृपैतामह (ही *f.*), पित्र्य, पैतृक (की *f.*), परंपरीण-य, परंपरागत, परंपरागाप्त, क्रमायात, क्रमागत, कुलक्रमागत, अन्वयागत; 'h. disease' संचारी रोगः; 'h. servant' मूलभृत्यः, मौलः; 'h. succession' क्रमागतत्वं. **-ly,** *adv.* कुलक्रमेण, वंशक्रमेण, परंपरया, पारंपर्येण.

Hereditament, *s.* दायः, रिक्थाधिकारः.

Heredity, *s.* पैतृक *a.* गुणः

Heresy, *s.* पाषंडमार्गः, नास्तिकता, मिथ्यादृष्टि *f.*, विधर्मः, विधर्मसेवा, परधर्माश्रयः, अपथं, विपथः. **-Heretic,** *s.* पाषं(खं)डः, नास्तिकः, विधर्मसेविन् *m.*, परधर्मावलंबिन् *m.*, देवनिंदकः, उपधर्मसेविन् *m.*, स्वधर्मभ्रष्टः-च्युतः, पतितः. **-al,** *a.* धर्मविरुद्ध, विपथ-विधर्मगामिन्. **-ally,** *adv.* पाषंडवत्, नास्तिकवत्.

Heritable, *a.* पितृप्राप्य, दाययोग्य.

Heritage, *s.* दायः, पैतृकं धनं, रिक्थं, पैतृकद्रव्याधिकारः.

Hermaphrodite, *s.* स्त्रीपुरुषलक्षणान्वितः.

Hermetic,-al, *a.* रसायनीय, रसायनज. **2** सुदृढ. **-ly,** *adv.* सुदृढं, गाढं.

Hermit, *s.* यतिः, तापसः, तपस्विन् *m.*, मुनिः, आरण्यकः, वन-अरण्य-वासिन् *m.*, वानप्रस्थः, वैखानसः. **-age,** *s.* आश्रमः, उटजः-जं, पर्णशाला.

Hernia, *s.* अंत्रवृद्धि *f.*; अंत्रस्रंसः.

Hero, *s.* वीरः, शूरः, भटः, विक्रांतपुरुषः, प्रमहा-वीरः, जेतृ *m.*, रथिन् *m.*, अतिरथः, शौटीरः. **2** (In dramas &c.) नायकः, कथापुरुषः; 'h. as of Râmayana' रामायणकथापुरुषाः or-नायकाः. **-ic,-ical,** *a.* वीर, शूर, प्रवीर, विक्रांत, वीर्यवत्, अमितौजस्, महावीर्य; 'a h. deed' पराक्रमः, विक्रमः, अवदातं कर्म. **2** वीरचरित्रविषयक, वीररसप्रधान. **-ically,** *adv.* सविक्रमं, सवीर्यं, शूरवत्. **-ism,** *s.* वीर्यं, शूरत्वं, शौर्यं. परावि-क्रमः, धामन् *n.*, ओजस् *n.*, रणोत्साहः, पौरुषं, साहसं, वीर्यवत्त्वं, शौटीर्यं. **-Heroine,** *s.* नायिका.

Heron, *s.* बकः, सारसः, लोहपृष्ठः, क्रौंचः.

Herpes, *s.* *See* **Itch.**

Hesitate, *v. i.* वि-आ-शंक् 1 A, दोलायते (D.), विचर् c., विकल्प् 1 A or c., विलंब् 1 A, चिर(रा)यति-आंदोलयति (D.); *See* **Doubt** also. **2 Falter,** q. v. **-ingly,** *adv.* संशय्य, सविकल्पं, ससंशयं, साशंकं. **2** स्खलनपूर्वकं. **-ion,** *s.* शंका, संशयः, विकल्पः, आ-वि-परि-शंका, विचारः, संदेहः, वितर्कः, द्वापरः, अनिर्णयः, विचिकित्सा. **2** (In speaking) स्खलनं, स्वरभेदः-भंगः, स्खलद्वचनं, गद्गदवाच् *f.*

Hesperian, *a.* *See* **Western.**

Hest, *s.* *See* **Command.**

Heteroclite, *a.* विधिविरुद्ध, निपातित.

Heterodox, *a.* भिन्न-मत-धर्मन्, धर्मविरुद्ध, विपरीत, विधर्मिन्, वैधर्मिक (की *f.*), अपथवर्तिन्-गामिन्. **-y,** *s.* विधर्मः, भिन्नमतं-धर्मः.

Heterogeneous, *a.* भिन्न, विजातीय, पृथग्विध, भिन्नजातीय, विरुद्ध; *See* **Different.**

Hew, *v. t.* छिद् 7 P, कृत् 6 P, लू 9 U, *See* **Cut.** **-er,** *s.* छेदकः, छेदिन् *m.*, छिद् in comp. **-Hewn,** *a.* छिन्न, दात, वृक्ण, लून कृत्त, दित, छात.

Hexagon, *s.* षट्कोणः, षडस्रः.

Hexametre, *s.* षट्पदी-चरणः.

Hexapod, *s.* षट्पदः.

Hey, *interj.* अहो, ननु, हाहा.

Heyday, *interj.* नमः, स्वस्ति (with dat.); अहो, भोः, **-***s.* उल्लासः, प्रमोदः, हर्षः, मुदा, परिहासः; 'h. of youth' नवं-प्रथमं-यौवनं.

Hiatus, *s.* भंगः, भेदः, छेदः, विच्छेदः.

Hibernal, *a.* हैमंत (ती *f.*), हैमंतिक (की *f.*). **-Hibernate,** *v. i.* शीतकालं or हेमंतं नी 1 P.

Hiccough, Hiccup, *s.* हिक्का, हिध्मा. **-***v. i.* हिक्क् 1 U.

Hide, *s.* चर्मन् *n.*, अजिनं, दृतिः, कृत्ति *f.*, पशु-चर्मन् *n.*-त्वच् *f.*; 'h.-bound' दृढमुष्टि, कृपण; अवश्य, अविनय, कठोर, कठिन. **-***v. t.* प्रच्छद् 10, गुह् 1 U, गुप् 1 P, अंतर्धा 3 U, तिरोधा, स्थग् 10, अपवृ c.; *See* **Conceal.** **-***v. i.* गुह्-गुप् pass., गुप्त-निलीन-*a.* भू 1 P, नि-ली 4 A, तिरोभू, तिरोधा pass.; 'h. s behind the bushes' विटपांतरितस्तिष्ठति-भवति. **-Hid.-Hidden,** *a.* गूढ, गुप्त, प्रच्छन्न, छादित, अंतर्हित, तिरोहित, अंतरित, अपवारित, निभृत, स्थगित, लीन, निलीन. **-ing,** *s.* गोपनं, गुप्ति *f.*, प्रच्छादनं, स्थगनं, तिरोधानं; 'h.-place' निभृत-गूढस्थानं, गुप्तिः, निभृतं.

Hideous, *a.* बीभत्स, विकृत, घोर, भीषण, कराल, उग्रदर्शन, कराल-मुख-वदन, कदाकार, भीम-घोर-दर्शन-आकृति, उग्र-घोर-रूप, दुर्दर्शन; 'Oh! this is indeed a h. spectacle' हंत बीभत्समेवाग्रतो वर्तते (Mal. 5). **-ly,** *adv.* उग्रं, घोररूपेण, बीभत्सं. **-ness,** *s.* घोरता, करालता, उग्रता.

Hie, *v. i.* त्वर् 1 A, सत्वरं गम् 1 P.

Hiemal, *a.* *See* **Hibernal.**

Hiemate, *v. i.* *See* **Hibernate.**

Hierarch, *s.* पुरोहितेश्वरः, आचार्यवरः. **-y,** *s.* आचार्याधिपत्यं, धर्माध्यापकप्रभुत्वं.

Hieroglyph,-ic, *s.* गूढाक्षरं, बीजाक्षरं.

Hierophant, *s.* मंत्रव्याख्यातृ *m.*, आचार्यः.

Higgle, *v. i.* पण् 1 A, व्यव-हृ 1 P. **2** **Haggle,** q. v.

Occupy, *v. t.* अधि-ष्ठा 1 P, अधि-वस् 1 P, अध्यास् 2 A, आश्रि 1 U, आविश् 6 P, आ-अध्या-क्रम् 1 U, 4 P (all with acc.); व्याप् 5 P, पूर् 10, व्यश्नु 5 A; वृत् 1 A (with loc.), पदं कृ 8 U or वि-धा 3 U, स्था; ' o. a throne ' राज्यमारुह्-राजपदमधिरुह् 1 P; ' o. ing the honourable position of a housewife ' श्लाघ्ये गृहिणीपदे स्थिता (S. 4). **2** (Possess) भुज् 7 A, धृ 1 P, 10, धा. **3** प्र-नि-युज् 7 A, 10, व्या-पृ c., प्रवृत् c., व्यापृत-*a.* कृ; ' o. oneself ' व्यापृ 6 A, व्यापृत-निरत-आसक्त-*a.* भू 1 P, प्रवृत् (with loc.); आत्मानं व्याप्र c. **-ancy,** *s.* भोगः, भुक्ति *f.*, आवेशः, आक्रमः; अधिकारः. **-ant,** *s.* भोक्तृ भोगिन्, अधिकारिन् all *m.* **-ation,** *s.* वृत्ति *f.*, आ-उप-जीविका, आजीवः, जीवनसाधनं-उपायः. **2** क्रिया, कृत्यं, प्रवृत्तिः, चरितं, चेष्टा. **3** नियोगः, अधिकारः, स्वकर्मन् *n.* धर्मः. **4** अधिवासः, आवेशनं, अधिष्ठानं, व्याप्तिः *f.*, आक्रमणं, भोगः, भुक्तिः; ' daily o. ' नित्यकृत्यं; 'to do the usual morning o. s. ' उचितेषु प्रभातकरणीयेषु (S. 4). **-ed,** *a.* आविष्ट, आक्रांत, अध्युषित, अध्यासित, अधिष्ठित, व्याप्त, भुक्त, आश्रित. **2** व्यापृत, व्यापारिन्, व्यवसायिन्, प्रवृत्त, कर्म-निष्ठ-रत-उद्युक्त, क्रियावत्; gen. ex. by रत, निष्ठ, मग्न, व्यापृत, पर in comp., or by व्यापृ, प्रवृत्. **-er,** *s.* अधिष्ठातृ *m.* भोक्तृ *m.*

Occur, *v. i.* वृत् 1 A, विद् 4 A; जन् 4 A, उत्पद् 4 A, सं-भू 1 P. **2** उप-स्था 1 U, आगम् 1 P, उप-नम् 1 P; *See* **Befall.** **3** सं-, वृत्, समा-पद्, घट् 1 A, आ-नि-पत् 1 P, सं-भू; 'o. to the mind' मनसि उद्-इ 2 P, or भू or जन् or स्फुर् 6 P, or आविः-प्रादुः-भू; ' this did not o. to his mind ' इति तस्य बुद्धौ न संजातं, इति तस्य हृदये नापतितं (Ka. 288); ' the following (thoughts) o. ed to my mind ' आसीत्-समभूत्-मे मनसि; ' these two verses o. to our memory (mind) ' स्मृत्युपस्थितौ इमौ द्वौ श्लोकौ (U. 6). **-rence,** *s.* घटना-नं, वृत्तं, वृत्तांतः, भूतं, व्यतिकरः; संभवः, संगतिं *f.*, उत्पत्ति *f.*, उपस्थिति *f.*, उपागमः; ' of usual o. ' नित्यसंभूत, ' of rare o.' दुर्लभ, चिरोपनत. **-rent,** *s.* शत्रुः; *See* **Enemy.** **2** वृत्तं, वृत्तांतः.

Ocean, *s.* समुद्रः, सागरः, सिंधुः, उदन्वान्, अर्णवः, रत्नाकरः, अकूपारः, पारावारः; and comp. of धिः, निधिः, पतिः, राशिः with ' Water ' q. v.; वारिराशिः, जलनिधिः, अब्धिः, अंबुधिः, वार्धिः, अपांपतिः, सरित्पतिः, तोयराशिः अंबुराशीः, &c.; ' o.-bound ' सागरांत, समुद्रवलय-रसन-मेखल; ' o. of misery ' दुःख-सागरः, व्यसनार्णवः. **-a.,** **-ic,** *a.* सासुद्र (द्री *f.*), समुद्रीय, (*s.*) in comp.

Ochre, *s.* सुवर्णगैरिकं.

Ochlocracy, *s.* प्राकृतजनप्रभुत्वं.

Octagon, *s.* अष्टार्स्रं, अष्टकोणाकृति *f.* **-al, -Octangular,** *a.* अष्टकोण, अष्टास्र.

Octave, *s.* अष्टकं. **-Octavo,** *a.* अष्टपत्रक.

Octennial, *a.* अष्टवार्षिक (की *f.*), अष्टवर्षीय. **2** अष्टवर्षस्थायिन्.

October, आश्विनकार्तिकं.

Octogenarian, *a.* अशीतिवयस्क.

Octohedron, *s.* अष्टपृष्टः.

Octopetalous, *a.* अष्टदल.

Octosyllable, *s.* अष्टाक्षरं.

Octuple, *a.* अष्टगुण, अष्टविध.

Ocular, *a.* चाक्षुष (षी *f.*), प्रत्यक्ष; ' o. evidence ' प्रत्यक्ष-चाक्षुष-प्रमाणं, चाक्षुषज्ञानं. **-ly,** *adv.* प्रत्यक्षप्रमाणेन. **-Oculist,** *s.* चक्षु-नेत्र-वैद्यः.

Odd, *a.* विषम, असम, अयुग्म. **2** विलक्षण, असाधारण (णी *f.*), अपरूप, असंगत, अपूर्व, वि-, चित्र, अद्भुत, असामान्य, लोकोत्तर; ' game of o. and even ' मुष्टिद्यूतं. **-ity, -ness,** *s.* वैषम्यं. **2** वैलक्षण्यं, वैचित्र्यं, असंगतिं *f.*, अपूर्वता, आचारवैलक्षण्यं. **3** कौतुकं. **-ly,** *adv.* विषमं, चित्रं, विलक्षणं. **-Odds,** *s.* वैषम्यं, न्यूनाधिकभावः, तारतम्यं. **2** आधिक्यं, उत्कर्षः, विशेषः, श्रेष्ठता, विशिष्टता; ' fight at o. ' अधिकबलेन शत्रुणा युध् 4 A.

Ode, *s.* गीतं, गानं, गेयं.

Odious, *a.* गर्हित, कुत्सित, निंद्य गर्ह्य, द्वेष्य, अप्रिय, द्वेषपात्रं भाजनं-आस्पदं; कश्मल (report). **2** द्वेषावह, द्वेषोत्पादिन्. **-ly,** *adv.* कुत्सितं, गर्हणीयतया. **-ness,** *s.* गर्ह्यता, द्वेष्यता. **-Odium,** *s.* वि-, द्वेषः, गर्हा, कुत्सनं, घृणा.

Odontagy(ia), *s.* दंत-शूल-पीडा-व्यथा.
Odour, *s.* गंधः, वासः; 'strong or fragrant o.' सुगंधः, सुवासः, सौरभं-भ्यं, आ-,मोदः, परिमलः; 'bad o.' दुर्गंधः, पूतिगंधः. **-ous**, **-Odoriferous**, *a.* सगंध, सुगंधि, परिमलवत्, सामोद, गंधवत्, सुरभि, सवास.
Œsophagus, *s.* *See* 'Gullet.'
Of, *prep.* Gen. ex. by genitive or by comp.; 'o. great strength' महाबल. **2** (Showing reference) अधिकृत्य, उद्दिश्य (with acc.), or by गत in comp.; 'by thinking o. her husband' भर्तृगतया चिंतया. **3** (Made of) by Tat. comp.: or मय (ी *f.*), निर्मित in comp.; or by derivatives; 'pot o. gold' हेमपात्रं, हेममयं or हैमं पात्रं. **4** (Partitive sense) by gen. or loc., or मध्ये, मध्यात् with gen. **5** (Apposition) ex. by comp. or by नाम *ind.*; 'the island o. Ceylon' सिंहलद्वीपं, सिंहलं नाम द्वीपं. **6** (Showing cause) by instr. or abl.; 'died o. fever' ज्वरेण मृतः.
Off, *adv.* दूरे, दूरं, दूरतः; (with verbs) ex. by अप, वि, निः, अव, उत्; 'o. with his head' उच्छेद्यतामस्य शिरः; 'o. with him to the prison' अपनीयतामसौ कारागृहं. **-a.**, 'far o.' दूरवर्तिन्, दूरस्थित-स्थ. **-*interj.***, 'get o.', 'be o.' दूरं अपेहि, अपसर; 'o.-hand' प्रत्युत्पन्न, अचिंतितपूर्व, आकस्मिक (की *f.*), असावधान, निरपेक्ष; 'badly o.' दुःस्थित, दुर्गत, आपन्न, कृच्छ्रगत; 'well o.' सुस्थ, सुस्थित, संपन्न.

Offal, *s.* उच्छिष्टं, भुक्तावशेषः-षं, शेषान्नं, मलं, उच्छिष्टान्नं, मांसोच्छिष्टं, अवशिष्टमांसं.
Offend, *v.* अपराध् 4, 5 P (with gen. or loc.), विप्रियं-अनार्यं कृ 8 U or आचर् 1 P, अप्रसादं उत्पद् c.; कस्मिन्नपि पूजार्हे अपराद्धा शकुंतला (S. 4) 'Sakuntalā has o. ed (committed an offence against) some respectable person'. **2** पीड् 10, व्यथ् c. (व्यथयति), क्लिश् 9 P, दुह् 5 P, सं-परि-तप् c. **3** (Against) अति-व्यति-क्रम् 1 U, 4 P, लंघ् 1 A, 10, अतिवृत् 1 A, भिद् 7 P, भंज् 7 P, लुप् c. **4** रुष् c., कुध् c., प्र-,कुप् c., क्षुभ् c., कुपित-क्षुब्ध- *a.* कृ, कोप जन् c. (जनयति); अव-अप-मन् c. **5** रुध् 7 U, चर् 1 A, स्खल् c. (स्खलयति). **-ed**, *a.* कुपित, क्षुब्ध, प्रकोपित, क्रुद्ध, रुष्ट, जातामर्ष, संतप्त, असंतुष्ट. **2** बाधित, व्याहत, प्रतिरुद्ध; 'to be o.' कुप्-कुध्-रुष् 4 P. **-er**, *s.* अपराधिन्, अपराद्धः, दोषिन्, पापिन् पातकिन्, कृतागस्, कृतापराधः, सदोषः, अपराधकृत, कुकर्मन् all *m.* **-Offence**, *s.* अपराधः, दोषः, पापं, पातकं, अघं, एनस्-आगस् *n.*, दुरितं, कुकर्मन् *n.* दुष्कृति *f.* **2** कोपः, क्रोधः, रोषः, अमर्षः, मन्युः, असंतोषः; 'easily taking o.' क्षीप्रकोपिन्, सुलभकोप. **3** विप्रियं, अवमानः, अवज्ञा. **4** रोधः, बाधा-धः; स्खलनं; *See* **Obstacle**. **-less**, *a.* निर्दोष, निरपराध. **-Offensive**, *a.* कोपजनन (नी *f.*), रोषावह, अप्रिय, अतुष्टि-अप्रीति-कर (री *f.*), असुखद, अरम्य, विरुद्ध, कटु, असभ्य; 'o. to the ear' श्रवणकटु, कुश्राव्य; 'o. to the taste' निरस. **2** बीभत्स, जुगुप्सावह, गर्ह्य, कुत्सित, गर्हित, दुष्ट pr.; 'o. smell' दुर्गंधि, पूतिगंधः. **3** पीडाकर (री *f.*), अनिष्टावह, अहित, अपकारक, उपघातिन्; 'act on the o.' अपराधे अग्रेसरः भू 1 P; 'o. weapon' घातोपयुक्तं शस्त्रं. **4** आक्रामक, आ-अभिघातिन. **-ly**, *adv.* सापकारं, अप्रियं, सापराधं, सदोषं. **-ness**, *s.* अप्रियता, कटुता, गर्ह्यता, सापकारता, घातुकता.

Offer, *v. t.* उप-नी 1 P, उप-हृ 1 P, प्र-उप-कल्पय् c., उप-स्था c. (स्थापयति); प्र-दा 3 U, 1 P, प्रति-पद् c., निविद् c., ऋ c. (अर्पयति), निक्षिप् 6 P, सृज् c., उपहारं दा, उपढौक् c. **2** उपन्यस् 4 U, उप-क्षिप्, पुरो नि-धा 3 U, अभि-धा, निद्-उद्-दिश् 6 P. **3** प्र-,दृश् c., प्रकटीकृ; प्रसृ c., प्रक्षिप्. **4** दा desid. (दित्सति-ते). **5** (As an oblation) उपहृ, निवप् 1 U, निर्वप्, उत्सृज् 6 P, ऋ c., उपहारीकृ, उपायनीकृ; 'o. mango-sprouts in memory of Smara' स्मरमुद्दिश्य निवपेः सहकारमंजरीः (K. iv. 38); 'water o. ed to the Manes' निर्वापसलिलं; 'o. a burnt oblation' हु 3 P; 'o. a price' मूल्यं निर्दिश् or अभि-धा; 'o. violence' बलात्कारं कृ. **-*v. i.*** उप-स्था 1 U, आविः-प्रादुः-भू 1 P, उपनम् 1 P, दृश्-लक्ष् pass., आ-नि-पत् 1 P. **2** (Show willingness) ex. by desid. form, or वद् 1 P with future; 'he o.-ed to aid me' तव साहाय्यं करिष्यामीति उवाद. **3** प्रयत् 1 A, उद्यम् 1 A, चेष्ट् 1 A, उत्-जृंभ् 1 A; *See* **Attempt**. **-*s.*** उपन्यासः, उपक्षेपः, प्रस्तावः, अभिधानं, निर्देशः, वचनं, निवेदनं; sometimes प्रार्थना; 'o. for marriage' विवाहप्रार्थना; 'makes an o. of' दित्सति. **2** प्रयत्नः, उद्यमः, प्रवृत्ति *f.* **-er**, *s.* उपहर्तृ उपनेतृ, अर्पकः; निवेदकः, होतृ. all *m.* **-ing**, *s.* उपहरणं, उपनयनं, अर्पणं. **2** बलिदानं, बलिकर्मन् *n.* निवपणं, हवनं. **3** उपायनं, उपहारः, उत्सर्गः, बलिः, दानं; *See* **Oblation, Mane**. **4** (Sacrificial) हविस् *n.*, हव्यं, हुतं, आहुति *f.* **5** अर्घः, उपायनं, प्राभृतं.

Office, *s.* कर्मन् *n.*, कार्यं, नियोगः, क्रिया, कृत्यं, व्यापारः, धर्मः, प्र-,वृत्ति *f.* **2** अधिकारः, पदं, पदवी, स्थानं, आस्पदं, नियोगः, अधिकारपदं. **3** निधिसंग्रहः. **4** उद्योगस्थानं, कार्यानुष्ठानगृहं, कार्यस्थानं; 'good o.' उपकारः, उपकृत-र्ति *f.*, सुकृतं, अनुग्रहः, हितं; 'ill o.' अपकारः, अपक्रिया, अनिष्टं; 'holding o.', 'in o.' प्राप्ताधिकार, अधिकारापन्न, पदारूढ, अधिकृत; 'dismissed from o.' च्युत-भ्रष्ट-अधिकार, पदभ्रष्ट-च्युत; 'permanent o.' स्थिराधिकारः; 'temporary o.' चलपदं. **-Officer**, *s.* अधिकृतः, नियुक्तः, नियोगिन् *m.* अधिकारिन् *m.* आधिकारिकः, कार्यावेक्षकः; 'o. of the king' राजपुरुषः भृत्यः, प्रकृतिपुरुषः; 'o. of justice' धर्माधिकारिन् *m.* न्यायाध्यक्षः; 'military o.' सेनापदभाक् *m.* सैनिकाध्यक्षः; बलाधिपः. **-Official**, *a.* राजपुरुषः-भृत्यः, अधिकारी, नियोगी, पुरुषः, भृत्यः. **-*s.*** आधिकारिक (की *f.*), अधिकारपद-विषयक-संबंधिन्; अधिकारयुक्त. **-dom**, *s.* अधिकृतवर्गः. **-ly**, *adv.* अधिकारपूर्वं, अधिकारवशात्. **-Officious**, *a.* अनधिकारचर्चाशील, परकार्यचर्चक; *See* **Meddlesome**. **2** उपकारशील, अनुकूल, हित. **3** अत्युपचार, अत्युपकारिन्. **-ly**, *adv.* अधिकारचर्चया, सपत्निभं प्रगल्भतया. **-ness**, *s.* अन्याधिकारचर्चा, परकार्यचर्चा-प्रवेशः.
Off-scouring, *s.* *See* **Dirt**.
Off-set, *s.* प्ररोहः, अंकुरः. **-*v. t.*** समकै 8 U.
Off-shoot, *s.* प्ररोहः, अंकुरः, शाखा (lit. and fig.)
Offspring, *s.* संतानः, संतति *f.*, प्रसूति *f.*, प्रजा, अपत्यं, प्रसवः, तोकं; 'male o.' पुत्रः, सूनुः, पुमपत्यं, पुंसंतानः; 'female o.' कन्या, सुता, स्त्र्यपत्यं; 'having no o.' निर्वंश, निरपत्य, निःसंतान.
Offuscate, *v. t.* *See* **Obscure**.
Oft, Often, (O.-times), *adv.* असकृत्, बहुशः-धा, बहु-अनेक-वारं, सुहुर्सुहुः, भूयो भूयः, अनेकशः, अनेकदा, वारंवारं, अभीक्ष्णं; 'how o.' कतिशः, कतिवारान्; 'as o.-as so o.' यतिवारं-ततिवारं.
Ogle, *s.* कटाक्षः, कटाक्ष-अपांग-दर्शनं, नयनोपांतविलोकितं, अर्धधीक्षणं, भ्रूविलासः. **-*v. t.*** कटाक्षेण ईक्ष् 1 A or अवलोक् 1 A, 10, तिर्यक्-साचि-दृश् 1 P.
Ogre, *s.* क्रव्याद् *m.*, दैत्यः, दानवः, राक्षसः.
Oil, *s.* तैलं, स्नेहः, अभ्यंजनं; 'pour o. on burning fire' क्षते क्षारं प्रक्षिप् 6 P; 'o.-bottle' कुतू *f.*; 'o.-cake' तैलःकिट्टं, पिण्याकः, तिलकल्कं; 'o.-man' तैलिकः, तैलिन् *m* तैल-स्नेह-कारः, चाक्रिकः; 'o.-mill' तैलपेषणी. **-*v. t.*** तैलेन लिप् 6 P or अंज् 7 P or दिह् 2 U. **-ed**, *a.* तैलाक्त, स्नेहाक्त, अभ्यक्त. **-y**, *a.* तैलमय (यी *f.*), सस्नेह, सतैल, तैलयुक्त-वत्, तैलाक्त; चिक्कण, मसृण, स्निग्ध, (fig. also).
Ointment, *s.* अंजनं, वि-,लेपः-पनं, प्र-अनुलेपः, अभ्यंजनं, उपदेहः; 'perfumed o.' गात्रानुलेपनी, वर्ति *f.*, वर्णकं.
Old, *a.* (Person) वृद्ध, स्थविर, प्रवयस्, परिणत, परिणतवयस्, जीर्ण, वयोवृद्ध; जरठ, जरत्, जरातुर, गतवयस्क, जीन, जरण, जरंड; 'to grow o.' ज 4, 9 P, ज्या 9 P, परिणम् 1 P; 'o. age' जरा, परिणामः, परिणति *f.*, वार्धकं-क्यं; वृद्धावस्था, वृद्धभावः, ज्यानि *f.*, जीर्णि *f.*; 'o. lady' जरती, स्थविरा, वृद्धा, पलिता, पलिक्नी; 'o. man' स्थविरः, जरठः, वृद्धः, जरन्, पलितः. **2** (Showing age) ex. by वर्ष, वत्सर, वर्षीण-न in comp.; '8 years o.' अष्टवर्षीय, अष्टवर्ष-वर्षात्मक; 'a year o.' वर्षजात; '2 days o.' द्व्यहजात; 'how o. are you' किं ते वयःप्रमाणं, किंवर्षीयोसि. **3** (Not new) बहु-चिर-कालिक (की *f.*-), चिर-दीर्घ-कालीन, चिरकाल-चिर-स्थायिन, चिरंतन (नी *f.*); oft. by चिर in comp.; 'o. servant' चिरसेवकः, मूलभृत्यः, मौलः; 'o. friend' चिरमित्रं, चिरंतनसुहृद. **4** क्षीर्ण, जर्जर, जर्जरित; 'o. cloth' चीरं, जीर्णवस्त्रं, पटच्चरं. **5** (Ancient) पुराण, प्राचीन, पूर्व, पूर्वतन (नी *f.*), प्राक्तन, पुरातन, प्रतन, भवन, पौराण (णी *f.*), प्राक्-पूर्व-कालीन, पुरावृत्त; 'of o.' 'in olden times' पुरा, पुराकल्पे, पूर्वं. **-en**, *a.* पुरातन, पुराण, प्राचीन. **-ish**, *a.* ईषद्वृद्ध.
Oleaginous, *a.* स्निग्ध, चिक्कण, मेदुर, मसृण
Oleander, *s.* प्रति(ती)हासः, करवीरः, शतप्रासः, चंडातः, हयमारकः.
Oleraceous, *a.* शाकविषयक.
Olfactory, *s.* नस्य, नासा in comp.
Olibanum, *s.* तुरुष्कः, सिल्हः, यावनः; *See* **Incense** also.
Oligarchy, *s.* अल्पजनाधिपत्यं-प्रभुत्वं. **-ic**, *a.* अल्प-कतिपय-स्वामिक.
Olio, *s.* *See* **Medley**.
Olive, *s.* जितवृक्षः.
Omen, *s.* निमित्तं, शकुनः-नं, लक्षणं, चिह्नं, अजन्यं, पूर्वलक्षणं-चिह्नं, शुभाशुभलक्षणं; 'of good o.' शुभ, मंगल, सुलक्षण; 'good o.' सुलक्षणं; 'ill o.' दुश्चिह्नं, दुर्लक्षणं, अपशकुनः, अजन्यं, अवलक्षणं, अशुभलक्षणं. **-Ominous**, *a.* अनिष्ट or अशुभ-शंसिन् or आवेदिन, दुर्लक्षण, अलक्षण. **2** शुभ-मंगल-शंसिन्. **3** शाकुनिक (की *f.*), शकुननिमित्त in comp. **-ly**, *adv.* अशुभलक्षणेन, दुर्लक्षणपूर्वं.
Omit, *v. t.* वृज् 10, वि-परि-°, परि-त्यज् 1 P, उद्-,क्षिप् 6 P, मुच् 6 P, उत्सृज 6 P,

अपास् 4 U, हा 3 P. **2** अतिक्रम् 1 U, 4 P, उपेक्ष् 1 A, लंघ् 1 A, 10, अतिचर् 1 P, अतिवृत् 1 A, लुप् c., न कृ 8 U or वि-धा 3 U or अनु-ष्ठा 1 P. **-Omission,** *s.* वर्जनं, त्यागः, उत्सर्गः, लंघनं, अतिक्रमः, अतिचारः, लोपः, उपात्ययः, 'o. to do something' अननुष्ठानं, अविधानं, उपेक्षा.

Omnifarious, *a.* सर्वविध-प्रकार.

Omnigenous, *a.* सर्वप्रकार-जातीय.

Omnipotent, *a.* सर्वशक्तिमत्, सर्वसमर्थ-शक्ति, अमित-अपार-शक्ति. **-Omnipotence, -cy,** *s.* सर्वशक्तित्वं, अपार-अमित-शक्ति *f.*, सर्वसामर्थ्यं, अनंतशक्तिः.

Omnipresent, *a.* सर्वगत, सर्वात्मक, सर्व-विश्व-व्यापिन्, विश्वात्मन्, विश्वरूप. **-Omnipresence,** *s.* सर्व-विश्व-व्याप्ति *f.*, विश्वात्मता, विश्वरूपता, सर्व-विश्वव्यापिता.

Omniscient, *a.* सर्वज्ञ, सर्वविद्-वेदिन्-बुध, सर्वदर्शिन्-साक्षिन्, विश्वनेत्र, त्रिकालज्ञ. **-Omniscience,** *s.* सर्वज्ञत्वं, सर्वज्ञानं.

Omnivagant, *a.* सर्वगत, सर्वगामिन्.

Omnivorous, *a.* सर्वभक्ष, सर्वभोजिन्.

Omphalic, *a.* नाभ्य, नाभि in comp.

Omphalocele, *s.* नाभिस्फोटः.

On, *prep.* Gen. ex. by loc., अधि pr., उपरि (with gen.). **2** (Time, place) by loc.; 'o. the shore' तीरे, तीरोपरि, उपतीरं. **3** (With verbs of motion) by loc. or instr., (स्कंधेन or स्कंधे छायं गृहीत्वा); 'go o. foot' पद्भ्यां गम् 1 P. **4** (Direction) by loc. or by नञ्, न affixed; 'o. the left' वामतः; 'o. all sides' सर्वतः, सर्वत्र, समंततः. **5** (After) ex. by abl. or loc. abs.; 'o. his arrival' तस्मिन् आगते, तदागमनात्; or by gerund; 'o. hearing his speech' तस्य वचः श्रुत्वा. **6** (Concerning) विषय-संबंधिन् in comp. or by comp.; 'a work o. morals' नीतिग्रंथः; 'so o.' इत्यादि (*a.*); 'hence, o. thy life' स्वजीवितं यदि वांछसि तर्हि द्रागपसर, अपसरास्मात्स्थानान्नो चेत् त्वं जीवितेन वियोक्ष्यसे; 'o. o., to the combat' नन्वु युद्धाय प्रयात. *-adv.* अग्रतः, अग्रे, प्र pr.; 'having clothes o.' परिहितवस्त्र. **-ward,** *a.* अग्रेसर (री *f.*), अग्रगामिन्, वर्धिष्णु. **-wards,** *adv.* अग्रे, अग्रतः, पुरतः.

On-dit, *s.* किल *ind.*; *See* **Rumour.**

One, *a.* एक; 'o. of two' एकतर; 'o. of many' एकतम; 'only o.' अनन्य; 'fixed on o. object' अनन्यविषय, अनन्यवृत्ति. **2** (Any) कश्चन, कोपि. **3** (Same) एक, तद् with एव; 'at o. time' युगपत्, सम, एककाले; 'having o. meaning' एकार्थ. *-s.* जनः, नरः, मनुष्यः; 'gen. not ex.; 'o. should always protect oneself' आत्मानं सततं रक्षेत्; 'o. by o.' एकैकशः, एकैकं, प्रत्येकं, पृथक्पृथक्; 'o. day' कदाचित्, कदापि काले; 'young or little o s.' शिशुजनः, बालाः; 'in o. way' एकधा; 'o.-self' आत्मन् *m.*, स्वयं *ind.*; 'o.'s own' स्व, निज, आत्मीय, स्वीय, आत्म in comp.; 'to be at o.' समन् 4 A; 'o.-eyed' एकाक्ष, काण, एकाक्षिहीन; 'o.-sided' असम, एकपक्षीय, एकदेशीय; 'o. another' अन्योन्यं, परस्परं, इतरेतरं; 'to be o.-self again' प्रकृतिमापद् 4 A, संज्ञां लभ् 1 A: *See* 'come to senses' under **Sense**; 'to bring to o.-self' स्वकृतौ स्था c. (स्थापयति). **-ness,** *s.* एकत्वं, एकभावः, अद्वैतं, अभेदः, अविशेषः. **-Once,** *adv.* सकृत्, एकवारं. **2** (O. upon a time) एकदा, अथैकदा, अथ कदाचित्. **3** पुरा, पूर्वं, प्राक्काले; 'at o.' सम, युगपत्, एककाले, समकाले-लं; सद्यः, सपदि, तत्क्षणात्, तत्क्षणेन, तत्काले; 'all at o.' अकस्मात्, एकपदं; 'o. more' पुनरपि, भूयः, पुनः.

Oneirocritic,-al, *a.* स्वप्नविचारिन्.

Oneiromancy, *s.* स्वप्नार्थविचारः, स्वप्नार्थज्ञापनं.

Onerous, *a.* दुर्भर, गुरु, गुरुभार, दुर्वह, दुःसह.

Onion, *s.* पलांडुः, सुकंदकः.

Only, *a.* एक, एव, एकाकिन्, केवल, मात्र-मात्रक in comp., अद्वितीय, अनन्य, 'having that as the o. recourse' तदैकशरण, अनन्यगतिक. *-adv.* केवलं, एव, मात्र in comp.; 'not o. but' न केवलं followed by अपि or किंतु.

Onomatopœia, *s.* अनुकारः; अनुकरणं.

Onset, *s.* आ-अभि-क्रमः-मणं, अवस्कंदः, अभिसंपातः, आपातः, अभिग्रहः, अभ्याघातः.

Onslaught, *s.* अभ्याघातः; *See* **Onset**

Ontology, *s.* सत्त्वविद्या, भूतविचारः. **-ist,** *s.* सत्त्वविद्याज्ञः.

Ooze, *v. i.* (शनैः) स्रु-स्रद्-गल् 1 P, स्यंद् 1 A, प्र-स्रु 2 P, री 4 A. *-v. t.* स्रु c., स्यंद् c., &c. *-s.* क्षरत्पंकः, मृदुभूमिका. **2** स्रवः, द्रवः, धारा. **-ing,** *s.* स्यंदनं, क्षरणं, स्रवः. **-y,** *a.* सस्रव.

Opaque, *a.* प्रकाशाभेद्य, किरणाभेद्य; अस्वच्छ, कलुष, निष्प्रभ, सांधकार. **-ness, -Opacity,** *s.* अस्वच्छता, निष्प्रभता, कालुष्यं. **2** शुक्लं.

Opal, *s.* पुलकः, निमंतकः.

Open, *v. t.* (Door &c.) अपा-वि-कृ 5 U, उद्-घट c., निरर्गलीकृ 8 U; (lotus) विकस् c., प्रबुध् c., भिद् 7 P or c., (सूर्यांशुभिर्भिन्नमिवारविंदं K. 1. 32), स्फुट् c.; (eyes) उन्मील् c., उत्फल् c., उन्मिष् c.; (mouth) व्या-दा 3 P, जृंभ् c., उत्-वि-; (hand) प्रसृ c., वितन् 8 U, विस्तृ c. **2** वि-अंज् 7 P or c., विवृ, प्रकटीकृ, आविष्कृ, व्यक्तीकृ, प्रकाशू c., 'o. the heart', o. oneself' हृदयं निविद् c. **3** (As meaning) व्या-ख्या 2 P, व्याचक्ष् 2 A, व्याकृ, व्यक्तीकृ, विवृ. **4** छिद् 7 P, निर्भिद्. **5** शुध् c., वि-परि°. **6** प्रारभ् 1 A, प्रस्तु 2 U, प्र-उप-क्रम् 1 A. *-v. i.* उन्मील् 1 P, विकस् 1 P, स्फुद् 6 P, दल् 1 P, भिद् pass., फुल्ल् 1 P. **2** विस्तृ-विधू- pass., वि-जृंभ् 1 A, प्रसृ c.-वितन्-pass.; (in other senses) pass. of roots in (*v. t.*). **4** (Ground) स्फुद्, विदल्, द्विधाभू, विदृ-भिद्-pass. **5** प्रवृत् 1 A, प्रारभ् pass. *-a.* वि-अपा-वृत, असंवृत, उद्घाटित; (eyes) उन्मीलित, उन्मिषित; (hand) प्रसारित, विततं, विस्तृत; विस्तीर्ण; (mouth) विजृंभित, सजृंभ, उज्जृंभ, व्याप्त; (letter) उन्मुद्र, निरावेष्टन, अकोशस्थ. **2** निर्व्रण, असंबाध, निरर्गल, अनर्गल, अरुद्ध, उत्-वि-शृंखल, निरवग्रह; वि-, शुद्ध, निर्विघ्न; *See* **Free. 3** निर्व्याज, उत्तान, निष्कपट, सरल, ऋजु, निर्माय, उदार, शुद्ध-मति, विमलात्मन्; *See* **Frank**; 'o.-minded person' उत्तानहृदयः जनः. **4** सु-, प्रकाश, वि-,स्पष्ट, व्यक्त, प्रकट, अगूढ, अगुप्त. **5** निर्वृक्ष, अपादप; अनाश्रय. **6** गम्य, उपसर्पणीय; *See* **Accessible,** 'lays him o. to his enemy' शत्रुगोचरे (विषये) तं पातयति; 'o. to dispute' विवादास्पदं, विवादग्रस्त-*a.*; 'lay o' प्रकाशू c.; *See* (*v. t.*) 'o. air' अनावृतप्रदेशः-भूभागः; 'o. at one end' एकमुख; 'having gone out into the o. air' प्रकाश निर्गतः (S. 4); 'o.-eyed' विवृताक्ष, उत्फुल्लनयन, सचेतन (fig.); 'o.-handed' उदार, मुक्तहस्त; 'o.-hearted' उदार, उत्तान-हृदय, निर्व्याज; 'o.-mouthed' व्याप्तमुख. **-er,** *s.* उद्घाटकः, प्रकाशकः. **-ing,** *s.* विचरणं, विवृति *f.*, उद्घाटनं; उन्मीलनं, विकासः, भेदः, स्फुटनं. **2** छिद्रं, रंध्रं, द्वारं, विदरः, स्फु(स्फो)टनं, भिदा. **3** प्रारंभः, उपक्रमः, प्रस्तावः, उपोद्घातः. *-a.* विकसत्, स्फुटत्. **2** प्रथम, आद्य, आरंभक. **-ly,** *adv.* प्रकाशं, सुस्पष्टं, व्यक्तं, परि-, स्फुटं. **-ness,** *s.* विवृतत्वं, विवृति *f.*, निर्व्याजता, सारल्यं, निष्कापट्यं, दाक्षिण्यं, शुद्धमतिता, व्यक्तता, स्पष्टता, प्रकाशता, प्राकट्यं.

Opera, *s.* संगीतनाटकं.

Operate, *v. t.* गुणं आवह् 1 P, कार्यं उत्पद् c. or हृञ् c., फलं सं-पद् c. or साध् c., प्रभू 1 P, प्रभवीभू; *See* **Effect. 2** कृ 8 U, वि-धा 3 U, चेष्ट् 1 A, प्रवृत् 1 A प्र-यत् 1 A व्यापृ 6 A. **3** क्लेशेन उपचर् 1 P or साध् c. **-ion,** *s.* क्रिया, कर्मन् *n.*, कृति *f.*, कार्यं, कृत्यं. **2** चेष्टितं, प्रवृत्ति *f.*, उद्यमः, उद्योगः, प्रयत्नः, व्यापारः. **3** प्रवर्तकत्वं, हेतुता, का साधनं; 'mental o.' मनोव्यापार. 'quick in o.' आशुकारिन्, सद्यःफल, आशुगुणावह. **4** (Surgical) शस्त्रक्रिया-कर्मन् *n.* शस्त्रोपायः, शस्त्रोपचारः. **-ive,** *a.* कर्मकारिन्, प्रवर्तक, प्रयाजक, कारणीभूत. **2** गुणावह, गुणकारिन्, सिद्धिकर (री *f.*), प्रबल, सप्रभाव, प्रभविष्णु, कार्यक्षम. *-s.* कर्म-शिल्प-कारः, कारुः. **-or,** *s.* कारकः, कर्तृ *m.* प्रवर्तकः.

Operose, *a.* श्रम-कष्ट-साध्य.

Ophiology, *s.* सर्पविद्या.

Ophthalmia, *s.* नेत्राभिष्यंदः.

Opiate, *a.* निद्रावह, निद्रा-स्वाप-कारिन्, स्वापन. *-s.* निद्रावहं औषधं स्वापनं.

Opine, *v. i.* मन् 4 A तर्कू 10; *See* **Think. -Opinion,** *s.* मतं, मति *f.*, तर्कः, बुद्धि *f.*, बोधः, अभिप्रायः, आशयः; 'such is my o.' इति मे मतिः; 'difference of o.' मति-(त)भेदः, विप्रतिपत्ति *f.*, वैमत्यं; 'regard for public o.' लोक or जन-लज्जा or भयं; 'secure the good o. of your husband' भर्तुर्बहुमता भव (S. 4). **-ated, -ative,** *a.* स्वमतानिमानिन्, मताग्रहिन्, दुराग्रहिन्.

Opium, *s.* अहिफेनं, अफेनं.

Opponent, *a.* विरुद्ध, प्रतिकूल, वि-प्रति-पक्ष, वैरिन्. *-s.* शत्रुः, अरिः, वैरिन्, वि-प्रति-पक्षः; प्रतियोद्धृ, प्रतियोगिन्, प्रतिरोधकः all *m.*

Opportune, *a.* समयोचित, प्राप्तकाल, काल-योग्य, प्रस्तावसदृश (क्षी *f.*), प्राप्तावसर, सामयिक-प्रास्तावि-क- (की *f.*). **-ly,** *adv.* प्राप्तकालं, काले, स्थाने, यथासमयं, यथावसरं, प्रस्तावसदृशं, कालोचितं. **-ness,** *s.* कालोचित्यं, प्रस्तावयोग्यता. **-Opportunity,** *s.* प्रस्तावः, अवकाशः, अवसरः, कालः, समयः, प्रसंगः, वेला, कार्यकालः, योगः. **2** साधनं, उपायः, प्रयुक्ति *f.*; 'lose an o.' कालं क्षिप् 6 P or हृ 1 P; 'seizing an o.' अवसरं गृहीत्वा, गृहीतावसर, लब्धावकाश; 'to await an o.' अवसरं प्रति-पा c. (पालयति).

Oppose, *v. t.* वि-नि-प्रति-रुध् 7 U, प्रतिबंध् 9 P, प्रतिकृ 8 U, प्रतिकूलयति (D.), प्रत्यच-स्था 1 A, वि-प्रति-हन् 2 P, बाध् 1 A, निवृ c., (in fighting) प्रतियुध् c.; सं-मुखी-अभिमुखी-कृ 8 U or भू. **-ed,** *a.* विरुद्ध, विपरीत, प्रतिकूल, विप्रतिपन्न, बाधित, वारित, असंमत, विद्विष्ट, 'o. to the practice of the world' लोकाचारविरुद्ध, लोकासंमत, लोकविद्विष्ट. **2** इतर in comp.; 'o. to false' मिथ्येतर. **-er,** *s.* विरोधकः, प्रतिहंतृ *m.* **-Opposite,** *a.* सं-प्रति-अभिमुख (खी *f.*), संमुखस्थ. **2** विरुद्ध, विरोधिन्, विपरीत, प्रतिकूल, वि-प्रति-पक्ष, प्रतिद्वंद्विन्, विपर्यस्त,व्यस्त, इतर in comp.

of natural ' सहजेतर; सव्येतर, &c. **3** र, अपर, अंतर in comp.; ' the o. bank' पारं, तीरांतरं, अपरतीरं. **-s.** विपर्ययः, व्यत्यासः, विपरीतं; by (*a.*). **-ion,** *s.* वैपरीत्यं, प्रातिकूल्यं, विरोधः, विपक्षता, विपर्य-(र्या)यः, व्यत्ययः, व्यत्यासः, विपर्यासः. **2** विरोधः, प्रतिक्रिया, प्रतिबंधः, प्रतियोगः-यत्नः, व्याघातः, बाधः-धा. **3** विरोधकजनाः, प्रतियोगिपक्षः, विरोधिजनवर्गः. **4** विरुद्ध-द्वेष-भावः, वैरं. **-ly,** *adv.* सं-अभि-मुखं, विपरीतं, प्रतिकूलं, विपर्ययेण.

Oppress, *v. t.* पीडू 10, अर्द् 1 P or c., उपसृ 1 P, बाध् 1 A, नि-अप-कृ 8 U, विप्र-कृ, उपप्लु 1 A, उप मृद् 9 P or c., कृष् c., अभिभू 4 P, अभिभू 1 P. **-ion,** *s.* पीडा, पीडनं, बाधः-धा, अर्दनं, उपमर्दः, उपप्लवः, उपद्रवः, नि-विप्र-अप-कारः, नैर्घृण्यं, क्रौर्यं. **-ive,** *a.* बाधक, पीडाकर (री *f.*), उप-प्लविन्, उपद्रविन्, पीडामद्, अपकारक; निष्ठुर, अतिक्रूर, क्लेशद. **2** अतिभारवत्. **-or,** *s.* प्रजापीडकः, उपप्लावकः, उपद्रविन् *m.*, अत्याचारः, निष्ठुरः, क्रूरचरितः.

Opprobrium, *s.* निंदा, गर्हा, कुत्सा, तिर-स्कारः, अपवादः, अवज्ञा, परिभवः, वाच्यता, धिक्कारः. **-Opprobrious,** *a.* गर्ह्य, निंदा-त्मक, गर्हारूप, निंदा-गर्हा-अर्थक; परुष, मुखर, द्वेष्य. **-ly,** *adv.* सापवादं, सतिर-स्कारं. **-ness,** *s.* गर्ह्यता, निंद्यकत्वं.

Oppugn,-er, *See* **Oppose** &c.

Optative, *a.* इच्छार्थक.

Optic,-al, *a.* चाक्षुष (षी *f.*), चक्षु-नेत्र in comp. **2** दृक्शास्त्रसंबंधिन. **-s.** चक्षुरिंद्रियं, दृग्निंद्रियं. **-Optics,** *s.* दृग्विद्या-शास्त्रं.

Optimacy, *s.* कुलीनवर्गः-जनाः.

Optimism, *s.* उत्तमता, उत्कृष्टता.

Option, *s.* अभि-,रुचि *f.*, इच्छा, कामः, अभिलाषः, ह्रादिस्तं; विकल्पः, विभाषा (in grammar); ' it is left to your o ' अत्र स्वरुच्या वर्ततां भवान्, यथाभिलाषं क्रियतां. **-al,** *a.* वैकल्पिक- ऐच्छिक- (की *f.*), काम्य, सविकल्प, यथाकाम, स्वरुचीय, स्वेच्छातंत्र. **-ally,** *adv.* विकल्पेन, अन्य-तरस्यां, (इकोरन्यतरस्यां), वा, विभाषया.

Opulent, *a.* श्रीमत्, धनिन्, धनाढ्य, वित्तवत्, धन-वित्त-संपन्न, धानिक, समृद्ध, संपन्न, धनेश्वर, बहुधन. **-Opulence,** *s.* विभवः, ऐश्वर्यं, समृद्धि *f.*

Or, *conj.* अथवा, यद्वा, वा (never at beginning) repeated after each word, or after the last; (in questions) नु, (स्वमो नु माया नु मातिभ्रमो नु); उत, आहो, आहोस्वित् (correl. of किं ' whether '). **2** अन्यथा, इतरथा, अथवा, नोचेत्.

Oracle, *s.* दैवी वाक्, देव-आकाश-वाणी, आकाशभवा-अशरीरिणी-सरस्वती. **2** प्रश्न-देवता-देवः. **3** प्रश्न- शकुन-स्थानं. 4 प्रमाणं, शास्त्रः, प्रमाणपुरुषः; आप्तवचनं. **-Oracular,** *a.* देववाणीतुल्य, प्रमाणभूत, आप्त, प्रामाणिक (की *f.*).

Oral, *a.* वाचिक (की *f.*), उक्त, अलिखित; ' o. message ' वाचिकं. **-ly,** *adv.* वाचा, मुखद्वारा, अलिखितं.

Orange, *s.* नारंगः, नागरंगः, ऐरावतः, नादेयी, भूमिजंबुका; (fruit) नारंगफलं; ' o.-colo ured ' पिच्छिल, कौसुंभ (भी *f.*). **-Orangery,** *s.* नारंग-वाटिका.

Oration, *s.* वाक्प्रबंधः, सालंकारं वचनं, वचनं, सरस्वतीनिष्यंदः (fluent o.). **-Orator,** *s.* प्र-,वक्तृ *m.*, वाक्शौंडः-चतुरः, प्रवचनपटुः, सद्वक्तृ *m.* वाक्पटुः, वाग्मिन् *m.*, वागीशः, वाक्पांडितः-विशारदः, सभापंडितः. **-ical,** *a.* वाक्चातुर्यमय (यी *f.*), सालंकार, वाग्लंकारमय. **-y,** *s.* वाग्मिता, वाक्पांडित्यं-चातुर्यं, सुवक्तृत्वं, वाक्शक्ति *f.*, वक्तृत्वं, सभापांडित्यं. **2** प्रार्थनागारं, उपासनास्थानं, भजनालयः. **-Oratorio,** *s.* तालबद्धं धर्मकीर्तनं. **2 Oratory** q. v.

Orb, *s.* मंडलः-लं, बिंबः-बं, वर्तुलं, चक्रं, वृत्तं, गोलः-लं; ' the moon with entire (undiminished) o. ' पूर्ण-अविकल-मंडलः चंद्रः, अखंडकलः शशी (Mal. 2). **-ed, -Orbicular,** *a.* मंडलाकार, वर्तुल,गोलाकृति. **-Orbiculate,** *s.* वर्तुलं. *-a.* वर्तुल; *See*(*s.*).

Orbit, *s.* कक्षा-क्षः, ग्रहपथः-मार्गः.

Orchard, *s.* वाटिका, वाटः-टी, उपवनं, वृक्षोद्यानं, वृक्षवाटिका; ' fruit o. ' पुष्प-वाटिका.

Orchestra, *s.* वादित्रस्थानं-स्थलं. **2** वादक-समूहः, वादित्रगणः.

Ordain, *v. t.* वि-धा 3 U, आदिश् 6 P, निर्दिश्, संव्यव-स्था c. (स्थापयति), प्र-परि-कल्प् c ; प्रचुद् 10, वच् 2 P, स्मृ 1 P; 'o. ed by *Sastras*' शास्त्रोक्त, शास्त्रविहित-स्मृत, शास्त्रनिर्दिष्ट, &c. **2** (अधिकारे) नियुज् 7 A, 10, अधिकृ 8 U, or c., अभि-षिच् 6 P, व्या-दिश्, (religiously) दीक्ष् 1 A, धर्मकर्मणि नियुज्. **-er,** *s.* प्रकल्पकः, संस्थापकः, प्रचोदकः.

Ordeal, *s.* दिव्यं, सत्यं, परीक्षा, प्रमाणं; ' o. by fire ' कोशाः-षः, तापदिव्यं; 'subjecting oneself to o. ' दिव्यग्रहणं; 'trying o.' (fig.) तत्त्वनिकषा आपद्.

Order, *v. t.* आदिश् 6 P, निर्-नि-समा-व्या-दिश्, शास् 2 P, आ-ज्ञा c. (ज्ञापयति), प्रचुद् 10. **2** वि-धा 3 U, ग्रथी 1 P, निर्वृत् c.; *See* **Manage.** **3** परिकल्प् c., क्रमेण विन्यस् 4 U or c. or स्था c. (स्थापयति) or नि-धा, संवि-धा,व्यव-स्था c., वि-,रच् 10;

व्यूह् 1 U. **4 Ordain,** q. v. **-s.** आज्ञा, आ-नि-देशः, निर्देशः, शासनं, नियोगः; ' written o. ' आज्ञापत्रं; ' what are your o. s ' को नियोगोऽनुष्ठीयतां; ' your Majesty's o. s will be obeyed ' यथा-ज्ञापयति देवः. **2** प्र-,चोदन-ना, विधिः, नियमः, विधानं, प्रेरणा, वचनं. **3** क्रमः, अनुक्रमः, परिपाटि-टी *f.*, आनुपूर्व्यं-र्वी, पर्यायः, परंपरा, पारंपर्यं, आवृत् *f.*; व्यवस्था, विन्यासः, विरचन-ना, संविधानं; ' natural o. ' आनुलोम्यं; ' inverted o.' ' reverse o. ' प्रातिलोम्यं, व्युत्क्रमः, व्यतिक्रमः, विपर्ययः, विपर्यासः, व्यत्यासः, व्यत्ययः; ' o. of battle ' व्यूहः, सैन्यरचना, बलविन्यासः; ' natural o. of words ' अन्वयः; ' in natural or direct o.' अनुलोमं-मतः; 'in inverted o. ' प्रतिलोमं-मतः; in good o. ' सुस्थित, सुरक्षित, सुविहित; ' in o. ' सुनि-न्यस्त, सुविरचित, व्यवस्थित, क्रमेण स्थापित; (*adv.*) क्रमेण, क्रमशः, यथाक्रमं, क्रमानुरूपं, अनुपूर्वशः, आनुपूर्व्येण, परिपाट्या; ' in o. to' ex. by अर्थे-र्थं in comp.; by dat. or by inf.; ' out of o. ' अव्यवस्थित, भग्न-क्रम, असुस्थ. **3** मार्गः, स्थिति *f.*, रीति *f.*, पद्धति *f.*, आचारः, नियमः; 'not breaking the (established) o. ' स्थितेरभेत्ता (R. III. 27) स्थित्यै दंड्यतो दंड्यान् (R. I. 25) ' for maintaining o. &c.'; 'breaking the o. ' स्थितिभेदः, अतिपातः, पर्ययः, उपात्ययः. **5** गणः, वर्गः, वर्णः, जाति *f.*; ' the lower o. s ' अवर-अधम-वर्णाः, अंत्यवर्गः, अधमजातीयाः. **6** आश्रमः, वर्णा-श्रमः; ' head of a religious o. ' आश्रम-गुरुः. **-er,** *s.* आज्ञापकः, आदेष्टृ *m.*; शास्तृ *m.* **-less,** *a.* क्रमहीन,शून्य, अक्रम, अनवस्थित. **-ly,** *a.* व्यवस्थित, यथाक्रम, क्रमानुगत, सक्रम, अनुपूर्व. *—adv.* यथाक्रमं, पर्यायेण, क्रमशः.

Ordinal, *a.* क्रमवाचक. **-s.** क्रमिकसंख्या. **2** विधिसंहिता.

Ordinance, *s.* विधिः, मर्यादा, कल्पः, प्र-,चोदनं-ना, स्थिति *f.*, धर्मशास्त्रविधिः-मर्यादा, नियमः, सूत्रं. **2** नि-आ-देशः, शासनं, नियोगः.

Ordinary, *a.* प्रचलित, प्रसिद्ध, प्रायिक (की *f.*), लोकप्रसिद्ध. **2** साधारण (णी *f.*), सामान्य, व्य(व्या)वहारिक-आचारिक-नैयमिक-(की *f.*), नित्य, यथाव्यवहार, यथापद्धति; ' something more than o. ' विशेषः. **3** सामान्य, मध्यम, प्राकृत, अवर, नीतिविशिष्ट; ' an o. woman ' नातिरूप-वती स्त्री, सामान्यलावण्योपेता. **-s.** धर्माध्यक्षः. **3** साधारणभोजनस्थानं. **-ily,** *adv.* सामान्य-तः, साधारणतः, प्रायः, प्रायेण, प्रायशः.

Ordinate, *a.* यथानुक्रम, अनुपूर्व. **-ion,** *s* विधानं, कल्पनं, नियोगः. **2** दीक्षा; *See* **Ordain.**

Ordnance, *s.* युद्धास्त्रसामग्री, युद्धयंत्रसमूहः.

Ordure, *s.* पुरीषं, विष्ठा, उच्चारः; *See* **Dung;** ' to void o.' पुरीषं उत्सृज् 6 P or उच्चर् 1 P.

Ore, *s.* धातुः, खनिज-असंस्कृत-धातुः.

Organ, *s.* इंद्रियं, करणं, हृषीकं, विषयिन् *n.*; (of action) साधनं, करणं, उपकरणं, कर्मसाधनं, कर्मेंद्रियं; ' intellectual or internal o. ' धींद्रियं, अंतरिंद्रियं. **2** द्वारं, मुखं, साधनं. **3** वंशी. **-ic,-ical,** *a.* इंद्रिय-संबंधिन्, इंद्रियगत (ती *f.*)-विशिष्ट, इंद्रिय-योत्पन्न, सकरण; इंद्रिय in comp. **-ism,** *s.* रचना, घटना. **-ist,** *s.* वंशीवादकः **-Organize,** *v. t.* निर्मा 3 A, 2 P, सृज् 6 P, कृप् c., वि-रच् 10, घट् c. (घटयति). **2** वि-धा 3 U, संवि-धा, विन्यस् 4 U, क्रमेण स्था c. (स्थापयति), व्यव-स्था c., व्यूह् 1 U. **3** इंद्रियैः संयुज् 7 U, 10. **-ation,** *s.* निर्माणं, सृष्टि *f.*, घटनं-ना, विन्यासः, व्यूहः-हनं, संविधानं. **2** भाग-विरचनं-कल्पना-विन्यासः. **3** सेंद्रियता.

Orgasm, *s.* आ-सं-वेगः, क्षोभः, उत्तापः, अत्यंतावेगः.

Orgy, *s.* राज्युत्सवः, नैशोत्सवः, महर्षः, प्रमोदः.

Orient, *a.* उज्ज्वल, भास्वत्; *See* **Bright.** **2** उद्यत्, उदयमान. **-s.** प्राची, पूर्वदेशः. **-al,** *a.* पौरस्त्य, प्राच्य, पूर्वदेशीय, पूर्व, प्राचीन. **-s.** पूर्वदेशवासिन् *m.* **-alist,** *s.* पूर्वदर्शीयभाषाज्ञः.

Orifice, *s.* मुखं, छिद्रं, रंध्रं, द्वारं, सुषिरं, विवरं; ' o. of the ear ' कर्णभः.

Origin, *s.* मूलं, प्रभवः, आ-प्रा-रंभः, उत्पत्ति *f.*, उद्भवः, उद्गमः, संभवः, जन्मन् *n.*, जाति *f.*, आदिः, योनि *f.*,बीजं, हेतुः, आदिकारणं, उत्पत्तिस्थानं. **2** प्रयोजकः, प्रवर्तकः; ' of low o. ' हीनजाति-जन्मन्, दुर्योनिः; ' of good o. ' मौल (ली *f.*), उत्कृष्टजाति. **-al,** *a.* मौल, प्रथम, आदिम, आद्य, पूर्व, आदि-मूल-in comp.; ' o. passage ' मूलं, मूलवचनं. **2** अपूर्व, अपूर्वकल्पित, अचिंतित-पूर्व, स्वतः-स्वयं-कल्पित. **3** अपूर्वरचक, स्वतः कल्पक. **-s.** मूलं, आदर्शः, मूलपत्र-ग्रंथः-लेखः; *See* (*s.*). **-ality,** *s.* अपूर्व-रचनाशक्ति *f.*, कल्पकत्वं-ता, अपूर्वकल्पना-सामर्थ्यं, कल्पनाशक्तिः. **2** अपूर्वता. **-ally,** *adv.* आदौ, प्रथमं, प्रथमतः, मारंभे, मूलतः. **-ate,** *v. t.* (प्रथमं) उत्पद् c., जन् c. (जनयति), उद्भू c., सृज् 6 P, कृप् c., प्रवृत् c., निर्मा 3 A; मारभ् 1 A, उपक्रम् 1 A. **-v. i.** (प्रथमं) उत्पद् 4 A, जन् 4 A,

प्र-उद्-सं-भू 1 P, प्रसू 1 P; उद्-इ 2 P, उद्-गम् 1 P, प्रवृत् 1 A, उत्था 1 P; ex. by (*s.*) or by 'Arise', q. v. **-ation,** *s.* प्रारंभः, प्रथमोद्भवः. **-ator,** *s.* प्रवर्तकः, उत्पादकः, कल्पकः, योजकः, आरंभकः, निर्मातृ *m.* also ex. by (*s.*)

Orion, *s.* मृगशीर्षं.

Orison, *s.* प्रार्थना, स्तवः, स्तुति *f.*, उपासना, स्तोत्रं.

Ornament, *s.* अलंकारः, वि-,भूषणं, आभरणं, मंडनं; (decoration) अलंकरणं भूषा, अलंक्रिया, संस्कारः, परिष्कारः, परिकर्मन् *n.*, प्रतिकर्मन् *n.* प्रसाधनं कल्पना, लज्जा, नेपथ्यं, शोभा; (fig.) ललामं, अवतंसः, अलंकारः, तिलकः; 'o. to the Kshatriya family' क्षात्रियकुलावतंसः; आश्रमललामभूता; पंडितकुलतिलकः &c. **-v.** *t.* अलंकृ 8 U, परिष्कृ, मंडू 10; भूष् 10, प्रसाध् c., शुभ् c., रंज् c. **-al,** *a.* शोभावह, वि-, भूषक, शोभामद्, शोभा-भूषा-कर (री *f.*), अलंकरिष्णु; or by (*s.*). **-ally,** *adv.* विभूषणार्थं. **-ation,** *s.* अलंकरणं, मंडनं; रंजनं.

Ornate, *a.* कांतिमत्, विचित्र, शोभित, वि-,भूषित; सालंकार, अलंकारमय (यी *f.*), अलंकृत, कृतालंकार. **-ly,** *adv.* सालंकारं, शोभापूर्वं.

Ornithology, *s.* पक्षिविद्या. **-ist,** *s.* पक्षिविद्याज्ञः.

Orphan, *s.*, *a.* अनाथः, मातापितृरहितः; हीनः, गतमातृकः, गतपितृकः. **-age,** *s.* अनाथता. **2** अनाथाश्रयः, अनाथालयः.

Orpiment, *s.* (yellow) पिंजरं, पीतनं, तालं, आ(अ)लं, हरितालकं.

Orrery, *s.* ग्रहमालालुकरणयंत्रं.

Orris, *s.* वचा, उग्रगंधा, षड्गंधा, गोलोमी, शतपर्णिका; (white) हैमवती, श्वेतवचा.

Orthodox, *a.* शास्त्रीय, शास्त्रसंमत, शास्त्रमतानुसारिन्, धर्मपरायण, सत्यधर्मानुरोधिन्. **-y,** *s.* शास्त्रानुसारः, शास्त्रमार्गावलंबनं, धर्मपरायणता.

Orthoepy, *s.* शुद्धोच्चारः-रणं. **-ist,** *s.* शुद्धोच्चारणविद् *m.*

Orthogon, *s.* समचतुरस्रं. **-al,** *a.* समकोणाकृति.

Orthography, *s.* अक्षर-वर्ण-विन्यासः, वर्णविन्यासशास्त्रं-विचारः.

Orts, *s.* *See* **Offal.**

Oscillate, *v. i.* दोलायते (D.), प्रेखृ 1 P, इतस्ततः चल् 1 P or कंपृ 1 A or स्फुर् 6 P or स्पंद् 1 A; *See* **Waver. -ion,** *s.* आंदोलनं, प्रेखणं, इतस्ततः चलनं, गतागतं. **-ing, -ory,** *a.* दोलायमान, स्पंदमान, स्फुरित.

Oscitant, *a.* वि-,जृंभमाण, जृंभित. **2** निद्रालु, तंद्रालु. **-Oscitate,** *v. i.* वि-,जृंभ् 1 A.

Osprey, *s.* कुररः-री, उत्क्रोशः.

Osseous, *a.* अस्थिमय (यी *f.*). **-Ossicle,** *s.* अस्थिकं. **-Ossify,** *v. t.* अस्थिसात्कृ 8 U. **-***v. i.* अस्थिसाद् भू 1 P. **-Ossuary,** *s.* अस्थिस्थानं.

Ostensible, *a.* व्यक्त, सुप्रकाश, प्रकट, प्रसिद्ध, अगूढ. **-Ostensibly,** *adv.* प्रकाशं-शतः, प्रकटं, अगूढं.

Ostentation, *s.* आडंबरः, दंभः, दर्पः, विकत्थनं, आत्मश्लाघा. **-Ostentatious,** *a.* आडंबर-प्रिय-शील, दंभशील, दांभिक (की *f.*); आत्मश्लाघिन्. **-ly,** *adv.* साडंबरं, दंभपूर्वं, सदंभं.

Osteocope, *s.* अस्थिवेदना.

Osteology, *s.* अस्थिशास्त्रं-विद्या.

Ostler, *s.* *See* **Groom.**

Ostracise, *v. t.* वि-निर्-वस् c. **-Ostracism,** *s.* विवासनं, निर्वासनं.

Other, *a.* अन्य, अपर, इतर, पर, अन्यतर (*pron. a.*) अंतरं in comp. **2** भिन्न, व्यतिरिक्त. **3** अव-,शिष्ट 'the o. s' अपरे, अन्ये, इतरे, शिष्टजनाः; 'at o. times' अन्यदा; 'the o. day' अन्येद्युः, नातिचिरं. **-wise,** *adv.* अन्यथा, इतरथा. **2** वा, ननो-चेत्, अन्यथा, अथवा.

Otiose, *a.* अनवहित, निरुत्साह, प्रमत्त, अव्यापृत.

Otter, *s.* उद्रः, जलमार्जारः.

Ought, *v.* Ex. by अर्ह् 1 P; gen. by pot. pass. part. or by pot.; *See* **Must.**

Ounce, *s.* टंकद्वयं, पणार्धं. **2** हीबेर *m.*

Oust, *v. t.* निःसृ c., निष्कस् c., अपास् 4 U, निराकृ 8 U, बहिष्कृ; *See* **Dispel. Drive out.**

Out, *adv.* बहिः (with abl.); 'gone o.' बहिर्गत; (with verbs) ex. by निर्, वि, अप, प्र, बहिः; 'to be o.' प्रकाशतां गम् 1 P, प्रकाशीभू 1 P; 'the secret is o.' रहस्यं भिन्नं. **2** निर्वापित-*a.*; 'to be o.' प्रशम् 4 P, निर्वा 2 P; 'the lamp was o.' दीपः प्रशशाम-निर्ववौ. **3** क्षीण-विगत-अवसित-*a.* **4** अंतं-शेषं-यावत्, आ-अवसानात्; 'hear me o.' शृणु मे सावशेषं वचः (M. 4); 'let me speak o.' वचः समापयानि तावत्. **5** उच्चैः, उच्च-तार-स्वरेण, मुक्तकंठं. **6** व्यक्तं, प्रकटं, स्पष्टं, स्फुटं; 'o. upon (with) the thief' दूरीकियतां-निःसार्यतां-असौ चोरः; 'o. of' बहिः with abl., or by abl.; (among) मध्यात् with gen., or by gen. or loc.; (exclusion) ex. by अ, निर्, वि, अप, गत, नष्ट, व्यक्त in comp.; 'o. of the road' व्यक्त-भ्रष्ट-मार्ग; 'o. of one's mind' हत-नष्ट-बुद्धि, बुद्धिभ्रष्ट; 'o. of place' अस्थान, अनुचित;

'o. of order' उत्सूत्र, क्रमहीन, विधिविरुद्ध, अव्यवस्थित; 'o. of tune' अप-वि-स्वर; (showing motive) ex. by instr. or abl.; (beyond) अतीत, अगोचर in comp., अति pr.; 'o. of sight' नयन-विषयातीत, दृगगोचर, अंतर्हित; 'o. of one's reach' अविषय, अप्राप्य; 'o. of one's power' अतिशक्ति; 'o. of use' गत-लुप्त-व्यवहार, अव्यवहारित; 'o. of fashion' लोकाचारविरुद्ध; 'o. of time' गतकाल, कालातीत; 'o. of hope' गताश, निराश; 'o. of man's strength' अतिमानुष; 'to pass o. of sight' नयन-विषयं अति-इ 2 P or अतिक्रम् 1 U, 4 P; stand o. of hearing' श्रवणागोचरस्थित, 'o. of employment' क्षीणवृत्ति, निर्व्यापार, नियोगहीन; 'o. of office' भ्रष्ट-च्युत-अधिकार, अधिकारभ्रष्ट-च्युत; 'o. of hand' सद्यः, सपदि; 'o.-door' द्वारबहिःस्थ, बहिःप्रदेशकृत; 'o.-house' उपगृहं, बहिर्गृहं. **-***interj.* अपेहि, अपसर, भिक्ष् (with acc.) **-er, -ermost,** *a.* बाह्य, बहिःस्थ, बहिर्भव, बहिर्वर्तिन्, बहिः in comp. **-most,** *a.* अतिबाह्य. **-ward,** *a.* बाह्य, बहिः in comp. **2** दृश्य, आविर्भूत, प्रकट, प्रकाश. **3** अवास्तव (वी *f.*), मिथ्या-मृषा in comp. **-***adv.* (O. s) बहिः, बहिर्भागे-देशे. **-wardly,** *adv.* बाह्यतः, बहिः, बहिर्भागे. **2** अवस्तुतः, मृषा, मिथ्या, कृतकं, कृत्रिमं.

Out-act, *v. t.* अत्याचर् 1 P, अतिकृ 8 U.

Out-balance, *v. t.* *See* **Outweigh.**

Out-bid, *v. t.* अधिकमूल्यदानेन अभि-भू 1 P.

Outbreak, Outburst, *s.* उद्भेदः, निर्गमः, प्रादुर्भावः, उद्गमः, आस्फोटः.

Outcast, *s.* निष्कासितः, बहिष्कृतः, जाति-बाह्यः-भ्रष्टः, जाति-वर्ण-पतितः, अपांक्तः, अपांक्तेयः, पतितः. **2** चं (चां)डालः, अपसदः, हीनजातिः-वर्णः, विहीनः, विवर्णः, नीच-अधम-वर्णः; *See* **Mean.**

Outcome, *s.* फलं, परिणामः, उदर्कः.

Outcry, *s.* उत्क्रोशः, आक्रोशः, कोलाहलः, कलकलः, तुमुलं, संहृति *f.*, उद्घोषः; 'popular o.' जनरवः-संहृतिः. **2** आतनादः-रवः.

Outdo, *v. t.* अति-शी 2 A, अतिक्रम् 1 U, 4 P; *See* **Excel.**

Outfit, *s.* सज्जा, सामग्री, उपकरणसंभारः, परिच्छेदः.

Outgo, *v. t.* अति-इ 2 P, अतिचर् 1 P, अतिगम् 1 P. **-ing,** *s.* व्ययः, अपचयः, क्षयः, विनियोगः.

Outgrow, *v. t.* अतीत्य वृध् 1 A, अति-वृध्.

Outing, *s.* भ्रमणं, पर्यटनं, विहारः.

Outlander, *s.* वैदेशिकः.

Outlandish, *a.* विजातीय, विदेशीय, विदेशज, पर-अन्य-देशीय. **2** असंगत, ग्राम्य, अशिष्ट, असभ्य.

Outlaw, *s.* निषिद्धान्युदकः, न्यायरक्षणबाह्यः. **-***v. t.* न्यायाद् बहिष्कृ 8 U, अन्युदकदानं निषिध् 1 P.

Outlay, *s.* (द्रव्यादेः) व्ययः, अपचयः, विनियोगः; धनोत्सर्गः, द्रव्यव्ययः.

Outlet, *s.* द्वारं, मुखं, निर्गमः, परि(री)वाहः, जलोच्छ्वासः, निर्गमद्वारं; स्वजनस्य हि दुःखमग्रतो विवृतद्वारमिवोपजायते (K. iv. 26) 'finds an o.' &c.

Outline, *s.* बाह्यलेखा, आकारमात्रं, वस्तुमात्रं. **2** पांडुलेख्यं, चित्रारंभः. **3** स्थूलवर्णनं, असूक्ष्मविचारः.

Outlive, *v. t.* अति-जीव् 1 P.

Outlook, *s.* अवेक्षणं, अवेक्षा.

Outlying, *a.* दूरस्थ. **2** असंसक्त.

Outmanœuvre, *v. t.* अभि-भू 1 P, अति-रिच् 7 U.

Outmarch, *v. i.* अग्रे या 2 P, अति-या.

Outnumber, *v. t.* संख्यया अति-शी 2 A, अधिकसंख्य-*a.* भू 1 P, अधिकीभू.

Outpour, *v. t.* वृष् 1 P, निषिच् 6 P, उत्सृज् 6 P. **-***s.*, **-ing,** *s.*, वर्षः-र्षणं, उत्सर्गः.

Output, *s.* फलं, उत्पन्नं, लाभः.

Outrage, *s.* साहसं, आधर्षः-र्षणं, बलात्कारः, अन्यायः, अत्याचारः, उपमर्दः, उपद्रवः, अभि-,द्रोहः, उपघातः, प्रमाथः, मर्यादातिक्रमः. **2** न्यक्कारः, धिक्कारः, अवलेपः, उत्सेकः. **-***v. t.* कलकयति (D.); (a woman) सतीत्वाद् भ्रंश् c. or च्यु c., दुष् c. (दूषयति), आधृष् c.; उपसृद् c., प्रमंथ् 9 P or c., उपद्रु 1 P, अभिद्रुह् 4 P, व्यक्तं 8 U, धिक्कृ; *See* **Insult** also. **-ous,** *a.* दारुण, घोर, उग्र, अतिदुष्ट, उच्चंड, प्रमाथिन्, अतिसाहसिक (की *f.*), राक्षस (सी *f.*), निर्लज्ज, वीतत्रप, अतिदुराचार. **-ously,** *adv.* घोरं, दारुणं, अत्याचारपूर्वं, अतिसाहसेन. **-ousness,** *s.* दारुणता, &c.

Outreach, *v. t.* अतिगम् 1 P, अति-इ 2 P.

Outrider, *s.* अश्वारूढः परिचरः.

Outright, *adv.* सद्यः, सपदि, तत्क्षणं-णे, अविलंबितं. **2** सर्वथा, साद्यंतं, सम्यक्, सअति pr. **3** स्पष्टं, व्यक्तं, अवक्रं.

Outroot, *v. t.* *See* **Eradicate.**

Outrun, *v. t.* अतिधावृ 1 P, धावने अति-शी 2 A.

Outset, Outstart, *s.* प्रारंभः, उप-प्र-क्रमः, आदिः, उपोद्घातः; 'at the very o.' प्रथममेव, आदावेव, उपोद्घातरूपेण.

Outshine, *v. t.* अधिकं प्रकाशृ 1 A or द्युत् 1 A, अति-शुभ् 1 A or रुच् 1 A.

Outside, *s.* बहिर्भागः, बहिःप्रदेशः, बाह्यभागः; oft. by बहिः, 'charming on the o. only' बहिरेव मनोरम. **2** परमावधिः. **-***adv.* बहिः (with abl.), बहिर्भागे. **-***a.* बाह्य, बहिस्थ, बहिः in comp. **-er,** *s.* बहिर्देशवासिन् *m.*, अन्यदेशीयः, पारदेशिकः; *See* **Foreigner.**

Outskirt, *s.* उपांतः, पर्यंतः, सीमा, परिसरः, प्रांतः, उत्संगः; 'o. of a village' ग्रामांतः, उपकंठ; 'o. of a forest' वनांतः.

Outspoken, *a.* स्पष्ट-स्फुट-वादिन्, स्फुटवक्तृ; *See* **Candid, Frank.**

Outspread, *v. t.* विस्तृ c., प्र-वि-सृ c., वितन् 8 U.

Outstandfng, *a.* अशोधित, अनिष्पन्न, अनिस्तीर्ण.

Outstretch, *v. t.* प्र-सृ c., उच्छ्रि 1 U or c.; oft. by उत् in comp.; 'with the neck o. ed' उत्कंधर; 'with hands o. ed as far as the wrist' आपूर्वभागोत्थितैः करतलैः (S. 4).

Outstrip, *v. t.* अति-इ 2 P, अतिक्रम् 1 U, 4 P. अतिवृत् 1 A, अतिक्षद् 1 P, लंघ् 1 A, 10; oft. by अति in comp. 'o. s the senses' इंद्रियगोचरो न वर्तते, अतींद्रियः.

Outvie, *v. t. See* **Excel.**

Outweigh, *v. t.* भारेण-भारतः-अतिरिच् pass. (with abl.), अधिकभारीभू 1 P; (Excel, q. v.).

Outwit, *v. t.* प्र-हृ c., वंच् 10, वि-प्र-लभ् 1 A; *See* **Cheat.**

Oval, Ovate, *a.* अंडाकार, अंडाकृति. **-***s.* अंडाकारः, अंडाकृति *f.*, कक्षा-क्षः.

Ovarious, *a.* अंडयुक्त, अंडरूप. **-Ovary,** *s.* अंडाशयः.

Ovation, *s.* लोक-संभावना-सत्कारः.

Oven, *s.* चुल्लि-ल्ली *f.*, पांडु *m. f.*, आपाकः, उखा.

Over, *prep.* उपरि (with gen.) or in comp., अधि-ऊर्ध्वं in comp.; अधिक in comp.; 'o. 20' विंशत्यधिक; gen. ex. by अति, अधि, अभि, उत्, सं, with verbs; 'oroes o. a river' नदीपारं गम् 1 P. **2** (Superiority), प्र, आधि, वि in comp.; 'wander o.' परिभ्रम् 1, 4 P, पर्यट् 1 P; 'o. against' अभि-सं-मुखं, अभि-प्रति pr. *-adv.* परपारे, अन्यनीरं, पारं-रे. **2** प्रति, सं, नि, with verbs; 'hand o. to another' अन्यस्मिन् निक्षिप् 6 P or संक्रम् c. **3** अधिकं, भूयः, अतिरिक्तं. **4** (Beyond) अति pr. **5** अव-,शिष्ट, उद्वृत्त, अंतरित (*a.*); अधिक in comp. **6** सार्धंतं, शेषं यावत्, ex. by पार; 'to read o.' अधि-इ 2 A, पारं गम्. **7** अत्यंतं, अति-सु-pr., अधिकं, अतिशय-एकांत in comp.; as a prefix of verbs, ex. by अति, अत्यंतं. **8** अतीत, गत, अतिक्रांत, वृत्त, भूत; 'o. again' पुनरपि; 'o. and o. again' पुनः पुनः, सुदुर्मुहुः, वारंवारं; 'o. and above' अपरं च, अवशिष्ट-*a.*; 'to be o.' ex. by अवसित-अतीत-समाप्त-*a.*; *See* **Finish;** 'my work is o.' समाप्तकार्योस्मि; 'in a moment all will be o. with him' क्षणेन स समाप्तजीवितः-परासुः-भवेत्.

Overact, *v. t.* आतिशयेन कृ 8 U, अत्याचर् 1 P.

Overawe, *v. t.* आकुलीकृ 8 U, भयेन उपहन् 2 P or अभिभू 1 P. **-ed,** *a.* संभ्रमाकुल, भयोपहत.

Overbalance, *v. t. See* **Outweigh.** **-***s.* अति अधिक-भारः.

Overbear, *v. t.* वशीकृ 8 U, दम् c. (दाम्यति); नि-पत् c., धृष् c. **-ing,** *a.* धृष्ट, उद्धत, दुष्ट, अवलिप्त, गर्वित, उत्सिक्त; *See* **Haughty.** **-ingly,** *adv.* सावलेपं, सदर्पं, उद्धतं.

Overboard, *adv.* नौपृष्ठात्, नौकाया बहिः, मध्येसमुद्रं, अर्णवमध्ये.

Overburden, *v. t.* अतिभारं न्यस् 4 U, अतिभारेण पीड् 10 or अर्द् 1 P or c. **-ed,** *a.* अतिभाराक्रांत.

Overcast, *v. t.* (मेघैः) आ-वृ 5 U, प्र-आच्छद् 10; कलुषीकृ 8 U, तिमिरीकृ, साभ्र-*a.* कृ. **-***a.* मेघावृत, मेघाच्छन्न, तमोवृत, साभ्र, सतिमिर, घनावरुद्ध.

Over-cautious, *a.* अत्यवहित.

Overcharge, *v. t.* अतिमूल्यं अर्थ् 10 A. **2** **Overload,** q. v. **-***s.* अतिमूल्यप्रार्थनं.

Overcloud, *v. t. See* **Overcast.**

Overcome, *v. t.* अतिक्रम् 1 U, 4 P, तॄ 1 P, पारं गम् 1 P, आ-अधि-रुह् 1 P, अति-इ 2 P; अति-क्षी 2 A, अतिरिच् pass. **2** जि 1 P, पराजि (A), परा-अभि-भू 1 P, वशीकृ 8 U, दम् c. (दाम्यति). **3** मुह् c., पर्यासृज् 6 P; (with fatigue &c.) आकुलीकृ, आक्रम्, खिद् c., अव-सद् c., better by (*a.*); 'o. by the force of truth' सत्यबलेनाभिभूत, भूतार्थवचनेन कुंठितमति or कि वक्तव्यतामूढ; 'I am o. by sleep caused by fatigue' अपाङ्गिये परिश्रमजनितया निद्रया (U. 1). **-***a.* परा-,जित, दांत, वशीकृत &c. **2** अभिभूत, व्याकुल, पर्याकुल, आकुल, आर्त, आतुर, ग्रस्त, आक्रांत, आविष्ट, परिगत, gen. in comp.

Overdo, *v. t.* अतिशयेन कृ 8 U. **2** अति-पच् 1 P. **-Overdone,** *a.* अतिपक्व. **2** अतिश्रांत, परिक्लांत.

Overdress, *v. t.* उज्ज्वलवेशं धृ c., उदारनेपथ्यं भृ 3 P.

Overdue, *a.* अतिक्रांतकाल.

Overeat, *v. t.* अति-खाद् 1 P or अद् 2 P.

Over-estimate, *v. t.* अति-गण् 10 or मन् 4 P. **-***s.* अतिगणना.

Overfatigue, *v. t.* अति-खिद् c. or श्रम् c. **-***s.* अतिखेदः, अतिश्रमः.

Overflood, Overflow, *v. t.* जलेन आ-सं-प्लु c., परिवह् c., उपरि सु c., उत्सिच् 6 P or c. **-***v. i.* परिवह् 1 P; उत्सिच् pass., प्रबृध् 1 A, स्फाय् 1 A; gen. ex. by अति-, पूर्ण, उत्सिक्त, आ-सं-प्लुत, स्फीत-वृद्ध-जल, प्रचुर, उपचित, आढ्य, घन, अतिरिक्त, उद्रिक्त, वृद्ध, स्फीत; 'with an eye o. ing with joy' आनंदपरिवाहिणा चक्षुषा (S. 4); 'a heart o. ing with kindness' दयाघनं हृदयं; 'my curiosity first o.ed' प्रथमं कुतूहलं सपरिवाहमासीत् (S. 2); 'her eyes o. ed with tears' अश्रुपरिप्लुतेक्षणा सा, अश्रुजलेनाप्लुते नेत्रे. **-***s.* पूरोत्पीडः, आप्लावः, उत्सेकः, जलवृद्धि *f.*, तोयाप्लावः, जलोत्सेकः. **2** उद्रेकः, अतिरेकः, वृद्धि *f.*, स्फीति *f.*, उपचयः, आधिक्यं, प्राचुर्यं. **-ing,** *a.* उत्सिक्त, अति-परि-पूर्ण, अति-,बहुल, प्रचुर, आ-सं-प्लुत, उपचित, उद्रिक्त, अतिरिक्त; 'o. with water' जलव्याप्त, आप्लुतोदक; 'o. the boundary' अतिवेल. **-***s.*, *See* (*s.*); 'to fill to o.' आ-परि-पॄ c.

Overgrow, *v.* अतिरुह् 1 P, अतिवृध् 1 A, अत्यंतं वृध्.

Overhang, *v. t.* उपरि लंब् 1 A, अव-प्र-लंब्, बहिः लंब् or स्था 1 P.

Overhasty, *a.* अतिसाहसिन्, साहसपरायण.

Overhaul, *v. t.* पुनः पुनः परीक्ष् 1 A or निरूप् 10.

Overhead, *adv.* ऊर्ध्वं, उपरि, उपरिस्थाने; मस्तकोपरि, अधिशीर्षं; 'the sun being o.' नभोमध्यारूढे सवितरि, मध्याह्नकाले

Overhear, *v. t.* अलक्षितं-निभृतं श्रु 5 P, प्रच्छन्नं आकर्ण् 10.

Overjoy, *v. t.* प्रहृष् c., अत्यंतं आनंद् c. **-***s.* प्रहर्षः, अत्यंतप्रमोदः. **-ed,** *a.* प्रहृष्ट, परमहृष्टित, हर्षाकुल, आनंदपुलकित, उल्लसित. हृष्टचित्त.

Overlap, *v. t.* अतिव्याप् 5 P.

Overlarge, *a.* अतिविपुल, अतिमहत्.

Overland, *a.* स्थल in comp.; 'o. route' स्थलवर्त्म, (प्रतस्थे स्थलवर्त्मना R. IV. 60.)

Overlay, *v. t.* आ-,छद् 10, आ-वृ 5 U, पिधा 3 U, पिं-नह् 4 P. **2** अतिभारेण पीड् 10.

Overleap, *v. t.* उत्-लंघ् 1 A, 10, उत्लु 1 A.

Over-lenient, *a.* एकांत-अति-मृदु.

Overlie, *v. t.* अतिभारेण पीड् 10, नि-पत् 1 P.

Overload, *v. t.* अतिपूर् 10, अतिभारं न्यस् 4 U or आरुह् c. (रोपयति); अतिभारेण आक्रम् 1 U, 4 P or पीड् 10. **-ed,** *a.* अतिपूरित-पूर्ण, अतिभाराक्रांत. **-ing,** *s.* अतिभारारोपणं, अतिभारन्यासः.

Overlook, *v. t.* उपेक्ष् 1 A, न गण् 10 or दृश् 1 P, न आदृ 6 A, क्षम् 1 A, 4 P, अवसृज् 6 P, सुच् 6 P. **2** अवेक्ष्, अधि-ष्ठा 1 P, अध्यक्षः भू 1 P. **3** आ-अव-लोक् 1 A, 10; *See* **Command.**

Overmuch, *a.* अतिमात्र, अत्यंत, अत्यधिक, एकांत, अतिरिक्त, अति pr. **-***s.* आधिक्यं, अतिबाहुल्यं, अतिरेकः. **-***adv.* अत्यंतं, अतिमात्रं, अति-सु pr.

Overnight, *adv.* अतीतरात्रौ, गतनिशायां.

Overpass, *v. t.* अतिक्रम् 1 P, अतिगम् 1 P.

Overpay, *v. t.* अधिकमूल्यं दा 3 U.

Overpeopled, *a.* अतिजनाकीर्ण.

Overplus, *s. See* **Surplus.**

Overpower, *v. t.* परा-अभि-भू 1 P, पराजि 1 A, आक्रम् 1 U, 4 P; *See* **Overcome.**

Overprize, Overrate, *v. t.* अधिकं मन् 4 A or c., अतिमूल्यं स्था c. (स्थापयति).

Overreach, *v. t.* प्र-हृ c., वंच् 10, विप्र-लभ् 1 A. **-ing,** *s.* प्रतारण-णा, वंचनं; *See* **Cheat.**

Override, *v. t.* अति-धाव् 1 P. **2** **Overrule,** q. v.

Overrule, *v. t.* अधः क्षिप् 6 P, निराकृ 8 U, अधरीकृ, प्रत्यादिश् 6 P; *See* **Reject.** **2** प्र-भू 1 P, ईश् 2 A (with gen.), अधिष्ठा 1 P, शास् 2 P, नियम् 1 P.

Overrun, *v. t.* उप-सृ 1 A, आक्रम् 1 U, 4 P, उप-अभि-सृ 1 P, व्याप् 5 P, आक्रंद् 1 P; *See* **Harass, Oppress.**

Oversee, *v. t.* अवेक्ष् 1 A, अधि-ष्ठा 1 P. **-er,** *s.* अवेक्षकः, अधिष्ठातृ *m.*, अध्यक्षः, अधिकृतः, अधिकारिन् *m.*

Overset, *v. t.* वि-,पर्यस् 4 U, परिवृत् c.; अधरीकृ 8 U, निपत् c., अधः क्षिप् 6 P. **-***v. i.* परिवृत् 1 A, नि-पत् 1 P.

Overshadow, *v. t.* आ-,छद् 10, छायया आवृ 5 U.

Overshoot, *v. t.* लक्ष्यं अतिक्रम् 1 U, 4 P, लक्ष्याद् भ्रंशू 1 A, 4 P or च्यु 1 A.

Oversight, *s.* अनवेक्षा, प्रमादः, भ्रमः; भ्रांति *f.*, स्खलितं, दृष्टिदोषः.

Oversleep, *v. i.* अति-दीर्घं-स्वप् 2 P.

Overspread, *v. t.* आच्छद् 10, आ-वृ 5 U, आस्तृ 5 U, आस्तृ 9 U, पूर् 10, आक्रम् 1 U, 4 P, आ-सं-कृ 6 P, वि-अव-तन् 8 U, व्याप् 5 P **-***a.* आच्छन्न, आच्छादित, आवृत, आस्तीर्ण, आक्रांत, आकीर्ण, व्याप्त, पूरित, पूर्ण.

Overstate, *v. t.* अतिशयेन वच् 2 P; *See* **Exaggerate.**

Overstep, *v. t.* अतिक्रम् 1 U, 4 P, लंघ् 1 A, 10.

Overstock, *v. t.* अति-पूर् 10 or संग्रह् 9 P or उपकल्प् c., प्र-सं-चि 5 U. **-s.** अति-संचयः-संग्रहः-संभारः.

Overstrain, *v. i.* अत्यंत यत् 1 A or उद्यम् 1 A

Overstrung, *a.* अत्यंतं, आतत.

Overt, *a.* प्रकाश, स्फुट, व्यक्त, स्पष्ट, अगूढ, प्रकट, प्रत्यक्ष. **-ly,** *adv.* प्रकाशं, स्पष्टं, प्रत्यक्षं, प्रकटं. **-ness,** *s.* स्फुटता, व्यक्तता.

Overtake, *v. t.* आ-सद् c., (पूर्वप्रस्थितं वैनतेयमप्यासादयेयं V. 1), लंघ् 1 A, 10; आत्मोद्धृतैरपि रजोभिरलंघनीयाः (S. 1); 'not to be o.-n' &c.; सं-प्राप् 5 P. आक्रम् 1 U, 4 P, ग्रह् 9 U. **2** अभिभू 1 P, धृ 1 P, 10, ग्रस् 1 A; सहसा-अकस्मात्-आपत् 1 P or आक्रम्; *See* **Attack, Overcome;** 'o. business' कार्यं समाप् c.

Overtask, Overtax, *v. t.* अतिभारं-अतिकरं न्यस् 4 U or निक्षिप् 6 P.

Overthrow, *v. t.* नंश् c, वि-प्र-,° क्षि 1, 5 P, ध्वंस् c., प्र-वि-उत्°, उच्छिद् 7 P, अव-उत्-सद् c. **2** परिवृत् c., परि-विपरि-अस् 4 U, पराक्षिप् 6 P or c., अधोमुखीकृ 8 U, निपत् c. **3** जि 1 P, पराजि (A.), अभि-परा-भू 1 P, दम् c. (दमयति), वशीकृ 8 U, परास् 4 U, भंज् 7 P, पराहन् 2 P. **-s.** नाशः, ध्वंसः, प्र-वि°-,उच्छेदः, उत्सादः, क्षयः. **2** धातः, भंगः, भेदः, परा-आभि-भवः, पराजयः, व्यसनं. **3** परिवर्तनं, पर्यासः, निपातनं.

Overtop, *v. t.* भूम्नि-शिखरे-स्था 1 P, आतंशी 2 A, अभि-भू 1 P; *See* **Excel.**

Overture, *s.* प्रस्तावः, उपन्यासः, उपक्षेपः, निवेदनं, प्रार्थना, वचनं; 'secret o.' उपजापः. **2** प्रस्तावना, उपोद्घातः.

Overturn, *v. t.* परि-विपरि-अस् 4 U, परिवृत् c., निपत् c., अधोमुखीकृ 8 U, अधरोत्तरीकृ. **2 Overthrow,** q. v.

Overvalue, *v. t.* अधिकं मन् 4 A or c., बहु मन्, अधिकमूल्यं कृ 8 U or स्था c. (स्थापयति).

Overweening, *a.* अत्यभिमानिन्, अतिदृप्त, अत्यवलिप्त, अतिश्लाघिन्.

Overwhelm, *v. t.* आभि-भू 1 P, आकुलीकृ 8 U, ग्रस् 1 A, आक्रम् 1 U, 4 P; अव-सद् c. अव-सं-सद् 9 P or c., अव-निधा c. निक्षिप् 7 P. **2** आ-वृ 5 U, आस्तृ-स्तृ 5, 9 U, आच्छद् 10, आकृ 6 P. **3** नि-,मज्ज् c. (मज्जयति), गाह् c., अव-वि°-, प्लु c., आ-सं-परि-°. **-ed,** *a.* अभिभूत, ग्रस्त, आक्रांत, मग्न, आकीर्ण, उपप्लुत, उपद्रुत, आकुल; *See* **Overcome:** 'o. with grief' शोकसमाकुल; 'o. with a flood of tears' बाष्पपूरपरिप्लुत.

Overwork, *v. t.* अधिकं कर्म कृ c., अत्यंतं आयस् c. or खिद् c.; (oneself) अत्यंतं परिश्रम् 4 P. **-s** अत्यायासः, अतिक्लेशः-श्रमः.

Overwrought, *a.* अतिपरिष्कृत.

Overzeal, *s.* अत्यौत्सुक्यं, अत्युत्कंठा. **-ous,** *a.* अत्युत्सुक, अत्यासक्त, अतिव्यग्र.

Oviform, *a.* अंडाकृति, कौशाकार.

Oviparous, *a.* अंडज, द्विज, द्विजन्मन्, अंडोत्पन्न.

Ovum, *s. See* **Egg.**

णीया (R. xiv. 46). **3** दृढ-स्थिर-मति, सकृद्ग्राहिन्, दृढसंकल्प. **-ily,** *adv.* सुनिश्चितं, सुष्ठूक्तं, भिन्नार्थं, सुस्पष्टं; दार्ढ्येन, दृढनिश्चयपूर्वं. **-iness,** *s.* स्पष्टता, दृढनिश्चयः, दृढता, अविसंवादिता.

Perennial, *a.* वर्षानधि, वर्षस्थायिन् **2** नित्य, अक्षय्य, निरंतर, अविरत.

Perfect, *a.* सिद्ध, संपन्न, निष्पन्न, समाप्त, परिणत. **2** अशेष, समग्र, सकल, सं-परिपूर्ण, समस्त, अविकल, अखंड, अक्षत, अन्यून, निर्दोष. **3** परम, उत्कृष्ट, विशिष्ट, उत्तम; निपुण, कुशल, अभिज्ञ, पारंगत, विशारद, प्रवीण, परिपक्व, संपन्न. **4** (In grammar) लिट्. **-v.** *t.* साध् c., सिध् c. (साधयति), सं-निः-पद् c., परि-सं-पूर् 10, समाप् c., निर्वृत् c.; ex. by कृ 8 U with (*a.*). **-er,** *s.* संपादकः; साधकः. **-ion, -ness,** *s.* सिद्धि *f.*, संपन्नता, समग्रता, अखंडता, संपरि-पूर्णता, निष्पत्ति-समाप्ति-*f.* **2** परिपाकः; परिणति *f.*, पक्वावस्था, उत्कृष्टता, उत्कर्षः, विशिष्टता, प्रकर्षः; परा कोटिः-काष्ठा. **3** नैपुण्यं, संपन्नता, कौशलं, विज्ञानं, प्रावीण्यं. **4** गुणः, परम-उत्तम-गुणः; विशेषः, प्र-उत्-कर्षः. **-ive,** *a.* साधक, संपादक, समापक, सिद्धिकर (री *f.*). **-ly,** *adv.* सर्वथा, सर्वशः; साकल्येन; समग्रं, संपूर्णं, अशेषतः, निःशेषं.

Perfidy, *s.* विश्वासघातः-भंगः-भेदः, असत्य-संधता, प्रतिज्ञा-समय-भंगः; शत्रुसेवा, कापट्यं, वंचनं-ना. **-ious,** *a.* असत्यसंध, विश्वास or विश्रंभ-घातिन् or भेदिन्, भङ्गप्रतिज्ञ वंचक, शठ, मिथ्याचार, शत्रुसेविन्. **2** (Of acts) अनार्य. **-iously,** *adv.* विश्वास-घातेन, शठवत्, कैतवेन.

Perforate, *v. t.* आ-, व्यध् 4 P, छिद्रयति (D.), निर्भिद् 7 P, उत्-समुत्-कृ 6 P, (मणौ वज्रसमुत्कीर्णे R. 1, 4); ' un-p. ed jewel ' अनाविद्धं रत्नं (S. 2.) **-ed,** *a.* विद्ध, सच्छिद्र, उत्कीर्ण, सरंध्र, सुषिर. **-ion,** *s.* वेधः-धनं, निर्भेदः. **2** छिद्रं, रंध्रं, विवरं, सुषिरं. **-or,** *s.* वेधनिका, आविधः, आस्फोटनी.

Perforce, *adv.* बलात्, बलेन, प्रसभं, प्रसह्य, बलवत्, बलात्कारेण.

Perform, *v. t.* कृ 8 U, निर्वृत् c., आचर् 1 P, सं-निः-पद् c., साध् 5 P or c., वि-धा 3 U, अनु-ष्ठा 1 P, निर्वह् c.; (promise) पूर् 10, तॄ 1 P शुध् c., अपवृज् 10, (a sacrifice) आतन् 8 U, आह् 1 P. **2** (On the stage) नट् 10, अभि-नी 1 P, नृज् 7 A, 10; *See* **Act**; ' has not been (seen) p ed on the stage ' न प्रयोगतो दृष्टं (Rat. 1). **-ance,** *s.* संपादनं, साधनं, करणं, निधानं. निर्वर्तनं. अनुष्ठानं, आचरणं. **2** कार्यं, कर्मन् *n.*, क्रिया, कृति *f.*, व्यापारः, चेष्टा, चेष्टितं, प्रवृत्ति *f.*, चरितं. **3** प्रयोगः, अभिनयः, नाटनं. **-er,** *s.* कर्तृ *m.*, संपादकः, निर्वर्तकः, अनुष्ठातृ *m.* निर्वाहकः. **2** (In dramas) अभिनेतृ *m.*, नटः; प्रयोजकः. **3** वादकः.

Perfume, *v. t.* अधि-, वास् 10, धूप् 1 P, 10, धूपेन वास्, सुरभीकृ 8 U, परिमलयति-आमोदयति- (D.), भू c. **-s.** परिमलः, आमोदः; सुगंधः, सु-,वासः; सौरभं-भ्यं. **2** (Thing scented) गंधः, गंधद्रव्यं, गांधिकं. **3** (For the person) गात्रानुलेपनी; वर्ति *f.*, अनु-वि-लेपनं, वर्णकं; ' p. artificially made ' कृत्रिम वृक्ष-धूपः. **-ed,** *a.* सुवासित, सवास, सुरभीकृत, सामोद, धूपित, भावित. **-er,** *s.* गांधिकः, गंधापजीविन् *m.*, गंधावक्रयिन् *m.* गंधवणिज् *m.*, गंधाजीवः. **-ery,** *s.* गंधद्रव्यं, गंधव्यापारः-विक्रयः. **-ing,** *s.* वासनं, भावनं. **2** (With unguents) चर्चा, चार्चिक्यं, अनु-वि-लेपनं, स्थासकः, अंगरागः.

Perfunctory, *a.* अनवहित, निरुत्साह, मनस्क, अनुत्कंठ; *See* **Negligent.** **-ily,** *adv.* अनवधानेन, निरुत्साहं. **-iness,** *s.* अवनधानं, अनास्था, निरुत्साहता.

Perhaps, *adv.* कदाचित्, दैवात्, कदापि, नु वा, किंस्वित्, स्यात्, or by pot.

Periapt, *s.* रक्षाकरंडः

Pericardium, *s.* हृदयकोशः, हृदाशयः.

Pericarp, *s.* बीजकोशः-गुप्ति *f.*

Pericranium, *s.* कपालावरणं.

Perigee, *s.* नीचतमं नेदिष्ठं-स्थानं.

Peril, *s.* भयं, शंका, संदेहः, संशयः. **-v.** *t.* संशये पत् c. **-ous,** *a.* सांदेग्ध, सशंक, भयहेतुक; *See* **Danger, Hazard.**

Period, *s.* समयः, कालः, वेला, कालावधिः, अंतरं, अवधिः, नियतकालः. **2** कालचक्रं-पर्यायः-आवर्तः, वर्षचक्रं, युगं. **3** अंतः, अवसानं, विरामः. **4** पूर्णवाक्यं, वाक्योच्चयः, पूर्णविरामः; ' p. of life ' वयः, वयोवस्था, ' last p. ' चरमवयः, अंत्यावस्था. **-ic, -ical,** *a.* नित्य, अनुकालिक-नियतकालिक-सामयिक-(की *f.*). **-s.** सामयिकपुस्तकं; ' a monthly p. ' मासिकपुस्तकं. **-ically,** *adv.* काले काले, समयतः, कालानुरूपं, नियतकालं.

Periosteum, *s.* अस्थित्वच् *f.*

Peripatetic, *a.* इतस्ततः-भ्रमन्-भ्रमणशील.

Periphery, *s.* परिवेशः-षः, परिधिः, परिणाहः. **2** नेमि-मी *f.*, प्रधिः.

Periphrase, Periphrasis, *s.* वाग्विपर्ययः, वाग्विस्तरः, वाग्बाहुल्यं-प्रपंचः. **-v.** *t.* प्रपंचयति (D.), वाग्विस्तरेण वर्ण् 10 or व्या-ख्या 2 P. **-Periphrastic,** *a.* बहुवाक्य, बहुपद; ' p. future ' लुद्.

Perish, *v. i.* नश् 4 P, प्र-वि-°, क्षि-pass.; प्रमी 4 A, ध्वंस् 1 A, क्षय-नाश-लयं-गम्

1 P or इ-या 2 P, प्र-वि-ली 4 A; मृ 6 A. व्यापद् 4 A; *See* **Die.** **-able,** *a.* वि-, नश्वर (री *f.*), विनाशधर्मन्, भंगुर, क्षयिन्, वि-,ध्वंसिन्, क्षयिष्णु, क्षय-नाश-शील, लयाधीन; ' p. in a moment ' क्षणिक, क्षणभंगुर.

Peristyle, *s.* स्तंभपंक्ति-श्रेणी *f.*

Peritoneum, *s.* अंत्रवेष्टनं.

Perjure, *v. t.* साक्ष्ये मिथ्या अवृतं वद् 1 P, मिथ्या शप् 1, 4 U, कूटसाक्ष्यं कृ 8 U. **-ed,** **-er,** *a.*, *s.* कूटशपथकारिन्, मिथ्यासाक्षक, कूटसाक्षिन्. **-y,** *s.* कूट or मिथ्या-साक्ष्यं or

Perk, -y, *a. See* **Saucy.** [शपनं.

Permanent, *a.* नित्य, स्थिर, नित्य-चिर-स्थायिन्, ध्रुव, अक्षय, स्थायिन्, *See* **Lasting.** **-ly,** *adv.* नित्यं, स्थिरं, ध्रुवं, शाश्वतं, सर्वकालं. **-Permanence, -cy,** *s.* स्थिरता, स्थायित्वं, ध्रुवता, नित्यता, अक्षयता, अनपायः, सनातनत्वं. **2** प्रतिष्ठा, स्थिति *f.*, (कुलस्य स्थितये K. 1. 18), (दशरथस्य कुलं प्रतिष्ठां गतं U. 5).

Permeate, *v. t.* व्याप् 5 P, व्यश् 5 A; *See* **Pervade.** **2** प्र-विश् 6 P, भिद् 7 P, गाह् 1 A. **-ion,** *s.* व्याप्ति *f.*, प्रवेशः, भेदनं. **-Permeable,** *a.* व्याप्य, भेद्य, प्रवेश्य.

Permit, *v. t.* अनु-ज्ञा 9 U, अनुमन् 4 A, अनुयुज् 1 A, आज्ञां दा 3 U. *See* **Allow.** **-s.** अनुज्ञा-अनुमति-पत्रं, अनुज्ञा. **-Permissible,** *a.* अनुज्ञेय, अनुमंतव्य, अनुज्ञार्ह. **2** धर्म्य, न्याय्य, ग्राह्य, युक्त; *See* **Lawful.** **-Permission.** *s.* अनुज्ञा, अनुमति *f.* नं. अनुमोदनं; आदेशः, आज्ञा. **-Permissive,** *a.* अनुज्ञाप्रद, अनुमोदक; अनवश्यक.

Permute, *v. t.* वि-नि-मे 2 A, परि-वृत् 1 A. **-ation,** *s.* वि-,निमयः, परिवर्तः, परिवृत्ति *f.*, व्यतिहारः. **2** अंकपाशः.

Pernicious, *a.* घातक, अपकारक, वि-, नाशक, हिंस्र, हिंसक, अपकारिन्, दुष्ट, गर्ह्य; *See* **Injurious.** **-ly,** *adv.* सापकारं, सापायं, सनाशं.

Peroration, *s.* उपसंहारः.

Perpendicu'ar, *a.* लंब, लंबरूप; सरल, ऋजु, अकुटिल. **-s.** लंबः. **-ly,** *adv.* लंबरूपेण, सरलं, ऋजु.

Perpetrate, *v. t.* कृ 8 U, वि-धा 3 U, आचर् 1 P; *See* **Commit.**

Perpetual, *a* नित्य, सतत, शाश्वत (ती *f.*), आवीच्छेदन्न, अविरत, संतत, निरंतर, सनातन (नी *f.*), अनंत, नित्य-चिर-स्थायिन. **-ly,** *adv.* नित्यं, सदा, नित्यशः, शाश्वत, शश्वत्, सततं, अविरतं **-Perpetuity,** *s.* अविच्छेदः, नित्य-चिर-स्थायिता, आनंत्यं, नित्यता, अविरामः, नैरंतर्यं, अक्षयस्थिति *f.*, सनातनत्वं; ' to p. ' शाश्वतीः समाः. **-Perpetuate,** *v. t.* स्थिरीकृ 8 U, कृ with (*a.*).

Perplex, *v. t.* मुह् c., आकुलीकृ 8 U, सं-वि भ्रम् c. (भ्रमयति), मोहं-संभ्रमं-उत्पद् c. **2** संकुलीकृ, संकीर्णीकृ. क्लिश् 9 P; *See* **Embarrass. Confuse.** **-ed.** *a.* आ-व्याकुल, संभ्रांत, वि-,मूढ, कातर, व्यग्र, उद्विग्न, अधीर; व्याकुलचित्त, संभ्रांतमनस्, व्यस्त-मूढ-विक्षिप्त-चित्त. **-ing,** *a.* मोहक, संदिग्ध, भ्रम-मोह-कारिन्, मोहकर (री *f.*), मोहन, भ्रांतिजनन (नी *f.*); विषम. **-ity,** *s.* व्या-, मोहः, आ-व्या-कुलत्वं-ता. संभ्रमः, व्यग्रता, चित्तविक्षेपः, व्यस्तचित्तत्वं, चित्तवैकृव्यं, संशयः, संदेहः.

Perquisite, *s.* अधिकलाभः, पुरस्कारः; *See* **Gift.**

Persecute, *v. t.* प्र-सं-याच् 1 A, उप-द्रु 1 A, पीड् 10, उप-द्रु 1 P, क्लिश् 9 P, पीडार्थं अनुसृ 1 P, अभि-,द्रुह् 4 P. **-ion,** *s.* बाधा, उपद्रवः, उपप्लवः, पीडनं, अभिद्रोहः. **-or,** *s.* बाधकः, उपद्रवकारिन् *m.*

Persevere, *v. i.* मनः-चित्त-अभिनिविश् c., सदा प्रवृत् 1 A, अभियुज् pass., अभिनिवेशेन सं-पद् c., सततं प्रयत् 1 A, अनवरतं चेष्ट् 1 A, निर्बंधं कृ, साग्रहं प्रवृत्; ' p. in your opposition ' स्थिरप्रतिबंधो भव (S. 2); ' he who p. s in good actions ' सदाचारप्रवृत्तः, सदा सन्मार्गचारी. **-ance,** *s.* अभिनिवेशः, अध्यवसायः, उद्यमसातत्यं, दीर्घप्रयत्नः-उद्यमः-उद्योगः-उत्साहः, अतिनिर्बंधः, सदाभियोगः. **2** अनवरतचेष्टा, प्रवृत्तिः *f.*, प्रसक्तिः *f.* चेष्टा, प्रयासः, प्रयोगः, उद्यमः, व्यवसायः. **-ing,** *a.* अभियोगवत्-उद्यमिन, अभिनिविष्ट, अध्यवसायिन, दीर्घोद्योगिन, सदाप्रवृत्त, उत्साहवत्, आग्रह-निर्बंधशील, प्रसक्त, प्रसित. **-ingly,** *adv.* अभिनिवेशेन, दीर्घोद्योगेन, प्रसक्तं, सोत्साहं, सनिर्बंधं.

Persist, *v. i.* साग्रहं प्रवृत् 1 A, अतिनिर्बंधेन आचर् 1 P, पर्यव-स्था 1 A; *See* below; 'do not p. in your wickedness' दुराचरितेषु मा ते निर्बंधो भूत्; *See* **Persevere.** **-ence, -cy** *s.* निर्बंधः, आग्रहः, अभिनिवेशः, पर्यवस्थानं, दृढाग्रहः. **-ent,** *a.* निर्बंधपर, साग्रह; *See* **Obstinate.** **-ently,** *adv.* साग्रहं, निर्बंधन.

Person, *s.* पुरुषः, नरः, जनः, व्यक्ति *f.*; ' this p. ' अयं जनः (referring to the speaker); ' a female p. ' स्त्रीजनः. अंगनाजनः. **2** शरीरं, अंगं, वपुस् *n.*, देहः, कायः, तनु *f.*, गात्र; *See* **Body.** **3** रूपं, आकारः, आकृति *f.*, मूर्ति *f.*; ' an enemy in the p. of Krishna ' कृष्णरूपः शत्रुः. **4** पात्रं, भूमिका. **5** पुरुषः (in grammer); ' in p. ' स्वयं, स्वतः, आत्मना, साक्षात, प्रत्यक्षं. **-able,** *a.* सुरूप, सुगात्र (त्री *f.*),

शोभनाकार. **-age,** *s.* पुरुषः, जनः, नरः, व्यक्तिः. **2** श्रेष्ठ-विशिष्ट-जनः. **-al,** *a.* व्यक्तिगत, पुरुषविशेषानुबुद्ध, विशिष्ट-जनोद्दिष्ट. **2** शारीरिक-दैहिक- (की *f.*), शरीर-अंग in comp.: 'p. beauty' अंगसौष्ठवं; 'p. graces' शरीरलावण्यं, 'p. union' शरीरसंबंधः; 'p. attendant' आसन्नपरिचारकः; 'p. attendance' शरीर-चर्या-शुश्रूषा. **3** स्वयंकृत, स्व-आत्म-कृत, साक्षात्कृत. **4** आत्मन्, स्व, निज in comp.; 'for p. profit' आत्म-स्व-हिताय; 'p. experience' स्वानुभवः **5** पुरुष-व्यक्ति-वाचिन्, पुरुष in comp. **6** अस्थावर, जंगम. **-ality,** *s.* व्यक्तिगताक्षेपः; विशेष-व्यक्ति-निर्देशः, व्यक्त्युद्देशः, व्यक्तिसंस्पर्शः. **2** व्यक्तिः, पृथक्त्वं, स्वत्वं. **-ally,** *adv.* स्वयं, स्वतः, प्रत्यक्षं-क्षतः, साक्षात्. **2** व्यक्तितः, पृथक्. **-Personate,** *v. t.* रूपं-वेषं ग्रह् 9 U or धृ 1 P, 10 or आ-स्था 1 U (with gen.), छद्म-कूटं-कृ 8 U; oft. ex. by वेश or रूप in comp., or by denom.; 'p. ing Nala' नलरूपमास्थाय, नलरूपः, नलवेशधारिन् 'p. s. king' नृपायते, राजानति. **2** अभि-नी 1 P, नट् 10, रूप् 10. **-ion,** *s.* रूप-वेश-धारणं-ग्रहणं. **2** अभिनयः, नाटनं. **-or,** *s.* वेशधारिन्-भृत् *m.* **2** अभिनेतृ *m.* **-Personify,** *v. t.* चेतनत्वं-चेतनभावं-आरुह् c. (रोपयति), (अचेतने) चेतनवदुपचर् 1 P, (अचेतनेपि चेतनवदुपचारदर्शनात् S. B. 99). **-ed,** *a.* Ex. by मूर्ति *f.*, मूर्तशरीरिन्-*a.*, इव or साक्षात्. **-ication,** *s.* चेतनत्वारोपः, चेतनधर्मारोपः, मनुष्यगुणारोपः, उपचारः; oft. by इव, साक्षात्; 'p. of virtue' साक्षात्-मूर्तिमान्-धर्मः; *See* **Embodied.**

Personnel, *s.* कार्यकारिवर्गः.

Perspicacious, *a.* तीक्ष्ण-सूक्ष्म-दृष्टि, सूक्ष्म-दर्शिन्. **2** तीक्ष्ण or सूक्ष्म-बुद्धि or मति, कुशाग्र-बुद्धि. **-ness, -Perspicacity,** *s.* सूक्ष्म-दृष्टित्वं, दृष्टिसूक्ष्मता, दृक्पाटवं. **2** सूक्ष्ममतित्वं.

Perspicuous, *a.* स्पष्ट, विशद, प्रसन्न, व्यक्त, सुप्रकाश, सुबोध. **-ly,** *adv.* स्पष्टं, विशदं, भिन्नार्थं. **-ness, -Perspicuity,** *s.* स्पष्टता, प्रसादः, वैशद्यं.

Pers ire, *v. i.* प्र-,स्विद् 4 P, स्वेदं-घर्मं-सु c. **-v. t.** रोमद्वारा निःसृ c. or सु c., स्विद् c. **-ation,** *s.* स्वेदनं, घर्म-स्वेद-स्रावः. **2** स्वेदः, घर्मः, स्वेद-घर्म-जलं-बिंदुः-उदकं; 'excessive p.' प्रस्वेदः. **-ing,** *a.* सस्वेद, सघर्म, स्वेद-घर्म-स्राविन्, स्वेदित, स्विन्न; 'violently p.' प्रस्विन्न, भृशस्विद्.

Persuade, *v. t.* अनु-नी 1 P, प्रबुध् c., अनु-शास् 2 P, प्र-वृत c., नियुज् 10, प्रोत्सह् c., आकृष् 1 P; 'oft. by causal of roots. **2** प्रति-इ c., प्रतीतिं-विश्वासं जन् c. (जनयति), संशयं-संदेहं-छिद् 7 P; *See* **Convince. -ed,** *a.* अनुनीत; जातनिश्चय-विश्वास, प्रतीत, छिन्नसंशय, जातप्रत्यय; 'I feel p.' इति मे प्रतीतिः, इति दृढं मन्ये. **-er,** *s.* प्रवर्तकः, प्रोत्साहकः, नियोजकः. **-Persuasion,** *s.* अनुनयः, अनुशासनं, उपदेशः, प्रवर्तनं, नियोजनं, प्रबोधः-धनं, प्रोत्साहनं. **2** संदेह-संशय-च्छेदः, शंकानिवृत्ति *f.*, दृढनिश्चयः, प्रत्ययः, निर्णयः. **3** मतं, मार्गः, पथिन् *m.*, संप्रदायः. **-Persuasive, Persuasory,** *a.* सानुनय, प्रवर्तक, प्रबोधक, अनुनयिन्, हृदयग्राहिन्, आकर्षिन्. **2** प्रत्ययकारिन्, संशयच्छिद्.

Pert, *a.* चपल, लघु; *See* **Lively. 2** धृष्ट, प्रगल्भ, अविनीत. **-ly,** *adv.* चापल्यात्, धृष्टतया, अविनयेन. **-ness,** *s.* चापल्यं, धार्ष्ट्यं, अविनयः.

Pertain, *v. i.* संबंध् pass., संबंधिन्-*a.* भू 1 P; *See* **Belong.**

Pertinacious, *a.* निर्बंधशील, आग्राहिन्, स्थिर-दृढ-प्रतिज्ञ; धीर, दृढ. **-ly,** *adv.* सनिर्बंधं, साग्रहं. **-ness, -Pertinacity,** *s.* निर्बंधः, आग्रहः, अभिनिवेशः, दार्ढ्यं, धैर्यं; *See* **Obstinate, -cy.**

Pertinent, *a.* प्रास्ताविक (की *f.*), युक्त, यथायोग्य, उपपन्न, योग्य, प्रस्तावसदृश (शी *f.*); 'to be p.' उप-पद् 4 A, युज् pass. **-ly,** *adv.* युक्तं, उपपन्नं, यथोचितं, प्रसंगानुरूपं, प्रस्तावसदृशं. **-Petinence.-cy.** *s.* युक्तता, उपपत्ति *f.*, योग्यता, प्रसंगसंगति *f.*, याथार्थ्यं, प्रस्तुतानुसारः.

Perturb, *v. t.* सं-,क्षुभ् c., आकुलीकृ 8 U, उपहन् 2 P, वि-मुह् c., व्यग्रीकृ, व्यस् 4 A, संकरीकृ; *See* **Confuse. -ation,** *s.* सं-, क्षोभः, व्यग्रता, उपप्लवः, व्या-,मोहः, आकुलत्वं, वैक्लव्यं, उद्वेगः. **-ed,** *a.* क्षुब्ध, आ-व्या-कुल, विक्लव, व्यग्र, परिप्लव, उद्विग्न, पर्याकुल.

Peruse, *v. t.* समग्रं पठ् 1 P or अधि-इ 2 A, निपुणं वच् c.; *See* **Read. -al,** *s.* अध्ययनं, पठनं, पारायणं.

Pervade, *v. t.* अभि-,व्याप् 5 P, वि-अश् 5 A, सर्वतः आक्रम् 1 U, 4 P or प्रविश् 6 P, वि-गाह् 1 A, मूर्च्छ् 1 P; मूर्च्छंत्यमी विकाराः ऐश्वर्यमत्तेषु (S. 5) 'p. (the minds of) those' &c., '(the freshness of) youth has p. ed her limbs' यौवनमंगेषु सन्नद्धं (S. 1). **-ing, -Pervasive,** *a.* व्यापक, व्यापिन्; 'p. all things' सर्वग, सर्वव्यापिन्; 'p. the whole body' सर्वांगीण **-Pervasion,** *s.* अभिव्यापनं-व्याप्ति *f.*, आक्रमणं; मूर्च्छनं.

Perverse, *a.* वाम, कुटिल, प्रतीप, विपरीत, वक्र, प्रतिकूल, वि-प्रति-लोम, वक्र-वाम-शील, कुटिलमति, पिशुन; *See* **Obstinate. -ly,** *adv.* वामतया, कौटिल्येन, प्रतीपं, विपरीतं, वामशीलतया. **-ness,** *s.* प्रतीपता, वामता, वैपरीत्यं, कौटिल्यं, दुष्टता, दौरात्म्यं, दुःशीलं.

Perver', *v. t.* वि-कृ 8 U, परिवृत् c., साचीकृ, विरूप् 10, विलोमीकृ, अन्यथा कृ; भ्रंश् c., विपर्यस् 4 U or c., कलुषयति (D.), कलुषीकृ; दुष् c. (दूषयति), विपरिणम् c. (णमयति). **-er, -ing,** *s., a.* विकारिन्, विपरिणामिन्, विपर्यासकारिन्. **-Perversion,** *s.* विकारः, विकृति *f.*, विक्रिया, विलोमत्वं, प्रतीपता, विपरिणामः, विपर्यासः, विपर्ययः, दूषणं, भ्रंशनं, साचीकरणं, कालुष्यं.

Pervious, *a.* व्याप्य, भेद्य, प्रवेश्य.

Pest, *s.* मारि-री *f.*, म(मा)रकः; (fig.) आधिः, कंटकः, उत्पातः, शल्यं; वामाः कुलस्याधयः (S. 4) 'are a p. to the family' 'p. of the people' लोककंटकः. **-er,** *v. t.* बाध् 1 A, पीड् 10, उपप्लु 1 A, *See* **Harass. -ilence,** *See* (*s.*) above. **-iferous, -ilential,** *a.* मरकावह, मारात्मक, घातुक, विनाशक, दूषक, बाधक, अपकारक, अपकारिन्, अनिष्टकर (री *f.*)

Pestle, *s.* मुस(श)लः-लं, अयोग्रं.

Pet, *s.* प्रेम-प्रीति-पात्रं, प्रेमास्पदं, क्रीडामृगः. **2** ईषत्कोपः, कोपावेशः. **-a.** प्रिय, प्रेमास्पदीभूत, वल्लभ; *See* **Favourite. -v. t.** लल् 10; *See* **Fondle.**

Petal, *s.* दलं, पत्रं. **-ed, -ous,** *a.* सदल, दलवत्.

Petition, *v. t.* अर्थ् 10 A, प्र-अभि°-, याच् 1 A; निविद् c., वि-ज्ञा c. (ज्ञापयति). **-s.** प्रार्थना, याच्ञा, निवेदनं, विज्ञप्ति *f.*, विज्ञापना. **2** (Written) विज्ञप्तिः, प्रार्थना-निवेदन-पत्रं. **-er,** *s.* प्रार्थकः, प्रार्थयितृ *m.*, अर्थिन् *m.*, याचकः, निवेदकः; 'ascertain who are the p. s' ज्ञायतां कः कः कार्यार्थीति (Mr. 9).

Petrify, *v. t.* पाषाणी-प्रस्तरी-कृ 8 U, कठिनीकृ, जडीकृ, संस्तंभ c.; 'p. ed with astonishment' आश्चर्यजडीकृत. **-v. i.** पाषाणीभू 1 P. **-action,** *s.* पाषाणीकरणं; पाषाणीभूतद्रव्यं.

Petroleum, *s.* शिलातैलं-रसः.

Petrology, *s.* अश्म-विद्या or शास्त्रं.

Petticoat, *s.* शाटी, शाटकः, चंडातकं, अर्धोरुकं (girl's); 'p. government' स्त्रीशासनं; 'under p. government' स्त्रीजितः, स्त्रीवशः.

Pettifogger, *s.* क्षुद्र-अधम-वृत्तिः.

Pettish, *a.* कर्कश, वक्रशील-भाव, परुष-स्वभाव, प्रतीप; *See* **Peevish. -ly,** *adv.* कर्कशं, परुषं. **-ness,** *s.* कार्कश्यं, स्वभाव-पारुष्यं.

Petty, *a.* लघु, क्षुद्र, अल्प; *See* **Small;** oft. by उप or कल्प in comp.; 'a p. king' उपराजा, नृपकल्पः.

Petulant, *a.* कर्कश, प्रतीप, दुःशील, वामः *See* **Peevish. 2** अविनीत, प्रगल्भ, धृष्ट. **-ly,** *adv.* प्रतीपं, धृष्टवत्. **-Petulance,** *s.* प्रतीपता, दुःशीलं, धृष्टता.

Pewit, *s.* *See* **Lapwing.**

Pewter, *s.* कांस्यं, पीतलोहं. **-er,** *s.* कांस्यकारः.

Phalanx, *s.* व्यूहः; पंक्ति *f.*

Phantasm, *s.* आ-,भासः, छाया, माया, मनोरथसृष्टि *f.*

Phantasmagoria, *s.* मायाजालं.

Phantasy, *s.* *See* **Fancy.**

Phantom, *s.* भूतः, वेतालः, पिशाचः, रात्रिचरः. **2** आ-,भासः, मनोरथसृष्टि *f.*, मायाकल्पना.

Pharisee, Pharisaic, *s.*; *a.* *See* **Hypocrite.**

Pharmacopœia, *s.* औषधतत्त्वशास्त्रं, भेषज-संस्कारग्रंथः.

Pharmacy, *s.* औषधिक्रिया-संस्कारः-विद्या.

Pharos, *s.* दीपस्थानं-गृहं.

Phase, Phasis, *s.* दर्शनं, वस्तु *n.*; 'p. s of the moon' चंद्रस्य क्षयवृद्धी. **2** (Point of view) दृष्टि *f.*; *See* **View.**

Pheasant, *s.* वीजनः, जीवंजीवः.

Phenomenon, *s.* दृग्विषयः, गोचरवस्तु *n.*, दर्शनं, आलोकः. **2** उत्पातः, अद्भुतं.

Phial, *s.* लघुकूपी, काचकूपी-पात्रं.

Philander, *v. i.* स्त्रीजनसमागमं अभ्यस् 4 P, वि-लस् 1 P, विलासं-विभ्रमं-दृश् c.

Philanthropy, *s.* लोकहितेच्छा, लोक-जनप्रीति *f.*, सर्वभूतदया, विश्वप्रीतिः, विश्वसौहृदं. **-ic, -ical,** *a.* लोकहितैषिन्, जनहितकामः, जगन्मित्रं, विश्वामित्रं, विश्वसुहृद्. **-ist,** *s.* जनहितैषिन् *m.* विश्वसुहृद्.

Philippic, *s.* भर्त्सनवाक्यं, निंदात्मकः प्रबंधः.

Philology, *s.* भाषाविज्ञानं-तत्त्वं, शब्दव्युत्पत्तिशास्त्रं-विद्या. **-er-, -ist,** *s.* शाब्दिकः भाषातत्त्वज्ञः. **-ical,** *a.* शाब्दिक (की *f.*), शब्दशास्त्रीय.

Philomath, *s.* विद्याप्रियः-भक्तः, ज्ञानसेविन् *m.* **-y,** *s.* विद्यासेवनं.

Philosophy, *s.* दर्शनं; 'six systems of p.' षड्दर्शनं. **2** तत्त्वज्ञानं, विज्ञानं, तत्त्वविद्या-शास्त्रं; तत्त्वं, ज्ञानं, विद्या, शास्त्रं in comp.; 'moral p.' नीतिशास्त्रं; 'logical p.' तर्कशास्त्रं-विद्या, &c. **-er,** *s.* दर्शनज्ञः, तत्त्वविद् *m.*, तत्त्वज्ञः, ज्ञानिन् *m.* तात्त्विकः, ज्ञानी, पंडितः, प्राज्ञः, ज्ञाननिष्ठः; 'p. s stone' चिंतामणिः; स्पर्शमणिः. **-ic, -ical,** *a.* तत्त्व-दर्शन in comp.; दार्शनिक (की *f.*). **2** विज्ञ, तत्त्व-

ज्ञानपर, ज्ञान-विद्या-पर. **-ically,** *adv.* दर्शनानुसारेण, तत्त्वतः. **-ize,** *v. i.* तत्त्वं निरूप् 10 or आलोच् 10 or अन्वीक्ष् 1 A.

Philtre, *s.* मंत्रौषधं, वशीकरणचूर्णं.

Phiz, *s.* *See* **Face.**

Phlebotomy, *s.* शिरावेधः-मोक्षः-छेदः, रक्तमोक्षणं-स्रावः.

Phlegm, *s.* कफः, श्लेष्मन् *m.*, सिंघाणकं. **2** मांद्यं, जाड्यं; 'a medicine removing p.' (phlegmagogue) श्लेष्मघ्नं, कफनाशनं. **-atic,** *a.* कफिन्, श्लेष्मल-ण, बहुकफ. **2** कफकर (री *f.*), श्लेष्मजनन (नी *f.*). **3** श्लेष्मण. 4 जड, मंद, शीत, *See* **Indifferent.**

Phonetic, *a.* स्वरसंवादिन्, ध्वनि-स्वर-in comp. **-Phonetics, Phonics,** *s.* स्वर or ध्वनि-विद्या or शास्त्रं.

Phonograph, *s.* स्वरलेखनयंत्रं.

Photograph, *s.* आलोकलेख्यं. **-er,** *s.* आलोकलेख्यकारः.

Phrase, *s.* वाक्यं, उक्ति *f.*, वचनं. **-v.** *t.* अभि-धा 3 U, उद्दिश् 6 P; *See* **Call.** **-Phraseology,** *s.* वाक्यबंधः-रचना, भाषा-सरणि *f.*, वाक्प्रकारः, वाग्रीति *f.*-व्यापारः-व्यवहारः; 'dramatic p.' नाट्योक्तिः, नाट्यपरिभाषा.

Phrenetic, *a.* उन्मत्त; *See* **Frantic.** **-Phrenitis,** *s.* सन्निपातज्वरः, उन्मादः; *See* **Frenzy.**

Phrenology, *s.* मस्तिष्कविद्या.

Phthisic, Phthisis, *s.* श्वासावरोधः, श्वासाकृच्छ्रं; क्षयः, क्षयरोगः, शोषः, यक्ष्मन् *m.*, राजयक्ष्मा. **-Phthisical,** *a.* क्षयिन्, क्षयरोगिन्.

Phylactery, *s.* रक्षाकरंडः.

Physic, *s.* चिकित्सा, उपचारः, वैद्यक्रिया, औषधोपचारः. **2** औषधं, भेषजं, अगदः. **-v.** *t.* कित् desid. (चिकित्सति-ते), उप-चर् 1 P, भेषजं दा 3 U. **-ian,** *s.* वैद्यः, भिषज् *m.*, चिकित्सकः, अगदंकारः, रोगहारिन्-हृत् *m.* **-Physical,** *a.* साकार, स्थूल, जड; *See* **Material. 2** अंग, विग्रह, शरीर in comp.: 'p. strength' शरीरबलं; 'p. substance' स्थूलद्रव्यं-वस्तु. **3 Medicinal,** q. v.; 'p. science (physics)' पदार्थ-विज्ञानं,-शास्त्रं. **-ly,** *adv.* प्रकृत्या, स्वभावतः, जातितः, जन्मतः; *See* **Naturally.**

Physiognomy, *s.* आकृति *f.*, वदनाकृतिः, मुखं, वदनं. **2** वदनलक्षणनिरूपणं. **-ist,** *s.* मुखसामुद्रिकः.

Physiography, *s.* भूवर्णनं.

Physiology, *s.* प्राण्योषधिजीवनशास्त्रं.

Physique, *s.* शरीरस्थिति *f.*

Piacular, *a.* अघ-पाप-नाशिन्.

Picaroon, *s.* समुद्रीयदस्युः.

Pick, *v. t.* चि 5 U, ग्रह् 9 U, समाहृ 1 P, आ-दा 3 A, उद्-धृ 1 P, 10, लू 9 U, छिद् 7 P, (flower &c.). **2** शुध् c., मृज् 2 P or c., परिष्कृ 8 U. **3** (Up) वृ 5 U, उद्धृ 1 P, उद्ग्रह्; पृथक् कृ; 'p. a bone' अस्थिमांसं चर्व् 1 P, 10; 'p. out' उत्पद् 10, निष्कृष् 1 P; 'p. a quarrel' कलहं उत्-स्था c. (उत्थापयति); 'p. holes' (in another's coat) परस्य छिद्राणि दृश् 1 P, रंध्राणि-छिद्राणि-अन्विष् 4 P; 'p. the pocket' ग्रंथिं छित्त्वा अपहृ. **-s. Pick-axe,** q. v. **2** उद्धारः, वरणं. **3** विशिष्टभागः, उत्कृष्टभागः; 'ear-p.' कंडूयनकं; 'tooth-p.' दंतोल्लेखनी; 'p.-axe' टंकः, पाषाण-भेदनी, पाषाणदारणः; 'p.-pocket' ग्रंथि-च्छेदकः-चौरः. **-ing,** *s.* उद्धरणं, उद्ग्रहणं.

Picket, *s.* सेनारक्षः, रक्षकदलं. **2** शंकुः, स्थाणुः.

Pickle, *s.* संधितं, संधानं, संधितद्रव्यं. **2** लवणं. **-v.** *t.* सं-धा 3 U, उपस्कृ 8 U.

Picnic, *s.* विहरणं, वनभोजनं.

Pictorial, *a.* सचित्र, चित्रोपेत, चित्रालिखित.

Picture, *s.* चित्रं, आलेख्यं, प्रतिमा, प्रतिकृति *f.*, प्रतिरूपं, प्रतिच्छंदः-दकं, प्रतिच्छाया; 'as if drawn in a p.' आलिखित इव; 'p.-board' चित्रफलकः; 'p.-frame' चित्रा-धारः, चित्रावरणं; 'p.-gallery' चित्रावली, चित्रशाला; 'p.-maker' चित्रक(का)-रः. **-v.** *t.* मनसि कृ 8 U, आलोच् 10, मनसा कल्प् c. or विचर् c. or वि-भू c. **2** चित्र् 10, आलिख् 6 P, वर्ण् 10. **-ed,** *a.* चित्रगत, आलेख्यगत, चित्रार्पित, आलिखित. **2** मनसा कल्पित. **-Picturesque,** *a.* चित्रोपम, वि-,चित्र, शबल.

Piebald, *a.* *See* **Variegated.**

Piece, *s.* खंडः-डं, विभागः; अंशः, लवः, शकलः-लं, वि-,दलं, भिन्नं. **2** रचना, प्र-,बंधः; 'to break in p. s' शकलीकृ 8 U, खंडशः कृ, खंड् 10; 'to fall to p. s' वि-,दल् 1 P; 'p. of poetry' काव्यप्रबंधः, कविता; 'p. of work' कार्यं; 'p. of money' मुद्रा; p. of water' जलाधारः, जलाशयः; 'in p. s' खंडशः, लवशः; 'p. at chess' शा(सा)रिः-रः; 'a p. to each' एकैकं, प्रत्येकं, पृथक् पृथक्; 'what a p. of work is man' अहो निर्माणविशेषः नरजीवः; 'of a p.' एकरूप-प्रकार; 'of a p. with' सदृश (शी *f.*), अनुरूप; *See* **Like.** **-v.** *t.* संयुज् 7 U, 10, संधा- समाधा-3 U. **-less,** *a.* अखंड. **-Piecemeal,** *adv.* खंडशः, लवशः, भागशः, खंडं खंडं, पृथक् पृथक्. **-a.** भागिन्, खंड in comp.

Pied, *a.* *See.* **Veriegated.**

Pier, *s.* सेतुबंधः **2** स्तंभः, वप्रः-प्रं.

Pierce, *v. t.* व्यध् 4 P, निर्-भिद् 7 P, प्र-भंज् 7 P, छिद् 7 P; *See* **Perforate. 2** आ-उप-हन् 2 U, शीतवातोपहतः 'p. ed by cold winds'. **-ed,** *a.* विद्ध, निर्भिन्न, छिद्रित; 'p. ed through the heart' भिन्नहृदय; 'having the ears p.' विद्ध-छिद्रित-कर्ण. **-er,** *s.* वेधकः- भेदकः. **2** वेधनिका, वेधनी. **-ing,** *a.* वेधक; वेधिन्, भेदिन् भिद्-छिद्-in comp.: 'p. the vital parts of the heart' हृदयमर्मभिद्-छिद्; (sound) परुष, कर्कश. **-s.** वेधः-धनं, निर्भेदः, छेदः-दनं.

Piety, *s.* *See* under **Pious.**

Pig, *s.* शूकरशावः-वकः शूकरः; *See* **Hog. 2** कुशी, लोहपिंडः; 'p.-iron' असंस्कृतं अयः; 'p.-headed' स्थूल, स्थूलधी. **-gish,** *a.* शूकरोपम. **-Piggery,** *s.* शूकरालयः.

Pigeon, *s.* कपोतः, पारावतः, कलरवः; 'wood p.' हारि(री)तः; 'p.-hearted' भीरु-हृदय, कातर; 'p.-hole' कपोतबिलं; 'p.-house,-cot' कपोतपालिका, विटंकः.

Pigment, *s.* वर्णकः; वर्णः, रंगः.

Pigmy, *s.* वामनः, ह्रस्वः, खर्वः. **-a.** वामन, ह्रस्व, खर्व, लघुतनु, अल्पमूर्ति.

Pike, *s.* प्रासः, कुंतः, शूलः-लं; *See* **Lance;** 'p.-man' प्रासिकः, कौंतिकः, शाक्तीकः, शूलिन् *m.*

Pilaster, *s.* चतुरस्रः स्तंभः.

Pile, *s.* राशिः, चयः, निकरः, पुंजः, पूगः, स्तोमः, समूहः. **2** चिता, चिति *f.*, चित्या. **3** स्थूणा, स्तंभः, शंकुः, कीलः **4** हर्म्यं, भवन, महामंदिरं. **5** ऊर्णा. **-v.** *t.* समाचि 5 U, राशीकृ 8 U.

Piles, *s.* अर्शस् *n.*, दुर्नामकं, अर्शोरोगः, गुदकीलकः, गुदांकुरः; 'affected by p.' अर्शस.

Pilfer, *v. t.* मुष् 9 P, चुर् 10, अपहृ 1 P **-er,** *s.* चौरः, मोषकः; *See* **rob,-ber.**

Pilgrim, *s.* यात्रिकः, तीर्थसेविन् *m.* **-age,** *s.* तीर्थयात्रा, यात्रा, यात्राप्रसंगः, तीर्थाटनं-सेवा; on a p. to Garuda' गरुडस्य यात्रा-प्रसंगेन; 'place of p.' तीर्थः-र्थं, पुण्यस्थानं.

Pill, *s.* वटिका, गुटिका, गुलिका.

Pillage, *v. t.* वि-,लुंट्-ठ् 1 P, 10, अपहृ 1 P. **-s.** विलुंठनं, लोप्त्रं, लोत्रं, अपहारः. **-er,** *s.* लुंठकः, अपहारकः.

Pillar, *s.* स्तंभः, स्थाणुः, स्थूणा, अवष्टंभः; यूपः (sacrificial); 'p. of state' राज्यस्य आधारस्तंभः; 'p. s of justice' न्यायाधाराः, धर्मावष्टंभाः.

Pillow, *s.* उपधानं, उपबर्हः, बालिशं; 'p.-case' उपधानकोशः-आवेष्टनं; 'I slept, making my left arm serve as a p.' वामभुजमुप-धाय अशयिषि (D. K. II. 5). **-v.** *t.* उप-धा 3 U, उपधानीकृ 8 U.

Pilous, *a.* लोमश, प्रचुरलोमन्. **-Pilosity,** *s.* लोमशत्वं, लोमप्राचुर्यं.

Pilot, *s.* कर्णधारः-ग्राहः, कर्णिकः, कर्णिन् *m.*, नाविकः, नौवाहः. **2 Guide,** q. v. **-v.** *t.* मार्गं दृश् c., प्रणी 1 P, वह् c. **-age,** *s.* कर्णिकवेतनं.

Pimp, *s.* विटः, संचारकः; *See* **Pander.**

Pimple, *s.* पिटिका, स्फोटः, क्षुद्र-तनु-व्रणः, रक्तस्फोटः- गंडः, रक्तवटी. **-ed,-y,** *a.* स-स्फोट, व्रणिन्, दद्रुण, पिटिकावृत.

Pin, *s.* सूचि *f.*, कीलः-लकः-कं, शलाका, शंकुः, शल्यं **2** (Of a carriage) अणिः-णी, अक्षाग्रकीलः; 'p.-maker' सूचिकारः. **-v.** *t.* सूच्या बंध् 9 P, कील् 10.

Pincers, *s.* संदंशः-शकः, कंकमुखं.

Pinch, *v. t.* पीड् 10, बाध् 1 A, क्लिश् 9 P, संकुच् 1 P (the body), आर्तीकृ 8 U; 'p. ed with cold' शीतार्त, हिमपीडित; 'p. ing poverty' दुःसहं दारिद्र्यं. **2** अं-गुल्यग्रेण पीड्. **3** मुष्टिना संग्रह् 9 P, संग्रह्; 'none but the wearer knows where the shoe p. es' न हि वंध्या विजानाति गुर्वीं प्रसववेदनां. **-s.** अंगुलिपीडनं; संग्राहः, ग्रहणं; 'p. of snuff' नस्यकूर्चः. **2** संक-टावस्था, दुर्गति *f.*, कष्टं, कृच्छ्रं; 'p.-fist' बद्ध-दृढ-मुष्टिः, अमुक्तहस्तः.

Pine, *s.* देवदारुः-रु, पीतद्रुः, सरलः, पूतिकाष्ठं; *See* **Fir also.** **-v.** *t.* (Away) अवसद् 1 P, परि-,म्लै-ग्लै 1 P, क्षि-pass., खिद्-प्रली 4 A. **2** (For) उत्तम् 4 P, उत्कंठ् 1 A, उत्सुकायते (D.); oft by उत्क, उत्सुक, उत्कंठ in comp.: 'a heart p. ing away in absence' विरहोत्कंठं हृदयं; 'p. ed for his home' गृहं गंतुमुदताम्यत्; अद्रिसु-तासमागमोत्कः (K. VI. 95) 'p. ing to be united with Parvati'; अंतःपुरवि-रहपर्युत्सुकस्य राजर्षेः (S. 3) 'who is p. ing by separation &c. **-ing,** *s.* म्लानि *f.*, अवसादः, उत्कंठा. **-a.** म्लान, क्षीण, विषण्ण, उत्क, उत्सुक, सोत्कंठ.

Pinion, *s.* पक्षः, पर्णं **2** बाहुपाशः-बंधः. **-v.** *t.* पक्षौ बंध् 9 P, बाहू बंध्.

Pink, *s.* पाटलवर्णः, पाटलः. **2** अग्रं, शिखरं, पराकाष्ठा. **-a.** पाटल, पाटलवर्ण; 'p.-eyed' गज-सूक्ष्म-नेत्र. **-v.** *t.* व्यध् 4 P; *See* **Perforate.**

Pinnace, *s.* क्षुद्र-लघु-नौका.

Pinnacle, *s.* अट्टः, प्रासादाग्रं-शृंगं, प्रोच्छ्रितं हर्म्यं. **2** शिखरं, शृंगं, अग्रं.

Pioneer, *s.* आटविकः, काष्ठ-तरु-छिद् *m.* **2** मार्गदर्शकः, अग्रेसरः, अग्रयायिन् *m.* *See* **Forerunner.** **-v.** *t.* सैन्यमार्गं शुध् c.

Pious, *a.* धार्मिक (की *f.*), पुण्य-धर्म-शील, धर्मात्मन्, पुण्य, पुण्यात्मन्, भक्तिमत्, शुचि-

व्रत, भक्ति or धर्म-निष्ठ or परायण, धर्माचार; 'led a p. life' धर्माचरणेन आयुरक्षपयत्; 'p. action' धर्म्यक्रिया; for p. purpose' धर्मार्थं. 2 धर्म-भक्ति-मूलक. **-ly,** *adv.* भक्त्या, धार्मिकवत्. **-ness, -Piety,** *s.* धर्मनिष्ठा-परता-आसक्ति *f.*, धर्मात्मता, पुण्यशीलं, ईश्वर-धर्म-भक्ति *f.*, ईश्वरनिष्ठा-सेवा, पुण्यता, भक्तिः; 'distinguished for p.' धर्मप्रधान. 2 पितृसेवा, पुत्रधर्मः. [वि ए 2 P.

Pip, *s.* बीजं. 2 बिंदुः, अंकः. *-v. i.* कूज् 1 P,

Pipe, *s.* वंशः, वेणुः, सुषिरं. 2 नालः, नाडि-डी-लि-ली *f.*, प्रणालः-ली; 'water-p.' सारणि *f.*, प्रणालिका. *-v. i.* वेणुं वद् c. or ध्मा 1 P. **-er,** *s.* वांशिकः, वेणुध्माः.

Piquant, *a.* उग्र, तिग्म, कटु, तीक्ष्ण, प्र-,खर. 2 मिष्ट, स्वादु, सरस.

Pique, *s.* कलिः, कलहः; ईषत्कोपः. *-v. t.* ईषत् कुप् c. or रुष् c. 2 उत्तिज् c., उत्पद् c., प्रोत्सह् c., प्र-वृत् c. 3 (Oneself) अभिमन् 4 A; विकत्थ् 1 A; 'he p. s himself upon his learning' पंडितंमन्योऽसौ.

Pirate, *s.* समुद्रदस्युः. 2 साहसिकनौका. 3 शब्दचौरः. *-v. t.* अपहृ 1 P, लुंट्-ट् 1 P, 10. **Piracy,** *s.* समुद्रीयचौर्यं-लुंठनं. **-Piratical,** *a.* साहसिन्, साहसिक (की *f.*).

Piscator, *s.* *See* **Fisherman.**

Pisces, *s.* मीनः, मीनराशिः.

Piscivorous, *a.* मत्स्याशन, मत्स्याद.

Pismire, *s.* *See* **Ant.**

Piss, *s.* मूत्रं, मेहः. *-v. t.* मूत्रं उत्सृज् c., मिह् 1 P, मूत्र् 10.

Pistil, *s.* गर्भकेसरः-रं.

Pit, *s.* गर्तः-र्ता, विवरं, बिलं, अवटः; 'p.-coal' आकरांगारः; 'p.-fall' गूढ or छन्न-कूपः or गर्तः, अंधकूपः. *-v. t.* सूक्ष्मगर्तैः अंक् 10 or चिह्नयति (D.). 2 योद्धुं प्रोत्सह् c., प्रतियुध् c.

Pitch, *v. t.* रच् 10, प्रतिवि-धा 3 U; रुह् c. (रोपयति), स्था c. (स्थापयति), निविश् c. 2 क्षिप् 6 P, प्र-,अस् 4 P, नि-,पत् c. 3 अरालेन अंज् 7 P. *-v. i.* आ-अव-पत् 1 P, अवरुह् 1 P, अव-तॄ 1 P, अध्यास् 2 A. 2 निविश् 6 A, शिबिरं अध्यास्. 3 अधोमुखेन पत्, अवाक् गम् 1 P. 4 (Upon) वृ 5 U; *See* **Choose.** *-s.* तिंदुः, रालः, अरालः, यक्षधूपः सर्जरसः, सर्वरसः, बहुरूपः 2 कोटि *f.*, काष्ठा, अग्रं; शिखरं; 'highest p.' परा काष्ठा-कोटिः. 3 परिमाणं, पर्यंतः; *See* **Degree.** 4 उत्संगः, कटकः-कं. 5 स्वरः; 'mineral p.' शिलाजतु *n.* **-y,** *a.* तिंदुलिप्त. 2 सूचिभेद्य, अंध, अतिकृष्ण.

Pitcher, *s.* कुंभः, घटः, घटी, कलसः-शः, पुटग्रीवः; *See* **Jar.**

Pith, *s.* मज्जा, गर्भः, सारः. 2 सारः, सारांशः, सत्त्वं, तत्त्वं. 3 निर्यासः, रसः. 4 सत्त्वं वीर्यं, बलं, उत्साहः. **-less,** *a.* असार, निःसार, फल्गु, निःसत्त्व, विरस. **-y,** *a.* ससार, सत्त्वपूर्ण, सरस, ससत्त्व, सारवत्, सारगर्भ. 2 सप्रभाव, तेजस्विन्, वीर्यवत्, ससत्त्व.

Pittance, *s.* स्तोकांशः, अत्यल्पभागः; अल्पमूल्यं-वेतनं, ग्रासाच्छादनमात्रं.

Pity, *s.* दया, अनुकंपा, करुणा, घृणा, कृपा, अनुक्रोशः; 'in p. to my passion' (रागजनितं) दुःखं मे निरवेक्ष्य (Mr. 5); 'what a p. it is' अहो नु कष्टमेतत्. *-v. t.* 'take p. on' दय् 1 A (with gen.); अनुकंप् 1 A, दयां कृ 8 U (with loc.); प्रसद् 1 P. **-Piteous, Pitiable,** *a.* अनुकंप्य, करुणा-अनुकंपा-योग्य, दयाविषयः-भाजनं-पात्रं, करुण, दीन; 'in p. accents' करुणस्वनैः. 2 वराक (की *f.*), तपस्विन् (of persons). **-ly,** *adv.* करुणं, दीनं. **-ness,** *s.* अनुकंप्यता, कारुण्यं; दैन्यं. **-Pitiful, -Pitying,** *a.* करुणार्द्र, करुणामय (यी *f.*), करुणा-दया-शील, सदय, सानुकंप, दयालु, कृपालु; *See* **Kind;** 'a p. person' दयानिधिः-सागरः, दीनबंधुः-वत्सलः. 2 करुण, दीन, शोच्य. 3 **Contemptible.** q. v. **-ly,** *adv.* सदयं, सानुकंपं, सकरुणं. **-ness,** *s.* दयालुता, कारुण्य, दयार्द्रता. **-Pitiless,** *a.* निर्दय, निरनुक्रोश, निर्घृण, निष्कृप, क्रूर, निष्ठुर, कठोर, अकरुण. **-ly,** *adv.* निर्दयं, क्रूरं निष्ठुरं.

Pivot, *s.* विवर्तनकीलः.

Placard, *s.* घोषणापत्रं. *-v. t.* घोषणापत्रेण प्रकाश् c.

Placate, *v. t.* **Appease,** q. v. **-Placable,** *a.* क्षमाशील; सांत्वनीय, आराध्य, प्रसाद्य.

Place, *s.* स्थानं, स्थलं, प्र-,देशः, स्थली, भू-भूमि *f.*, धिष्ण्यं. 2 पदं, आस्पदं, विषयः. 3 पदं, पदवि-वी *f.*, अधिकारः, नियोगः, अधिकारपदं; *See* **Office.** 4 अवकाशः, अवसरः, प्रसरः; 'p. of honour' संमानपदं, गौरवपदं; 'in one p.' एकत्र; 'in many p. s' बहुत्र; 'p. of residence' निवासस्थानं; वसति *f.*; 'p. for dancing' नृत्यशाला-स्थानं; 'out of p.' अस्थाने, अनुचितं; 'in the p. of a father' पितृस्थाने-भूमौ; 'p. for fear' भयस्थानं-कारणं-हेतुः; 'in one p.-in another p.' क्वचित्-क्वचित्, इतः-इतः, एकत्र-अन्यत्र; 'in the first p.' प्रथमं; प्रथमतः, प्रथमं तावत्; 'in the next p.' अपरंच, पुनः, पुनश्च; 'to give p.' स्थानं त्यज् 1 P, व्यप-सृप् 1 P, अप-सृ 1 P; 'to take p.' *See* **Happen, Occur.** *-v. t.* स्था c. (स्थापयति), धा 3 U, नि-आ°-, वि-,न्यस् 4 U, निक्षिप् 6 P, आ-नि-विश् c., आरुह् c. (रोपयति), धृ 10; oft. by कृ 8 U, दा 3 U, व्यापृ c., (व्या-

पारयामास करं किरीटे R. vi. 19); 'p. over' अधिकृ, अधि-ष्ठा 1 P; 'p. in an office' पदे नियुज् 7 A, 10 or आरुह् c.

Placid, *s.* शांत, प्र-उप°-, प्रसन्न, निराकुल, अनुद्विग्न, जितक्रोध, असंभ्रम, शांतात्मन्, प्रसन्नचित्त. **-ly,** *adv.* प्रसन्नं, शांत्या, शांतचेतसा, निराकुलं. **-ity, -ness,** *s.* शमः, शांति *f.*, प्रसादः, अक्रोधः, असंभ्रमः, अक्षोभः.

Plagiarism, *s.* शब्दचौर्यं, वागपहारः. **Plagiarist,** *s.* शब्द-ग्रंथ-चौरः.

Plague, *s.* मारी, महामारी, म(मा)रकः. 2 उत्पातः, अरिष्टं, अनर्थः, शल्यं, उपद्रवः, वांछकः, उपप्लवः; *See* **Pest.** *-v. t.* मार्या ग्रस् 1 A or आक्रम् 1 U, 4 P. 2 बाध् 1 A, पीड् 10, तप् c., दु 5 P; *See* **Harass.** **-ing,** *a.* बाधक, पीडक, क्लेशद, पीडाप्रद.

Plain, *s.* समभूमि *f.*-देशः-स्थलं-ली, समभूभागः; *See* **Level.** *-a.* सम, सपाट. 2 विनीत, निरलंकार, अभूषित, निर्भूषण. 3 स्पष्ट, व्यक्त, विशद, परि-,स्फुट, सुबोध, स्पष्टार्थ, भिन्नार्थ, प्रकाश, प्रत्यक्ष, प्रकट. 4 केवल, मात्र in comp. 5 (Style) अनलंकृत, शुद्ध, अनलंकार, अव्यंजन. 6 (Food) उपस्कर-हीन-शून्य, असंस्कृत. 7 अमाय, दक्षिण, निष्कपट, निर्व्याज, सरल, कपट-माया-हीन, निर्व्यलीक, अकृत्रिम, ऋजु; *See* **Frank.** 8 सामान्य, साधारण (णी *f.*); मध्यमरूप, नातिसुंदर (री *f.*); 'a p. woman' 'one p. in person' सामान्यलावण्योपपन्ना, नातिसुभगा, अनतिसुंदरी; 'p. dealing' न्यायाचार, शुद्ध-सरल-मति, निर्व्यलीक, दक्षिण, अमाय, ऋजु; (*s.*) सारल्यं, निष्कापट्यं. *-v. t.* समीकृ 8 U. **-ly,** *adv.* स्पष्टं, व्यक्तं, स्फुटं, स्पष्टार्थं, सुबोधं, प्रकाशं, प्रकटं, प्रत्यक्षं. 2 निर्व्याजं, निर्व्यलीकं, अवक्रं, सारल्येन, अमायया, निष्कपटं. 3 विनीतं, अनलंकारं; 'p. dressed' विनीतवेष. **-ness,** *s.* समता, विनीतत्वं, भूषणाभावः, व्यक्तता, स्पष्टता, वैशद्यं, सुबोधता, प्रकाश्यं, अव्याजः, निर्व्याजता, अकापट्यं, सारल्यं, अमाया, आर्जवं, &c.

Plaint, *s.* प्रतिज्ञा, अभियोगः, भाषापादः, भाषा, पूर्वपक्षः, पक्षः. 2 विलापः, विलपनं, परिदेवनं-ना, शोकः. **-Plaintiff,** *s.* अर्थिन् *m.*, वादी, अभियोगी, कार्यार्थी, अभियोक्तृ *m.*, सूचकः. **-Plaintive,** *a.* परिदेविन्, विलापिन्. 2 शोकावह, शोकार्थक, शोकदुःख-गर्भ; करुण, दीन, सकरुण; 'in p. words' परिदेविताक्षरैः. **-ly,** *adv.* करुणं, दीनं.

Plait, *s.* भंगि-गी *f.*, भगः, ऊर्मि *f.*, पुटः, चूणः. 2 वेणि-णी *f.*, कबरी, धम्मिल्लः. *-v. t.* ग्रंथ् 9 P, व्या-वृत् c., पुटीकृ 8 U, संवे 1 P, वेणीकृ, वेणीरूपेण ग्रंथ्.

Plan, *s.* उपायः, प्रयोगः, प्र-,युक्ति *f.*, कल्पना 2 सूत्रपातः, चित्रलेखनं; आलेख्यं, स्थूलवर्णनं. *-v. t.* प्र-सं-क्लृप् c., प्र-,युज् 10, चिंत् 10, मंत्र् 10 A, अनुसंधा 3 U, आलोच् 10, मनसा विचर् c. or वि-भू c. 2 आलिख् 6 P, सूत्रपातं कृ 8 U. **-ning,** *s.* उपाय-कल्पना-योजना

Planch, *See* **Plank.**

Plane, *a.* सम, समस्थ. *-s* समं, समक्षेत्रं, धरातलं. 2 तक्षणी, त्वक्षणी. *-v.* समीकृ 8 U. 2 तक्ष् 1, 5 P.

Planet, *s.* ग्रहः, ज्योतिस् *n.*; 'minor p.' उपग्रहः; 'passage of a p.' संक्रमः, संक्रांति *f.*; 'aspect of a p.' ग्रहदशा; 'influence of a p.' ग्रहावेशः. **-ary,** *a* ग्रह in comp.

Planish, *v. t.* समीकृ 8 U., तिज् c., प्र-मृज् c.

Plank, *s.* फलकः-कं; दारु-काष्ठ-फलकः. *-v. t.* फलकैः आस्तृ 9 U or आच्छद् 10.

Plant, *s.* ओषधि *f.*, लता; तरुः, वृक्षः. *-v. t.* (Seeds) आ-,रुह् c. 2 प्रति-,स्था c. (स्थापयति), वि-,न्यस् 4 U निविश् c., नि-खन् 1 P, नि-धा 3 U, रुह् c. 3 अधि-,वस् c. **-ation,** *s.* रोपणं. 2 क्षेत्रं, in comp., वाटः-टी, वाटिका; शाकटं-शाकिनं in comp., वृक्षवाटिका, 'sugar-p.' इक्षुशाकटं-वाटिका. 3 **Colony,** q. v. **-er,** *s.* रोपयितृ *m.*, रोपकः. 2 वाटिकेश्वरः.

Plantain, *s.* कदली-लः, रंभा, वारणबुसा-षा, मोचा, अंशुमत्फला, काष्ठीला, 'p. fruit' कदलीफलं, मोचं; 'wild p.' काष्ठकदली.

Plantigrade, *a.* पादतलचारिन्.

Plash, *s.* आघातः, आस्फालनं. 2 क्षुद्रजलाशयः. *-v. i.* जले क्रीड् 1 P, जलं आस्फल् c. *-v. t.* अवच्छिद् 7 P, लू 9 U, कृत् 6 P. 2 संग्रंथ् 9 P. **-y,** *a.* जलाढ्य.

Plaster, *s.* लेपः, सुधा, चूर्णलेपः. 2 उपनाहः उपदेहः. *-v. t.* लिप् 6 P, वि-अनु-प्र-°, दिह् 2 U, उप-नह् 4 P. **-er,** *s.* लेपकः, पलगंडः. **-ing,** *s.* वि-प्र-लेपः-पनं.

Plastic, *a.* आकारद, कल्पक. 2 नम्य, सुखनम्य.

Plat, *s.* **Plot.** q. v. *-v. t.* **Weave,** q. v. 2 प्र-सं-क्लृप् c., चिंत् 10.

Plate, *s.* पात्रं, भाजनं. 2 कोशः-षः, हेमरूप्यं. 3 फलकः-कं, पत्रं; पट्टः-ट्टं, पट्टिका; 'copper p.' ताम्रपट्टः, ताम्रपत्रं; 'p. s of grant' शासन-नियम-पत्राणि. *-v. t.* रजतपत्रेण आवृ 5 U or आच्छद् 10; रजतेन अलंकृ 8 U. **-ed,** *a.* रजतपत्रावृत, रूप्यनिबद्ध.

Plateau, *s.* समस्थली, अधित्यका; *See* **Level.**

Platform, *s.* वेदि *f.*, वेदिका, उन्नतस्थानं.

Platoon, *s.* गुल्मः-ल्मं.

Platter, *s.* पात्रं, भाजनं.

Plaudit, *s.* प्रशंसा, धन्यवादः, जयघोषः.

Plausible, *a.* सत्याभास, सत्यसंकाश, बाह्यतः रमणीय.

Play, *v. i.* क्रीड् 1 P, रम् 1 A, वि-हृ 1 P, विलस् 1 P, खेल् 1 P. **2** (At dice) दिव् 4 P, क्रीड्, ग्लह् 1 A; 'p. s at dice' अक्षैः -अक्षान्-दीव्यति. **3** वद् c. (instrument). **4** चेष्ट् 1 A, वृत् 1 A, चल् 1 P. **-v. t.** रूप् 10, नट् 10, अभिनी 1 P. ex. by denom.; 'p. s the king' नृपायते; 'p. s the woman' स्त्रीवाचरति. **2** प्र-,चल्-इ c., प्रवृत् c., प्रसृ c. **3** वि-धा 3 U, कृ 8 U, अनु-ष्ठा 1 P. **-s.** क्रीडा, खेला-लनं, लीला, केलि *f.*, विनोदः, विलासः, विहारः, कौतुकं, परिहासः; 'in p.' लीलया, परिहासेन. **2** नाटकं. **3** अक्षक्रीडा, द्यूतं, देवनं. **4** अभिनयः, गति *f.* **5** आचरणं, चेष्टितं; वृत्ति *f.*, व्यापारः, कृत्यं, चेष्टा; 'foul p.' दुश्चेष्टितं. **6** चलनं, सरणं. **7** प्रसरः, अवकाशः, अवसरः; 'p.-day' अनध्यायदिवसः-तिथिः, विश्रामदिवसः; 'p. house' नाटक-रंग-शाला; 'p.-thing' क्रीडनकं, क्रीडाद्रव्यं-वस्तु. **-er,** *s.* क्रीडकः; (at dice) अक्ष-,देविन् *m.*, अक्षक्रीडकः, अक्षद्यूतः. **2** नटः, कुशीलवः, नर्तकः, अभिनेतृ *m.* पात्रं. **-ful,** *a.* क्रीडासक्त, क्रीडापर-मग्न, केलि-क्रीडा-लीला-शील, लीला-खेला-पर, विलासिन्, विनोदिन्; (of things) सलील -क्रीडा-केलि in comp.; 'p. anger' प्रणयक्रीडा-कोपः, केलिकोपः. **-fully,** *adv* क्रीडापूर्वं, परिहासेन (jokingly); लीलया, सकौतुकं, सविलासं, सखेलं. **-fulness,** *s.* क्रीडासक्ति *f.*, लीलापरता, सलीलत्वं, क्रीडाशीलता.

Plea, *s.* कारणोत्तरं, उत्तरं, उत्तरपादः. **2** व्यपदेशः, छद्मन् *n.*, अपदेशः, निमित्तं, कारणं, मोचनहेतुः. **3** वादः, व्यवहारः, कार्यं. **4** प्रार्थना; 'raising a p.' ध्वजीकरणं. **-Plead,** *v.* उत्तरं दा 3 U or प्रतिपद् 4 A or वद् 1 P, निमित्तं दृश् c., वि-,अप-दिश् 6 P; 'p. guilty' अपराधी अस्मीति वद् or प्रतिपद्; 'tears shall p. in vain' अश्रुपातो निर्गुणो भवेत्. **2** विनयेन प्रार्थ् or अभ्यर्थ् 10 A, सविनयं याच् 1 A; 'p. ed for his life' जीवितदानार्थं प्रार्थयामास. **3** उप-क्षिप् 6 P, उपन्यस् 4 U. व्यपदेशार्थं पुरः क्षिप्. **4** (Cause) प्रति-पद् c., परार्थं उत्तरं वद्, परपक्षं समर्थ्; 'p. ing headache as an excuse' शिरःशूलस्पर्शं व्यपदिशन्; 'p. ing illness' अस्वास्थ्यव्याजेन-व्यपदेशेन. **-er,** *s.* अभिभाषकः, उत्तरवादिन् *m.* समर्थकः, हेतुवादिन् *m.* **-ing,** *s.* हेतु-उत्तर-वादः, व्यपदेशनं, हेतूपन्यासः.

Please, *v. t.* प्री 9 P, 10 (प्रीणयति), तृप् c., सं-परि-°, रम् c. (रमयति), प्रसद् c., सुखयति (D.), आ-नंद् c., सं-,तुष् c., प्रसद् c., आह्लाद् c., हृष् c., आराध् c., अनुरंज् c.; oft. by इच्छा, प्रसादः, कृपा; विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया (R. viii. 46) 'if it p. God to do so' &c.; 'he was p. ed to accept my presents' ममोपायनानि स सुप्रीतमनसा-सुप्रसन्नं-स्वीचकार; 'may it p. your ladyship' प्रसीदतु भट्टिनी (M. 4). **2** (Like) *See* below. **-v. i.** 'to be p. ed' तुष् 4 P, तृप् 4 P; रम्-युज् 1 A, नंद् 1 P. **2** अर्ह् 1 P or प्रसद् 1 P, with inf., or simply by Imperative; 'p. sit here' अत्रोपविशत्वार्यः; 'worthy Sir, p. to wait for 2 or 3 days' द्वित्राण्यहान्यर्हसि सोढुमर्हन् (R. v. 25) **3** रुच् 1 A, इष् 6 P; *See* **Like;** 'just as my friend p. s' यदभिरोचते वयस्याय; 'do as you p.' यथाभिलषितं क्रियतां. **-ance,** *s.* क्रीडोद्यान. **-ant,** *a.* सुखकर (री *f.*), मधुर, सुखद-प्रद, सुखावह, रम्य, रमणीय, प्रिय, मनोहर-रम, अभिराम, सुभग, अभिमत, सुख, काम्य, कांत, हर्षावह, रुचिर, हृद्य, हृदयंगम, प्रीति-तुष्टि-कर, मनोज्ञ, मंजुल, चारु; 'a p. joke' हृदयंगमः परिहासः (Mal. 3). **-antly,** *adv.* सुखं, रम्यं, मधुरं, प्रियं, रुचिरं. **-antry,** *s.* परि(री)हासः, नर्मभाषितं, विनोदः, नर्मालापः, विनोद-नर्म-उक्ति *f.* **-ing,** *a.* सुख in comp.; रम्य, कांत; *See* **Pleasant,** 'p to the ear' सुखश्रव, श्रुतिसुख, मंजुलस्वन, सुश्राव्य, 'p. to the eye' नेत्रनीच, नयनाभिराम, सुदृश्य; 'p. language' चाटु *m. n.*, चाटूक्तिः. **-ingly,** *adv.* सुभगं, सुखं, सुख-चारु in comp. **-Pleasure,** *s.* सुखं, सं-परि-तोषः, आनंदः, प्रीति *f.*, सौख्यं, तुष्टि *f.*, प्र-, मोदः, आह्लादः, हर्षः, मुदा. **2** अभि-, रुचि *f.*, इच्छा, अभिलाषः, छंदः-दस् *n.*, कामः; 'at one's p.' स्वेच्छया, कामतः, यथाकामं, यदृच्छया, स्वैरं; 'wandering at p.' कामचारिन्, स्वच्छंदगामिन्; 'sensual p.' भोगः, विषयसुखं, विषयानुरागः; 'sexual p.' रति *f.*, रति-सुखं, सु-,रतं; 'p.-boat' केलि-क्रीडा-नौका; 'p.-ground' आरामः, क्रीडा-केलि-विलास-वनं-काननं, प्रमदवनं, क्रीडोद्यानं; 'p.-mansion' केलिगृहं-भवनं, लीलागारं, विलासमंदिरं. **3** प्रसादः, अनुग्रहः. **-able,** *a.* रम्य, रमणीय, सुखद, सुख; *See* **Pleasant.** **-ist,** *s.* विषयिन् *m.*, विषयासक्तः, भोगासक्तः, भोगपरायणः.

Plebian, *a.* प्राकृत (ती *f.*), सामान्य, साधारण (णी *f.*), अवरवर्ण, अकुलीन. **-s.** प्राकृतः, प्राकृतजनः, पृथग्जनः; नीच-अवरजनः.

Plectrum, *s.* कोणः, शारिका.

Pledge, *s.* न्यासः, निक्षेपः, आधिः, उपनिधिः, उपन्यासः-निक्षेपः, पणः. **2** अभिज्ञानं; 'p. of love' प्रीत्यभिज्ञानं. **3** प्रतिज्ञा, क्षणः, परिपणः-णनं; 'I have given a p.' विहित-प्रतिज्ञः-गृहीतक्षणः-अहं. **4** प्रतिभूः, लग्नकः, बंधकः. **-v. i.** न्यस् 4 U, निक्षिप् 6 P, आ-नि-धा 3 U, परि-,पण् 1 A, आधी-न्यासी-कृ 8 U. **2** (One's word) प्रति-श्रु 5 P, प्रति-ज्ञा 9 A. (with dat. of person), उरीकृ, वचनेन बंध् 9 P; ex. by (*s.*); अस्मत्सौदामिनीसमक्षमनयोर्वृत्तेयं प्रतिज्ञा (Mal. 1) 'they two p. ed their word' &c.; 'he has p. ed his virtue (honor) that he would not harm you' तव विरूपकरणे तेन सुकृतमंतरे धृतं (P. iv. 1); 'he who has p. ed his word' कृत-विहित-प्रतिज्ञः, प्रतिज्ञा-वचन-बद्धः, दत्तवचनः-प्रतिज्ञः, गृहीतक्षणः.

Pledget, *s.* पट्टः, आवेष्टनं.

Pleiades, *s.* कृत्तिकाः.

Plenary, *a.* सं-परि-पूर्ण, समग्र.

Plenipotent, *a.* पूर्णशक्तियुक्त. **-Plenipotence,** *s.* पूर्णसामर्थ्यं शक्ति *f.* **Plenipotentiary,** *s.* पूर्णशक्तियुक्तः, महादूतः.

Plenish, *v. t.* उपस्कृ 8 U, परि-छद् 10.

Plenist, *s.* पूर्णतावादिन् *m.*

Plenitude, *s.* पूर्णता, प्राचुर्यं, वैपुल्यं, समृद्धि *f.*, अतिरेकः, उत्सेकः, परा कोटिः-काष्ठा.

Plenty, *s.* बाहुल्यं, प्राचुर्यं, वैपुल्यं, बहुत्वं, समृद्धि *f.*, उद्रेकः, अतिरेकः, उत्सेकः, स्फीति-वृद्धि- *f.* **-Plenteous, Plentiful,** *a.* प्रभूत, प्रचुर, विपुल, बहु, बहुल, भूरि, भूयिष्ठ, पुष्कल, समृद्ध, सं-परि-पूर्ण, उद्रिक्त, स्फीत, उत्सिक्त, उपचित. **-ly,** *adv.* बाहुल्येन, बहुशः, भूयिष्ठं, भूरि, प्रभूतं, विपुलं, अतिरिक्तं. **-ness,** *s.* बाहुल्यं, प्राचुर्यं; *See* (*s.*).

Pleonasm, *s.* अधिकपददोषः; शब्दाधिक्यं, शब्दातिशयः. **-Pleonastic,** *a.* अधिकशब्द, बहुपद.

Plethora, *s.* रक्तपित्तं. **2** बाहुल्यं, प्राचुर्यं, अतिवृद्धि *f.* **-Plethoric,** *a.* रक्तपित्तरोगिन्.

Pleurisy, पार्श्वशूलं.

Plexus, *s.* नाडी-शिरा-जालं.

Pliant, Pliable, *a.* आ-,नम्य, सुखनम्य, मृदु, शिथिल, अदृढ, आयम्य.

Pliers, *s.* *See* **'Pincers.'**

Plight, *s.* दशा, अवस्था, स्थिति *f.*, भावः, वृत्ति *f.*, गति *f.*; 'sorry p.' दुर्दशा, दुर्गतिः. **2 Pledge.** q. v. **-v. t.** प्रति-ज्ञा 9 A, न्यस् 4 U; *See* **Pledge.** **-ed,** *a.* प्रतिज्ञात, न्यस्त; 'p. word' विहितप्रतिज्ञा, संगरः, अभिसंधिः.

Plinth, *s.* स्तंभमूलं-तलं, प्राकारमूलं.

Plod, *v. i.* अविरतं श्रम् 4 P or आयासं कृ 8 U, मंदं मंदं आयस् 1, 4 P. **-der,** *s.* मंदं मंदं निरंतरायासिन् *m.*, नित्योद्योगिन्, *m.* पिपीलिकाधर्मिन् *m.* **-ding,** *s.* अतिमांद्येन निरंतरश्रमः-नित्यायासः.

Plot, *s.* भू-भागः-प्रदेशः, क्षेत्रं, स्थलं-ली, भू-भूमि- *f.* **2** कपटप्रबंधः, कूटप्रबंधः, कपटोपायः, मंत्रणा, कु-संकल्पः-मंत्रणा-कल्पना, कूटोपायः, उपजापः; (generally) उपायः, संकल्पः, प्रयोगः. **3** कथा, वस्तु *n.*; 'arrangement of p.' वस्तुरचना-विन्यासः; 'the p. of which is composed by Kalidasa' कालिदासग्रथितवस्तु नाटकं (S. 1.) **-v. i.** कपटप्रबंधान् चिंत् 10 or युज् 10, उपायान् क्लृप् c. or निरूप् 10 or अनुसं-धा 3 U; 'p. against' द्रुह् 4 P (with dat.), अभिद्रुह् (with acc.); 'p. against one's life' जीवितापहरणाय कपटप्रबंधान्रचयंति. **-ter,** *s.* कुमंत्रणाकृत् *m.*, अभिद्रोग्धृ *m.*

Plough, *s.* हलं, लांगलं, सी(शी)रः, हालः, गोदारणं; 'body of a p.' निसीशं-षं; कुटकं, फालः, कृषकः; 'pole of a p.' ईषा-शा, (लांगलीषा), लागलदंडः; 'handle of a p.' ईषादंडः; 'furrow made by a p.' सीता, लांगलपद्धति *f.*; 'p.-boy' बालकर्षकः; 'p.-gear' हलसज्जा-उपकरणं; 'p.-land' सीत्यं, हल्यं, फालकृष्टं, हल्यक्षेत्रं; 'p.-man' हालिकः, लांगलिन् *m.*, हलिन् *m.* लांगलिकः, सैरिकः, हलधरः-भृत् *m.* कृषकः, कर्षकः; 'p.-share' कुशी, फालः, कृषकः. **-v. t.** कृष् 1 P, 6 U, भिद् 7 P, विदृ 9 P or c., उत्कष् 1 P, (सद्यः सीरोत्कर्षणमुदधि Me. 16). **-v. i.** हलं वह् c. or चल् c. **-ed,** *a.* कृष्ट, हल्य, सीत्य; 'twice, thrice, p.' द्वि-त्रि-हल्य; 'p. after sowing' बीजाकृत, उप्तकृष्ट. **-er,** *s.* कर्षकः, हालिकः. **-ing,** *s.* कर्षणं, उत्कर्षणं, भूमिदारणं.

Pluck, *v. t.* (Off) लू 9 U, निष्कृष् 1 P; 'crows with feathers p. ed off' लूनपक्षाः काकाः; (out) उत्पद् 10, सं-,उद्ध 1 P, निर्हृ; (hair) लुंच् 1 P, अव-उत्-°, उत्पद् c.; (up) उन्मूल् 10, उत्-खन् 1 P, उच्छिद् 7 P, उत्पद्, उद्धृ, कृष्. **2** (Gather) चि 5 U, अव-सं-°, लू, छिद्, आ-दा 3 A, ग्रह् 9 U. **-s.** सत्त्वं, वीर्यं, पौरुषं, उत्साहः; *See* **Courage.** **-ing,** *s.* उत्पाटनं, उद्धरणं, उल्लुंचनं, अव-,चयः.

Plug, *s.* रोधनी, स्तंभनी. **-v. t.** पि-धा 3 U, स्तंभ् 9 P.

Plum, *a.* कर्कंधूः,-फलं; *See* **Jujube.**

Plumage, *s.* पक्षाः (pl.), पिच्छकलापः, बर्हभारः, पक्षः, पर्णं, पतत्रं, गरुत् *n.*

Plumb, *s.* लंबः,-सूत्रं. **-a.** लंब, ऋजु, लंबरूप. **-v. t.** सूत्रेण समायुज् 7 U, 10. **2** वेधं परि-मा 3 A, 2 P. **-er,** *s.* सीसकारः.

Plume, *s.* पक्षः, पर्णं, पिच्छं; *See* **Feather. 2** शिखा, चूडा, शेखरः. **-v.** *t.* पर्णानि रच् 10. **2** पक्षान् निर्हृ 1 P or उत्पद् 10. **3** (Oneself upon) आत्मानं श्लाघ् 1 A, विकत्थ् 1 A; 'p. s himself upon his learning' ज्ञानेन आत्मानं अतीव श्लाघते-विकत्थते, पंडितंमन्यः, पंडितमानी. **-less,** *a.* पक्षहीन. **-ous, -ose, -y, Plumigerous,** *a.* सपक्ष, पक्षवत्, पक्षनिर्हित.

Plummet, *s.* लंबः, लंबसूत्रं, लंबसीसकं, सीसकसूत्रं.

Plump, *a.* पीन, पीवर, पुष्ट, स्थूल, उच्छून, आप्यायित, स्फीत, *See* **Fat.** **-***adv.* अकस्मात्. **-***v. t.* आप्यै c., श्वि c., स्फाय् c. (स्फावयति). **-ly,** *adv.* स्पष्टं, स्पष्टं. **-ness,** *s.* पीनता, पुष्टि *f.*, स्फीति *f.*

Plunder, *v. t.* (धनादि) अप-हृ 1 P, मुष् 9 P, चुर् 10, वि-,लुंट्-ट् 1 P, 10. **-***s.* विलुंठनं, लोत्रं, लोप्त्रं, अपहारः, अपहृतं धनं. **-er,** *s.* अपहारकः, विलुंठकः; मोषकः. **-ing,** *s.* अपहारः, अपहरणं, मोषणं.

Plunge, *v. i.* मस्ज् 6 P, नि-अव-°, आप्लु 1 A, गाह् 1 A, वि-अव-°, प्रविश् 6 P. **-***v. t.* Causal of roots above. **-***s.* अवगाहः-हनं, नि-,मज्जनं, आप्लवः, प्रवेशः. **-ed,** *a.* मग्न, अवगाढ, आप्लुत, लीन, प्र-नि-विष्ट.

Plungeon, *s.* प्लवः, प्लाविन् *m.*

Plural, *a.* (Number) बहुवचनं. **2** अनेक, बहु. **-ity,** *s.* बहुत्वं, अनेकता, *ex. by* 'Many' *q. v.*

Plus, *s.* धनं; सहित, संकलित in comp.

Pluto, *s.* यमः, कालः, कृतांतः.

Plutocracy, *s.* धनवत्सत्तात्मकं राज्यं. **-Plutocrat,** *s.* धनवत्-सत्तावत् *m.* **-शासितृ** *m.*

Pluvial, Pluvious, *a.* वृष्टिमत्, प्रचुर-बहु-वृष्टि.

Ply, *v. t.* पत् c., धा 3 U, न्यस् 4 U, प्रयुज् 7 A, 10; पुनः पुनः प्रयुज् or व्याप् c., सततं व्याप् c.; 'p. thy work' कार्यव्यापृतो भव, कार्यं निर्वाहय; 'p. thy needle' सूच्या कार्यं प्रवर्तय. **2** (प्रयत्नेन) चल् c., संचर्-लू c. **3** आग्रहेण उप-स्था 1 U, अनुनिर्बंध् 9 P; *See* **Importune;** 'p. with entreaties' अतिप्रार्थनया उद्विज् c. **-***v. i.* अविरतं व्याप् 6 A or प्रवह् 1 A or उत्पद् 1 A or चेष्ट् 1 A. **-***s.* पुटः, भंगः; *See* **Fold.**

Pneumatic, *a.* वायुरूप, वायुमय (ची *f.*), वायव (ची *f.*), वायु in comp. **-***s.* (P. s) वायुविद्या-शास्त्रं.

Pneumonia, *s.* क्लोमपाकः.

Poach, *v. t.* ईषत् पच् 1 P. **2** (Game) कूटोपायेन ग्रह् 9 U or अपह् 1 P o चुर् 10. **3** ग्रहणार्थं अनुसृ 1 P or अनुगम् 1 P; *See* **Pursue. -er,** *s.* मृगयाचौरः, जांगलचौरः. **-ing,** *s.* मृगया-जांगल-चौर्यं, पक्षिग्रहणं.

Pock, *s. See* **Pimple. -mark,** *s.* मसूरिकाक्षत-चिन्हं.

Pocket, *s.* कोषः, आधारः. **-***v. t.* कोषे नि-धा 3 U, (छलेन) आत्मसात्कृ 8 U. **2** (Insult) सह् 1 A; *See* **Bear. -ed,** *a.* कोषस्थ, कोषांतर्गत, अंतर्हित.

Pod, *s.* बीजकोशः-शमि *f.*, शिंबा, शिंबि-बी *f.*, शिंबिका.

Podagrical, *a.* वातकिन्, वातरोगिन्.

Poet, *s.* कविः, सूरिः; 'already p.' शीघ्र-कविः. **-ic, -ical,** *a.* Ex. by कविता-काव्य in comp.; 'p. genius' काव्यित्वशक्तिः. **2** श्लोक-कविता-रूप-बद्ध, पद्यमय (यी *f.*), छंदोबद्ध-रूप, पद्यात्मक; 'p. work' पद्यात्मको ग्रंथः. **-ically,** *adv.* पद्यरूपेण, छंदोरूपेण. **-Poetics,** *s.* काव्यशास्त्रं, पद्यशास्त्रं; साहित्यं. **-Poetry,** *s.* काव्यं, कविता. **2** पद्यं (opp. of prose). **3** काव्यरचना, कवित्वं, कविताविद्या. **-Poetaster,** *s.* कुकविः, कविदेहृयः. **-Poem,** *s.* काव्यं, काव्यप्रबंधः, काव्यबंधः, कविता; 'a p. interspersed with prose' खंडकाव्यं. **-Poesy,** कवित्वं-ता. **2** काव्यरचना, कविताशक्ति *f.*

Poignant, *a.* उग्र, तीक्ष्ण, तीव्र, तिग्म, अर्कतुद, मर्मस्पृश्-भिद्. **-Poignancy,** *s.* तीक्ष्णता, तीव्रता.

Point, *s.* अग्रं, आणिः-णी *f.*, धारा, कोटि *f.*, अश्रि *f.*, पालि-ली *f.*; शिखा, शिखरं. **2** (Of land) उद्ग्रस्थलं, भूनासिका. **3** मर्मन् *n.*, रहस्यं, रसः. **4** दिश्-शा, ककुभ्, आशा, हरित्, काष्ठा, (all *f.*). **5** बिंदुः, चिह्नं, अंकः. **6** आशयः, अभिप्रायः, उद्देशः, अर्थः, लक्ष्यं. **7** पर्यंतः, अंतः; अवधिः, परिमाणं. **8** विषयः, पदं, वस्तु *n.*, अर्थः, स्थानं, स्थलं, आस्पदं, प्रकरणं, प्रस्तावः; 'p. at issue' विवादवस्तु-विषयः. **9** लक्षणं, विशेषचिह्नं, विशेषणं, विशिष्टगुणः. **10** मर्मगः, कालः, समयः; 'being to the p.' प्रास्ताविक (की *f.*), प्रकृत, प्रस्तुत; 'to such a p.' एतावत्, एतावत्पर्यंतं; 'come to the p.' प्रस्तुतमनुसंधीयतां; 'on the p. of' *ex. by* उन्मुख (खी *f.*), उद्युक्त, उद्यत, *by desid. or by fut. part.*, आसन्न *in comp.*; 'on the p. of death' मरणोन्मुख, आसन्नमृत्यु, मुमूर्षु; 'on the p. of departing' निर्गंतुमुद्यत, निर्जिगमिषु; 'on the p. of delivery' प्रसवोन्मुखी, आसन्नप्रसवा; 'gain a p.' अभीष्टं साध् 5 P; 'p. of view' दृष्टि *f.*; *See* under **View. -***v.* नि-शो 4 P; तिज् c., तीक्ष्णीकृ 8 U. **2** उद्दिश् 6 P, सं-धा 3 U, लक्षीकृ, अभि-प्रेष् c.; 'p. ing to it' तदुद्दिश्य, तदधिकृत्य. **3** (Out) प्र-उप-आ-दिश् (as a way); (at) अंगुल्या निर्दिश् or आ-ख्या 2 P, (मार्गमंगुलीदलाविलासेनाख्यातव्यः Mal 1); 'p. ing towards the north' उदङ्मुख, उत्तराभिमुख; 'p. blank' स्पष्ट, असंदिग्ध. **-ed,** *a.* नि-,शित, तीक्ष्णाग्र, साग्र, सधार; oft. *by* सूचि *f.*; 'pricked by the p. Kusa grass' कुशसूचिविद्धे (S. 4); *See* **Sharp. 2** मार्मिक (की *f.*), अरुतुद, मर्मस्पृश्-भिद्; सरस, रसिक, रसपूर्ण. **-ing,** *s.* निर्देशः, सूचनं, अंगुलिनिर्देशः. **-less,** *a.* धाराहीन, अनिशित, अतीक्ष्ण, निरग्र. **2** रसहीन, अरसिक, फल्गु. **3** अप्रकृत, अप्रस्तुत.

Poise, *v. t.* तुल् 10, तुल्यी-समीकृ 8 U, समभारीकृ. **-***s.* भारः, तोलः. **2** भारतुल्यता-साम्यं, समभारता, समतोलः, तुल्यता.

Recover, *v. i.* आरोग्यं लभ् 1 A, रोगाद् विमुच् pass.: oft. by निर्, वि, गत in comp.; निर्विषः गोतमः (M. 4.) 'has r. ed from (the effects of) poison'; प्रकृतिं आपद् 4 A, सुस्थ-प्रकृतिस्थ-*a.* भू 1 P, रोगमुक्त-निरामय-*a.* भू; पूर्वस्थितिं प्राप् 5 P. **2** (From fainting) संज्ञां-चेतनां-लभ्; *See* below. **-v. t** (पुनः) लभ्, प्राप्, विद् 6 U, प्रति -पद्, प्रत्यवाप्, प्रत्यादा 3 A, प्रतिग्रह् 9 P, प्रत्याहृ 1 P, प्रत्युद्धृ 1 P; 'r. consciousness' संज्ञां-चेतनां-लभ् or प्राप्, प्रकृतिं-संज्ञां प्रति-आ-पद्, प्रकृतिस्थ-*a.* भू. **2** रोगं हृ or नश् c. or साध् c. or शम् c., नीरुज-स्वस्थ-*a.* कृ 8 U; *See* **Cure;** 'she r. ed him from poison' सा तं निर्विषं चकार. **-ed,** *a.* प्रतिलब्ध, प्रत्याहृत, पुनर्गृहीत, &c. **2** (From sickness) गत-नष्ट-शांत-रोग, नीरोग, निरामय, रोगमुक्त, स्वस्थ, प्रकृतिस्थ, उत्थित; oft. by मुक्त, गत, in comp.; 'r. from fever' ज्वरमुक्त; 'r. from swooning' नष्ट-गत-मोह; 'r. from poison' निर्विष, &c. **3** (From fainting) लब्ध-संज्ञ-चेतन, प्रकृतिनापन्न, प्रकृतिस्थ, चेतनापन्न. **-y,** *s.* पुनर्लाभः, पुनःप्राप्ति *f.*, पुनरादानं, प्रतिपत्ति *f.*, अधिगमनं, प्रत्युद्धारः. **2** स्वास्थ्यलाभः, आरोग्यप्राप्तिः, प्रकृतिलाभः, स्वास्थ्यं, निरामयत्वं, आरोग्यं, रोगमुक्ति *f.*

Recreant, *a.* धर्मभ्रष्ट, त्यक्त-लंघित-स्वधर्म, पतित. **2** कातर, भीरु, क्लीब; *See* **Coward.**

Recreate, *v. t.* (Oneself) विश्रम् 4 P, विहृ 1 P, रम् 1 A, क्रीड् 1 P. **2** आ-समा-प्रत्या-श्वस् c., आनंद् c., विनुद् c., रम् c. (रमयति), सं-परि-तुष् c.; *See* **Please, Refresh. -ion,** *s.* विश्रामः, विनोदः-दनं, विहारः, विहरणं, क्रीडा, कौतुकं, मनोरंजनं. **-ive,** *a.* सुखकर (री *f.*), मनोरंजन (नी *f.*), विनोदशील.

Recrement, *s.* *See* **Dross.**

Recriminate, *v.* प्रत्यभियुज् 7 A, 10, प्रत्यभिशंस् 1 P. **-ion,** *s.* प्रत्यभियोगः, प्रत्यारोपः; 'crimination and r.' परस्परदोषारोपः. **-ive,-ory,** *a.* प्रत्यभियोगिन्.

Recrudescence, *s.* पुनः प्रसर्पण or उद्भवः. **-Recrudescent,** *a.* पुनः प्रसर्पिन्.

Recruit, *v. t.* शक्तिं वृध् c., प्रबलीकृ 8 U, आश्वस् c., आप्यै c., समा-प्रतिसमा-धा 3 U, सुस्थ-*a.* कृ; 'to r. the strength of' वाजीकृ. **2** नवसैनिकैः पूर् 10. **-v. i.** 'r. one's strength' बलं-सत्त्वं लभ् 1 A, स्वतेजः-वीर्यं प्राप् 5 P, सुस्थ-*a.* भू. **-s.** नूतन-नव-सैनिकः. **-ed,** *a.* लब्ध-प्राप्त-बल, वर्धित-सत्त्व, आप्यायित, प्रत्याश्वस्त. **2** नवसैनिक-युक्त-पूर्ण.

Rectangle, *s.* समकोणः, समचतुरस्रं. **-Rectangular,** *a.* समकोण, समचतुरस्र.

Rectify, *v. t.* समा-प्रतिसमा-धा 3 U, शुध् c. **-ication,** *s.* समाधानं, शोधनं.

Rectilineal, *a.* सरलरेखाविशिष्ट.

Rectitude, *s.* सारल्यं, आर्जवं, दाक्षिण्यं, न्यायिता, शौचं, सत्यशीलता, सद्वर्तनं, सदाचारः; 'path of r.' सन्मार्गः, सुपथः, नीतिमार्गः-पथः; 'deviation from the path of r.' सत्पथत्यागः-भ्रंशः, उत्पथगमनं.

Rector, *s.* नायकः, अध्यक्षः. **2** ग्रामाचार्यः.

Recumbent, *a.* पार्श्वशय, अर्धकायेन शयान, कुक्षिशय, संविष्ट.

Recuperate, *v. t.* पुनर् लभ् 1 A.

Recur, *v. i.* प्रति-,आ-वृत् 1 A, पुनर् आगम् 1 P, or आपत् 1 P or सं-पद् 4 A or सं-भू 1 P or षद् 1 A or उप-स्था 1 P; (to the mind) आविः-प्रादुः-भू, उद्-इ 2 P, स्फुर् 6 P, स्फृ pass. **2** शरणं गम् or प्रपद्. **-rence, -rency,** *s.* प्रत्यावृत्ति *f.*, पुनर्वर्तनं, पुनर्घटनं-आपातः-उपस्थानं-संभवः. **2** स्मरणं, स्फुरणं, प्रादुर्भावः, उदयः. **-rent, -ring,** *a.* आवर्तक, प्रत्यावर्तिन्.

Recusant, *a.* प्रतीप; *See* **Obstinate.**

Red, *a.* रक्त, लोहित, शोण (blood-r.), रक्त-लोहित-वर्ण, अरुण (dark r.), कषाय, शोणित, 'r.-hot' उत्तप्त, ज्वलत्, अभि-सं-तप्त, अग्निवर्ण; 'r.-lead' सिंदूरं; *See* under **Lead. -s.** (R. colour) रक्तवर्णः, अरुणिमन् *m.*, लोहितः, रक्तः. **-den,** *v. t.* लोहितीकृ 8 U, रक्तीकृ &c. **-v. i.** रक्तीभू 1 P, लोहितायते (D.). **-dish,** *a.* आरक्त-लोहित, ईषद्रक्त, &c. **-ness,** *s.* रक्तत्वं, लौहित्यं, रक्तिमा, अरुणिमा.

Redact, *v. t.* *See* **Edit. -ion,** *s.* *See* **Edition** (1)

Redeem, *v. t.* अव-हृ 1P, निष्क्री 9 U, परिक्री 9 A, धनं दत्त्वा मोक्ष् 10; मुच् c., मोक्ष, वि-निर्-°, प्रत्या-दा 3 A, उप-नी 1 U; 'a pledge to be r. ed at a fixed time' कृतकालोपनेयः आधिः (V. M. 66). **2** परि-,त्र 1 A, उद्-धृ 1 P, 10, निस्तृ c. **3** पूर् 10, प्रतिकृ 8 U; *See* **Atone for;** 'he has this r.-ing virtue in him' अयं तस्य गुणोऽन्यान्दोषान् प्रमार्ष्टि-लोपयति **-er,** *s.* परिक्रेतृ *m.*, निष्क्रयिन् *m.* **2** त्रातृ *m.*, मोक्षकः, उद्धर्तृ *m.*, तारकः. **-Redemption,** *s.* निष्क्रयः, परिक्रयः-यणं. **2** परि-,त्राणं, उद्धारः, मोक्षः-क्षणं, मुक्ति *f.*, तारणं.

Redolent, *a.* सुगंधि, सपरिमल, सुरभि; *See* **Fragrant;** 'to make r.' वास् 10, सुरभीकृ 8 U.

Redouble, *v. t.* द्विगुणीकृ 8 U, पुनः पुनः कृ; अविरतोद्यमेन वृध् c. **-ed,** *a.* विवृद्ध, द्विगुणित, पुनः पुनः कृत.

Redoubt, *s.* दुर्गरचना. **-able,** *a.* भीम, विक्रांत, महापराक्रम, महाप्रताप, उरुविक्रम.

Redound, *v. i.* साध् c., आवह् 1 P, सं-पद् c.; कल्प् 1 A, सं-गद् 4 A (with dat.) भू with dat.; 'will r.' to thy glory' तव यशसे भवेत्-कल्पेत &c. **2** अव-सो 4 P; परिणम् 1 P; oft. ex. by अंतः, परिणामः. **3 Overflow,** q. v.

Redress, *v. t.* प्रतिकृ 8 U, निराकृ, समा-धा 3 U; उद्धृ 1 P, मुच् c. (persons); 'r. one's grievances' दुःखाद्-मुच् c. or उद्धृ. **-s.** प्रति(ती)कारः, प्रतिक्रिया, समाधानं, उद्धारः.

Reduce, *v. t.* पूर्वस्थितिं नी 1 P, प्रत्यादिश् 6 P. **2** (Bring to a state) ex. by नी, गम् c., कृ 8 U or सात्कृ; 'r. to subjection' आत्मवशं नी, वशीकृ; 'r. to ashes' भस्मसात्कृ, भस्मीकृ, भस्मावशेषं नी or कृ; 'r. to a wretched state' दीनावस्थां नी; 'r. ed to a skeleton of bones' अस्थिमात्रावशिष्ट, कंकालशेष; 'who has r. ed kings to the state of tributaries' करदीकृतभूपालः. **3** न्यूनीकृ, अल्पीकृ, ऱ्हस् c., लघयति (D.), लघूकृ; वि-प्र-कृष् 1 P, (विप्रकर्षत्यलक्ष्मीं U. 5); अपकृष्; 'r. in price' अर्घतः पत् c.; 'r. the strength' बलं शिथिलीकृ or अपचि 5 U or क्षि 1, 5 P. **4** (Person) कृशीकृ, क्षीणीकृ, क्षै-क्षि c. (क्षपयति), शक्तिं अप-चि or अवसद् c. **5** वशीकृ, जि 1 P, पराजि 1 A, स्ववशं नी. **6** (In Math.) रूपं दा 3 U, रूपेण कथ् 10; 'r. to a system' व्यव-स्था c., क्रमेण विन्यस् 4 U or विरच् 10. **-ed,** *a.* पूर्ववद्भूत, कृत, भूत, गमित, आपन्न, गत; 'r. to misery' कृच्छ्रगत, कृच्छ्रापन्न, कष्टापन्न; 'r. to ashes' भस्मीकृत, भस्मीभूत. **2** वशीकृत, न्यूनीकृत, क्षीणबल &c.; 'you appear to be much r.' अतीव क्षामः-कृशगात्रः-दृश्यसे; अपचितं गात्रं (S. 2) 'a body r. in bulk,' 'r. in strength' क्षीणबल, शिथिलबल, क्षीण, कृश **-Reduction,** *s.* करणं, नयनं, गमनं, &c. **2** ऱ्हासः, अप-विप्रकर्षः, अपचयः, न्यूनीकरणं, न्यूनता, शैथिल्यं. **3** पराजयः, वशीकरणं, पराभवः.

Redundant, *a.* अतिरिक्त, समधिक उद्रिक्त, उत्सिक्त, अत्यंत; व्यर्थ, पुनरुक्तभूत, अतिशय in comp. **-ly,** *adv.* सातिशयं, उद्रिक्तं. **-Redundancy,** *s.* आधिक्यं, अतिरेकः, उत्सेकः, उद्वर्तः, पौनरुक्त्यं, व्यर्थता; *See* **Excess, -ive.**

Reduplicate, *v. t.* द्विगुणीकृ 8 U. **2** (In grammar) अभ्यस् 4 P (syllable); आम्रेडयति (D.) (word). **-ion,** *s.* अभ्यासः, आम्रेडितं, आम्रेडनं, द्विरुक्ति *f.*,

Reed, *s.* नडः-लः, धमनः, पोटगलः; वेतसः, वेत्रं, वेणुः, वंशः; 'r. for writing', 'r.-pen' कलमः. **-y,** *a.* नड्वल, नल-वेत्र-मय (यी *f.*), वेतसपूर्ण.

Reef, *s.* शिलासंघातः, शिलोच्चयः-श्रेणी, शैलसेतुः. **-v. t.** संहृ 1 P; *See* **Contract.**

Reek, *v. i.* बाष्पं उद्-गॄ 6 P or उद्गम् c. or उद्वम् 1 P or उत्क्षिप् 6 P, बाष्पायते (D.). **-s.** बाष्पः, धूमिका. **-ing,-y,** *a.* बाष्पोद्गारिन्, बाष्पमय (यी *f.*).

Reel, *v. i.* प्र-,स्खल्, 1 P, पार्श्वे पत् 1 P, सं-वि-चल् 1P.-*s.* स्खलनं,विचलनं. **2** आवापनं.

Refection, *s.* अल्प or लघु-आहारः or भोजनं, उपाहारः. **-Refectory,** *s.* उपाहारशाला.

Refer, *v. i.* उद्दिश् 6 P, अधिकृ 8 U, लक्षीकृ; *See* **Allude, Advert;** आश्रि 1 U, अपेक्ष् 1 A, संबंध्-अनुषंग्-pass.; 'it does not r. to me' न मत्संबद्धं तत्; oft. by विषय, पर, in comp.: ब्रह्मविषयाणि वाक्यांतराणि (S. B. 114). 'r. ing to Brahman': संदिह्यमानानि वाक्यानि ब्रह्मपरतया निर्णीतानि (S. B. 166) 'have been proved to r. to Brahman.' -*v. t.* Ex. by दृश् 1 P, निरूप् 10, प्रच्छ् 6 P, ऋ c. (अर्पयति), प्रति-पद् c.; निर्दिश् 6 P; 'I r. you to the sage about it' तद्विषये मुनिमेव पृच्छ; 'r. the word to the dictionary' कोशे तं शब्दं निरूपय; 'the matter must be r.-ed to the judge for opinion' अयमर्थः अभिप्रायार्थं प्राड्-विवाकाय निवेदनीयः-प्रतिपादनीयः-निर्देष्टव्यः. **2** आरुह् c.; आसंज् c.; संबंध् 9 P. **-ee,** *s.* प्रमाणपुरुषः, मध्यस्थः, निर्णेतृ *m.* **-ence,** *s.* अर्पणं, निवेदनं, निर्देशः &c. **2** उद्देशः, संबंधः, अनुषंगः, अपेक्षा, आश्रयः, विषयः, संपर्कः, अन्वयः, अनुसंधानं, 'a r. is here made to a mythological story' अत्र पुरावृत्तकथा अनुसंधेया (Mallinatha on K. I. 21); oft. ex. by आलोकनं, आलोचनं, 'on a r. to the book again' पुनः पुस्तकं आलोक्य &c.; भवन्निर्दिष्टस्थलं पुनरालोच्य &c.; 'in or with r. to' अधिकृत्य, उद्दिश्य, आश्रित्य, अपेक्ष्य, अपेक्षया-संबंधेन-विषये in comp.

Refine, *v. t.* वि-,शुध् c., विमलीकृ 8 U, प्र-,मृज् 2 P. **2** संस्कृ,परिष्कृ, उपस्कृ, विनी 1U. -*v. i.* शुध् 4 P, विमली भू 1P. **-ed,** *a.* वि-,शुद्ध,शोधित,हृतमल;'r. gold' प्रमृष्ट-संस्कार-शुद्धं-हेम. **2** संस्कृत, संस्कारवत्, परिष्कृत, प्रबुद्ध; विनीत, शिष्ट, सभ्य. **3** अति-,सूक्ष्म. **-ment,** *s.* शोधनं, वि-,शुद्धि *f.*, शुद्धता, प्रमार्जनं. **2** संस्कारः, परिष्कारः, शिष्टता, सौजन्यं, चित्तप्रबोधः, शुद्धिः; 'r. of manners' विनयः, आचारसौजन्यं, सभ्याचारत्वं; 'a man of r.' शिष्टाचारः, विनीतः. **3** अति-,सूक्ष्मता. **-er,** *s.* सं-,शोधकः, शोधयितृ *m.*, मलहारिन् *m.*

Refit, *v. t.* *See* **Repair.**

Reflect, *v. i.* चिंत् 10, ध्यै 1 P, विचर् c., विगण् 10,भू c.,तर्क् 10,विमृश् 6P,आलोच्-पर्यालोच् 10. **2** (On) आ-अधि-क्षिप् 6 P, निंद् 1 P, अव-ज्ञा 9 U; *See* **Censure.** -*v. t.* प्रतिक्षिप्, परा-प्रत्यावृत् c., प्रतिबिंबयति (D.); 'a lake r. ing stars' तारा-प्रतिबिंबं सरः; 'this action r. s great credit on you' इदं ते चरितं अतीव प्रशस्यं. **-ed,** *a.* प्रतिबिंबित, परावर्तित, संक्रांत, प्रतिफलित; 'to be r.' मुर्च्छ् 1 P, संक्रम् 1 U, 4 P, परावृत् 1 A, प्रतिफल् 1 P; हर्म्येषु मूर्च्छंति न चंद्रपादाः(R. XVI.18); मणिकुट्टिमसंक्रांतप्रतिबिंबतया. (Ka.9.)**-ing,** *a* परावर्तनकारिन्, परावर्तिन्. **2** चिंता-ध्यान-शील, विचारशील. **-ion,** *s.* चिंता; विचारः, विमर्शः, भावना, ध्यानं. **2** आ-अधि-क्षेपः, आक्षारणं. **3** परावर्तनं, प्रतिक्षेपः, संक्रांति *f.* **4** प्रतिबिंबः-बं, प्रतिच्छाया,प्रतिफलं;छाया, प्रतिमा प्रतिमूर्ति *f.* -रूप.-**or,** *s.* आदर्शः,दर्पणः-णं, प्रतिक्षेपकः, परावर्तकः. **2** विचारकः.**-Reflexible,** *a.* परावर्तनीय. **-Reflexive,** *a.* पूर्वसंबंधिन्; 'a r. verb' कर्मकर्तृवाच्यं. **-ly,** *adv.* कर्मकर्तरि.

Refluent, *a.* परावर्तिन्. **-Reflux, Refluence,** *s.* परावर्तः, प्रतिस्पंदः.

Reform, *v. t.* दोषं अपनी 1 P or खंड् 10 or अपाकृ 8 U or निवृत् c.; पापात् निवृत् c. or विरम् c.; दुर्मतिं नश् c., (of persons). **2** शुध् c., परि-वि-सं-°, समा-प्रतिसमा-धा 3 U, प्रतिकृ. **3** पुनः कृ of क्लृप् c. or वि-धा. -*v. i.* पापात् नि-परा-वृत् 1 A or विरम् 1 P, पापमार्गं त्यज् 1 P. -*s.*, **-ation,** *s.* पाप-दोष-निवृत्ति *f.*-त्यागः, दोषच्छेदः- खंडनं-शोधनं-समाधानं; पापप्रतिकारः, संशोधनं, परिवर्तनं, (religious) धर्मपरिवर्तनं क्रांति *f.* **-atory,** *s.* शोधनालयः, **-ed,** *a.* निवृत्त or त्यक्त-पाप or दोष, विरत-हृत-दोष, संशोधित. **-er,** *s.* निवर्तकः, संशोधकः, दोष-पाप-च्छिद् *m.* **2** धर्मप्रवर्तकः.

Refract, *v. t.* परावृत् c., वक्रीकृ 8 U; 'to be r.-ed' वक्रीभू 1 P, परावृत् 1 A.**-ion,** *s.* वक्रीभवनं-करणं, परावर्तनं, वक्रीभावः. **-Refractory,** *a.* विप्रतीप, अविधेय, अविनेय, अवश्य, अनिवार्य, शासनलंघिन्; *See* **Perverse;** 'do not show a r. spirit towards thy husband' भर्तुः प्रतीपं मा स्म गमः (S. 4); 'to be r.' प्रतीपायते (D.). **-iness,** *s.* प्रतीपता, वक्रता, दुःशीलं, वक्रभावः, अविधेयता.

Refragable, *a.* छेद्य, खंडनीय, भेद्य.

Refrain, *v. t.* नि-सं-यम् 1 P, निमद् 9 P, निवृ 5 U or c, संहृ 1 P; *See* **Control.** -*v. i.* निवृत् 1 A, विरम् 1 P, (with abl.); परिहृ 1 P, वि-,वृज् 10, त्यज् 1 P; *See* **Abstain, Cease, Forbear.** -*s.* ध्रुवकः

Refrangible, *a.* परावर्तनीय. [अनुपदं.

Refresh, *v. t.* समा-प्रत्या-आ-श्वस् c., आनंद् c., जीव् c., आ-प्र-ह्लाद् c., सुखयति (D.).

2 नवीकृ 8 U, (एते वयं पुनर्नवीकृताः स्मः S. 5.); श्रमं अपहृ 1 P or छिद् 7 P or अपनी 1 P, विश्रम् c.; बलं-सत्त्वं वृध् c., आप्यै c. **3** निर्वा c. (वापयति), शीतलयति (D.), शीतलीकृ; *See* **Cool.** **-ed,** *a.* हृत or गत-क्लम or श्रम, विश्रांत, आप्यायित, आश्वासित, नवीकृत, छिन्नश्रम. **-ing,** *a.* आह्लादन (नी *f.*), क्लम-श्रम-विनोदिन्, आनंद-सुख-प्रद, श्रम-क्लम-च्छिद्, श्रमापह, क्लांतिहर. **-ment,** *s.* आह्लादनं, श्रम or क्लम-अपहारः or विनोदनं; आश्वासनं, श्रम-क्लांति-च्छेदः, विश्रांति *f.*, विश्रामः. **2** अभ्यवहारः, लघ्वाहारः, उपाहारः; 'morning r.' प्रातराशः, कल्यवर्तः.

Refrigerate, *v. t.* ताप-दाह-हृ 1 P or नश् c. or छिद् 7 P, निर्वा c. (वापयति), शीतलीकृ 8 U; *See* **Cool.** **-ion,** *s.* ताप-दाह-च्छेदः, निर्वापणं. **-Refrigerant,** *a.* निर्वापक, ताप-दाह-हर. -*s.* उष्णनिर्वापणं, तापशमनं.

Refuge, *s.* आश्रयः, संश्रयः, शरणं, गति *f.*; (person) शरण्यः, आश्रयभूतः, पालकः, रक्षकः, त्रातृ *m.* **2** उपायः, प्र-,युक्ति *f.*, गतिः, साधनं; 'giving r.' शरण्यः &c; 'take r. with' शरणं या 2 P or गम् 1 P or प्रपद् 4 A, उपा-आ-सं-श्रि 1 U, अवलंब् 1 A, शरणार्थं गम् &c; 'seeking r.' शरणार्थिन्; 'come for r.' शरणं प्रपन्नः, शरणागतः; 'having only one r.' अनन्यगतिक. **-Refugee,** *s.* शरणं प्रपन्न, शरणागतः, शरणार्थिन् *m.* आश्रितः, अवलंबितः.

Refulgent, *a.* देदीप्यमान, विभ्राजमान, भास्वत्, उज्ज्वल, अतितेजस्विन्, प्रद्योतमान; *See* **Bright.** **-Refulgence,** *s.* अतिप्रभातेजस् *n.*, औज्ज्वल्यं.

Refund, *v. t.* प्रतिदा 3 U, प्रति-ऋ c. (अर्पयति.)

Refuse, *v. t.* प्रत्या-ख्या 2 P, नि-प्रति-षिध् 1 P, प्रत्याचक्ष् 2 A, निराकृ 8 U, प्रत्यादिश् 6 P, निर्-अप-अस् 4 U, वि-प्रति-हन् 2 P, न संमन् 4 A or ग्रह् 9 U or अंगीकृ or प्रतीष् 6 P, अवधीर् 10; 'pray, do not r. my request' नार्हसि मे प्रणयं विहंतुं (R. II. 58). **2** (Followed by inf.) Ex. by a sentence with वच्, वद् &c. (Say, q. v.). -*s.* उच्छिष्टं, अवशिष्टं, अवशेषः, शेषः-षं, असारः, गतं. -*a.* उच्छिष्ट, असार, अवशिष्ट.

Refute, *v. t.* निराकृ 8 U, निरस् 4 U, प्रतिक्षिप् 6 P, खंड् 10, बाध् 1 A, अधरीकृ, प्रत्या-ख्या 2 P, प्रत्यादिश् 6 P, अपवद् 1 U, निर्धू 5, 9 U, 6 P. **-ation,** *s.* निरासः, निरसनं, खंडनं, निराकरणं, प्रतिक्षेपः, प्रत्याख्यानं.

Regain, *v. t.* पुनः लभ् 1 A or प्राप् 5 P, प्रतिपद् 4 P; *See* **Recover.**

Regal, *a.* राजकीय, राजार्ह, राजोचित.

Regale, *v. t.* संतृप् c., संतुष् c., आह्लाद् c., आनंद् c. **2** आश्वस् c., आप्यै c, संवृध् c.; *See* **Refresh,** 'r. oneself' उत्तमान्नेन संतुष् 4 P or संतृप् 4 P or आत्मानं संतुष् c., उत्सवं कृ 8 U.

Regalia, *s.* राजचिह्नानि-लक्षणानि-लिंगानि, राजोपचारः

Regard, *v. t.* आदृ 6 A, प्रति-अव-ईक्ष् 1 A, संमन् c. पूज् 10, नि-,सेव्, 1 A. **2** ईक्ष्, दृश् 1 P, आ-अव-लोक् 1 A, 10, आ-,लक्ष् 10; *See* **Look.** **3** मन् 4 A. वि-,गण् 10. **4** अव-धा 3 U, अवेक्ष्, सावधान-*a.* भू, विगण्, आदृ. **5** सेव्, पा c.(पालयति), अनु-ष्ठा 1 P; *See* **Observe.** **6** उद्दिश् 6 P, अपेक्ष्; संबंध् 9 P. -*s.* आदरः, संमानः, पूजा, अवेक्षा. **2** अवधानं, मनोयोगः, अपेक्षा. **3** दृष्टि *f.*, ईक्षणं; *See* **Look.** **4** स्नेहः, प्रणयः, अनुरागः, प्रीति *f.* **5** विचारः, अवेक्षा, अपेक्षा, अनुसंधानं, गणना, उद्देशः, संबंधः, अन्वयः; विषयः; 'having r. to the result' फलापेक्षया; 'with r. to' उद्दिश्य, अधिकृत्य, अंतरेण, अपेक्ष्य, (with acc.); अपेक्षया, विषये, गत-*a.* in comp.; 'a scandal with r. to Mālavikā' मालविकागतं कौलीनं (M. 3); भर्तृगता-विषयाचिंता &c. **-ful,** *a.* अवे (पे)क्षक, अवहित, सावधान, सापेक्ष. **-fully,** *adv.* सापेक्षं, सावधानं. **-ing,** *a.* सापेक्ष, संबंधिन्, गत-विषय- in comp.; *See* (*s.*). **-less,** *a.* निरपेक्ष, अनपेक्ष, उदासीन, विरक्त, अनुत्सुक, in comp. gen.; oft. by अनादृत्य,अनवेक्ष्य, अगणयित्वा. **-lessly,** *adv.* निरपेक्षं, उपेक्षया. **-lessness,** *s.* अनपेक्षा, उपेक्षा.

Regatta, *s.* नौकाक्रीडा.

Regenerate, *v. t.* पुनर् जन् c. (जनयति) or जीव् c. or उद्-धृ 1 P, 10, or उत्था c (उत्थापयति). -*a.*, **-ed,** *a.* पुनर्जात, पुनर्भव, पुनर्जन्मन्, पुनरुज्जीवित. **-ion,** *s.* पुनरुज्जीवनं, पुनरुत्पत्ति *f.*, पुनर्जन्मन् *n.*; उत्थापनं, उद्धारः.

Regent, *s.* पालः in comp.; शासकः, अधिपतिः, शास्तृ *m.* 'r. s of the eight quarters' अष्ट दिक्पालाः. **2** शून्यपालः; राजप्रतिनिधिः. **-Regency,** *s.* शासनं. **2** राजप्रतिनिधिमंडलं.

Regicide, *s.* राजवधः-हत्या-हिंसा-घातः. **2** (Person) राजहन् *m.*, राजघातकः; राजघः.

Regime, *s.* *See* **Government.**

Regimen, *s.* अन्नपानविधिः, पथ्यापथ्यनियमः. 'one observing r.' पथ्यांशिन्.

Regiment, *s.* सैन्यदलं-गुल्मं-गणः-व्यूहः,

Regimentals, *s.* सैनिकवेषः.

Region, *s.* प्र-,देशः, लोकः, भुवनं; विषयः, राष्ट्रं; चक्रं, मंडलं; (of the sky) दिश् *f.*, काष्ठा, आशा; *See* **Direction;** ' r. of the heart ' हृदयदेशः; नाडीचक्रं &c.

Register, *s.* लेख्यं, लेखः, पत्रिका, पंजिका; गणनापत्रं. *-v. t.* पत्रिकायां लिख् 6 P or निविश् c. **-Registrar,** *s.* लेखकः, पंजिकाधिकृतः. **-Registry. Registration,** *s.* नामलिखनं, पत्रिकायां निवेशनं or आरोपणं. **2** लिखनस्थानं.

Regnant, *a.* शासक, अधिकारिन्, राज्याधिकारिन्.

Regorge, *v. t.* उद्वम् 1 P, उद्-गृ 6 P, निः सृ c.

Regress, *s.* प्रतीपगांतं *f*, परावर्तनं. *-v. i.* परावृत् 1 A, प्रत्यावृत्. **-ion,** *s.* प्रतीपगमनं, प्रत्यावर्तनं.

Regret, *v. t.* अनुशुच् 1 P, अनुतप् 4 A: *See* **Lament;** ' he died r. ed by all ' मृतः सर्वैरनुशोचितश्च; न वाप्यनुशोचिता (U. 3) ' nor was she (her absence) r. ed.' oft. ex. by दुःखित *a.* or दुःखं ' I r. I cannot go with you ' त्वया सह गंतुमसमर्थोस्मीति दुःखितोहं. **2** Repent, q. v. *-s.* दुःखं, अनुशोकः, अनुतापः, खेदः, मनस्तापः, उद्वेगः; *See* **Grief. -ful,** *a.* दुःखित, दुःखाकुल, अनुतप्त, अनुशोकार्त, उद्विग्न, खिन्न, सोत्कंठ.

Regular, *a.* नियत, नियमानुसारिन्, नैगमिक-वैधिक-(की *f.*), विध्यनुरूप, सूत्र-विधि-अनुसारिन्; ' not at r. hours ' अनियतवेलं (S. 2). **2** अनुपूर्व, अनुक्रमागत, यथाक्रम, क्रमानुगत, अनुलोम, क्रमानुसारिन्. **3** नियतकालिक (की *f.*) नियतवेल. **4** व्य-(व्या)वहारिक-आचारिक-(की *f.*), नित्य, यथामार्ग, यथारीति. **4** (Of persons) नियमानुसारिन्, नियमनिष्ठ-पर-शील, विधि-नियम-अनुवर्तिन्; व्यवस्थित, अत्यक्तक्रम, अव्यभिचारिन्, नियतवृत्ति. **-ity,** *s.* नियतत्वं, विध्यनुसारः, नियमः, सूत्रानुसारः, नैयमिकत्वं. **2** पर्यायः, अनुक्रमः, परिपाटी *f.*, व्यवस्था, परंपरा, आनुपूर्व्यं, आनुलोम्यं; *See* **Order. 3** विधि-नियम-निष्ठा, नियमानुसारित्वं, विध्यनुवर्तनं, क्रमात्यागः, व्यवस्थिति *f.*, विधि-नियम-परता. **4** (Of arrangement) विरचनं-ना, व्यूहः-हनं, विन्यासः. **-ly,** *adv.* यथा-अनु-क्रमं, अनुपूर्वशः, आनुपूर्व्येण, अनुलोमं, आनुलोम्येन, क्रमशः, क्रमेण, पर्यायेण. **2** यथाविधि, विधिवत्, विधितः, यथानियमं, यथासूत्रं, विधिपूर्वकं, विधि-नियम-अनुसारेण. **3** नित्यं, अनुज्झितक्रमं, नियतक्रमेण, नियतवेलायां.

Regulate, *v. t.* सं-,वि-धा 3 U, परिकल्प् *c.*, क्रमेण विन्यस् 4 U, विरच् 10, व्यव-स्था *c.* (स्थापयति). **2** वि-,नियम् 1 P, वि-धा; अनुशास् 2 P, नि-,यंत्र् 10: *See* **Rule, Control;** ये द्वे कालं विधत्तः (*S. I*) ' who r. time. ' **3** यथाविधि व्यव-स्था *c.* or विधा, मार्गं निरूप् 10. **-ion,** *s.* विधानं, व्यवस्थापनं, यंत्रणं, शासनं, &c. **2** व्यवस्था वि-,नियमः, शासनं, विधिः, स्थिति *f.*, मर्यादा, क्रमः. **-or,** *s.* शासकः, संविधातृ *m.*, वि-,नियंता, शास्ता.

Rehearse, *v. t.* पठ् 1 P, अनुवद् 1 P. **2** कथ् 10, वर्ण् 10; *See* **Narrate. 3** प्रयोगात् पूर्वं अभिनी 1 P or नट् 10. **-al,** *s.* पठनं, अनुवादः; कथनं, आख्यानं, पूर्वप्रयोगः, पूर्वाभिनयः.

Reign, *v. i.* प्र-,शास् 2 P, राज्यं-महीं &c. शास् or अद् 1 P or भुज् 7 U. **2 Prevail,** q. v. *-s.* शासनं, राज्यपालनं, अधिपत्यं, अधिकारः; better by (*v.*) with loc. abs.; ' during Rama's r. ' रामे महीं शासति; ' after a r. of 12 years ' द्वादशाब्दान् भुक्तक्षितौ तस्मिन्. **2** राज्यशासनकालः, राज्यकालः. **-ing,** *a.* राज-,दारूढ, शासत्, राज्याधिकारिन्.

Reimburse, *v. t.* प्रतिदा 3 U, निष्कृ U, अपाकृ, पूर् 10, शुध् *c.*

Rein, *s.* अभीशुः-घुः, प्रग्रहः, रश्मिः; ' by drawing in the r. s ' रश्मिसंयमनात् (S. 1); ' give the r. s to ' वशं या 2 P; आयत्तीभू 1 P, अधीन-*a.* भू; ' r. s of government ' राज्यसूत्राणि. *-v. t.* नि-सं-यम् 1 P, नि-प्र-ग्रह् 9 P; *See* **Control;** ' r. in the horses' प्रगृह्णतां वाजिनः (*S.* 1).

Reins, *s.* कटि-टी *f.*, कटि-श्रोणी-देशः. **2** वृक्कौ.

Reinforce, *v. t.* **Recruit.** q. v. **-ment,** *s.* सैन्यं, सेनासामग्री.

Reinstate, *v. t.* प्रति-ष्ठा *c.* (-ष्ठापयति), पुनः स्था *c.* or नियुज् 7 A, 10. **-ment,** *s.* प्रतिष्ठापनं, पुननियोगः, पुनःस्थापनं.

Reiterate, *v. t.* **Repeat,** q. v. **2** पुनः पुनः कृ 8 U. **-ed,** *a.* पुनः पुनरुक्त; पौनःपुनिक (की *f.*). **-ion,** *s.* पुनर्वचनं, आम्रेडनं, पुनरुक्ति *f.*, पौनःपुन्यं.

Reject, *v. t.* अवधीर् 10, निराकृ 8 U, प्रत्या-ख्या 2 P, वि-हन् 2 P, प्रत्याचक्ष् 2 A; प्रत्यादिश् 6 P, निर्-अप-अस् 4 U, निधूं 5, 9 U, प्रति-अप-क्षिप् 6 P, त्यज् 1 P; *See* **Refuse. -ion,** *s.* अवधीरणं-णा, निराकरणं, प्रत्यादेशः, प्रत्याख्यानं, निरसनं.

Rejoice, *v. i.* प्री pass, मुद् 1 A, आनंद् 1 P, सं-परि-तुष् 4 P, हृष् 4 P, रम् 1 A, उल्लस् 1 P; *See* **Delight,** ' I r. to see you ' प्रीतोस्मि ते दर्शनात्, त्वद्दर्शनेन मुदितोस्मि; ' this is to be r. ed at ' एतदभिनंदनीयं (*S.* 5). *-v. t.* Causal of roots above. **-ing,** *a.* आनंदद, हर्षावह, हर्षकर

(री *f.*). **2** प्रीयमाण, मुदित, हृष्ट. *-s.* आनंदः, हर्षः, प्रमोदः, उत्सवः.

Rejoin, *v.* *See* Answer. **-Rejoinder,** *s.* प्रतिवचनं, उत्तरं, प्रत्युक्ति *f.*

Rejuvenate, *v. t.* बल्-सत्वं-वृध् *c.*, आ-धे *c.*

Relapse, *v. i.* पुनः पत् 1 P or आगम् 1 P or प्राप् 5 P; oft ex. by पुनः with other words; ' r. ed into a feverish state' ज्वरेण पुनरभ्यभूयत, पुनः ज्वरातुरो बभूव; ' r. ed into vice' पुनर्दुर्मार्गं गतं प्रचक्रमे, सत्पथात् भ्रष्टः, सन्मार्गं अत्यजत्; ' r. ed into his natural joviality सहजामानंदवृत्तिं प्रत्यपद्यत. *-s.* पुनःपतनं, आवृत्ति *f.*, प्रत्यागमनं, पूर्वावस्थाप्राप्ति *f.*

Relate, *v. i.* (To) उद्दिश् 6 P, अपेक्ष् 1 A, अनुषंज्-संबंध् pass.; by deriv. in ईय, or विषय in comp.; ' r. ing to Sastras' शास्त्रीय, शास्त्रविषय; ' news r. ing to the king's murder' राजघातविषयकः-संबद्धः-वृत्तांतः; *See* **Refer.** *-v. t.* कथ् 10, आ-ख्या 2 P, वर्ण् 10, शंस् 1 P, चक्ष् 2 A, आ-निवेद् *c*; *See* **Tell. -ed,** *a.* कथित, ख्यात, वर्णित, &c. **2** सं-अनु-बद्ध, अनुषक्त, अन्वित, संसक्त, संपृक्त, संबंधिन्, संपर्किन्, in comp. **3** संबंधिन्, सजाति, सजातीय, एक-स-गोत्र, सकुल्य, गोत्रज, एकशरीरान्वय. **-er,** *s.* आख्यायकः, कथयितृ *m.* **-ing,** *a.* (To) संबंधिन्, विषय in comp.; *See* **Refer. -ion,** *s.* संबंधः, अन्वयः, संदर्भः, संसर्गः, संपर्कः, अनुषंगः, भावः; ' mutual r. ' व्यतिषंगः, अन्योन्यसंबंधः, आकांक्षा (between a word and its meaning); ' intimate r. ' समवाय-नित्य-संबंधः; ' the r. of the container and the thing contained ' आधाराधेयभावः. **2** बंधुता, ज्ञातिभावः, शरीरसंबंधः, शरीरान्वयः, सजातित्वं, सगोत्रता, सपिंडता. **3** बंधुः, बांधवः, ज्ञातिः, गोत्रजः, सगोत्रजः, सकुल्यः, संबंधी, सपिंडः (to the 7th degree), समानोदकः (8th to 14th degree); सनाभिः, सोदर्यः, समानोदरः (by blood); ' r. s collectively ' बांधवगणः-जनः. बंधु-ज्ञाति-वर्गः. **4** आ-उपा-ख्यानं, वर्णनं, कथनं, निरूपणं, कीर्तनं. **-ionship,** *s.* बंधुता, सनाभिता, ज्ञातिभावः, संबंधः; ' near r. ' प्रत्यासन्नता; ' distant r. ' व्यवाहतता. **-ive,** *s.* सगोत्रः, सकुल्यः, बांधवः, बंधुः, ज्ञातिः; *See* **Relation.** *-a.* सापेक्ष, अविधिक्त, अन्यसापेक्ष, अकेवल; ' r. importance' तारतम्यं. **2** अन्योन्यान्वित. **3** संबंधिन्, विषयक, in comp.; अनुविद्ध, अनुषक्त, संबद्ध, सान्वय, उद्दिष्ट. **4** संबंधवाचिन्. **-ively,** *adv.* अन्यापेक्षया, अन्यसापेक्षं, अपेक्ष्य; *See* **Comparative.**

Relax, *v. t.* शिथिलीकृ 8 U, शिथिलयति (D.), श्रथ्-श्रंथ् 1, 9 P., 10, वि-,स्रंस् *c.*, विगल् *c.* **2** मुच् 6 P, or *c.*, विसृज् 6 P. **3** शिथिलीकृ, प्र-शम् *c.* (शमयति), न्यूनीकृ, लघूकृ, मंदीकृ, (मंदीचकार मरणव्यवसाय-बुद्धिं K. iv. 45); ' r. ing their efforts' शिथिलितप्रयत्नाः. **4** उद्-गंथ् 9 P, विसं-धा 3 U; ' r. the bowels ' विरिच् 7 P or *c.*; *See* **Purge;** ' r. the mind ' मनः विस्रंस् *c.*, or विश्रम् *c.* *-v. i.* शिथिलीभू 1 P, श्लथ् 1 P, श्रथ् 1 A, स्रंस् 1 A, शिथिलायते-मंदायते (D.). **2** प्र-उप-शम् 4 P, न्यूनी-भू. **-ation,** *s.* शैथिल्यं, विस्रंसः, प्रश्रथः, मुक्तिः *f.* **2** प्र-उप-शमः-शांतिः *f.*, न्यूनभावः. **3** विनोदः, विश्रामः, उद्योगविरतिः *f.* **-ed,** *a.* शिथिलित, शिथिल, प्र-,श्लथ, मुक्त, स्रस्त, विगलित; ' having r. his hold ' मुक्त or शिथिलित-ग्रहः or हस्तः.

Relay, *s.* विश्रामहारी जवाश्वगणः or सेवकगणः.

Release, *v. t.* मोक्ष् 10, मुच् 6 P or *c.*, वि-निर्-°, उद्धृ 1 P, निस्तृ *c.*, विसृज् 6 P; *See* **Free,** *-s.* वि-मुक्तिः *f.*, मोक्षः, मोचनं, उद्धारः, निस्तारः. **-er,** *s.* मोचकः, मोक्षकः, उद्धर्तृ *m.*

Relegate, *v. t.* वि-चर् *c.* **2** क्र *c.* (अर्पयति).

Relent, *v. i.* कारुणार्द्रीकृ-कारुण्यार्द्र-मृदुचित्त-भू 1 P; अनुकंप् 1 A, दयार्द्रीभू, करुणया द्रु 1 P; ' his heart r. ed ' तस्य मनो सार्द्रं बभूव; कठिनतामजहात्; ' being appeased, he r. ed ' राज्ञानुनीतो मृदुतामगच्छत् (R. v. 54); किमपि सानुक्रोशः कृतः (S. 4) ' somewhat r. ed '. **-less,** *a.* निर्दय, निष्करुण, निरनुक्रोश, क्रूर, कठोर, कठिन-पाषाण-हृदय, निर्घृण; *See* **Cruel. -lessly,** *adv.* निर्दयं, निष्करुणं, कठोरं.

Relevant, *a.* प्रास्ताविक (की *f.*), प्रस्तुत, प्रस्तुतानुषंगिन्, प्रासंगिक (की *f.*), प्रस्ताव-सदृश (शी *f.*)-उचित-अनुरूप, प्रसंगोचित. **-ly,** *adv.* प्रस्तावसदृशं, प्रासंगिकं. **-Relevance,-cy,** *s.* प्रस्तावोचित्यं, प्रस्ताव-संगति *f.*, प्रस्तुतानुसारः-अन्वयः, प्रकरणानुसारः, प्रास्ताविकत्वं.

Relic, *s.* अव-शिष्ट-शेषः-षं, शेषभागः; शवः-वं, मृतशरीरं.

Relict, *s.* *See* **Widow.**

Relieve, *v. t.* (persons) (दुःखात् &c.) मुच् 6 P or *c.*, मोक्ष् 10, उद्धृ 1 P; दुःखं &c, अपनी 1 P or शम् *c.* (शमयति) or परिह् 2 (Pain &c.) प्र-शम् *c.*, परिह्, दूरीकृ; लघयति (D.). **-ving,** *s.* विश्रम *c.*, लघूकृ; *See* **Alleviate,** ' I feel myself to be r. ed ' प्रसन्नात्मा विशदः जातः (S. 4), निश्चितोहं.

3 उपकृ, साहाय्यं दा 3 U, अनुग्रह् 9 P. 4 (Guard &c.) विश्रम् c., नियोगात् विश्रामं दा. -ed, *a.* उद्धृत, मुक्त, शांत, शमित &c.; 'r. of anxiety' वीतचिंत, निश्चिंत, निःशल्य (मनः); 'r. of pain' शांतदुःख. -Relief, *s.* (दुःखात्) मोचनं, मोक्षः, उद्धारः, शमनं, मुक्ति *f.*, अपहरणं, अपनयनं, परिहारः. 2 सुखं, उप-प्र-शमः, निर्वापणं, चिंता-प्रशमः-शांति *f.* स्वास्थ्यं, निर्वृत्तिः, विश्रामः, निश्चिंतता; एकपदे एव दुःखविश्रामं ददाति (U. 6) 'gives r. to my sorrow'; कर्तव्यानि दुःखितैर्दुःखनिर्वापणानि (U. 3). 3 उपकारः, साहाय्यं; 'she brought her lovely limbs into r.' पुपोष लावण्यमयान् विशेषान् (K. I. 25).

Religion, *s.* धर्मः. 2 **Piety,** q. v. -Religious, *a.* धर्म्य, धर्म-देव- in comp.; 'r. rites' धर्मक्रियाः. 2 धर्मात्मन्, पुण्यशील, धर्माचारिन्, व्रतिन्, धर्मनिष्ठ, धार्मिक (की *f.*); *See* **Pious, -ly,** *adv.* धार्मिकवत्, ईश्वरभक्त्या. -ness, *s.* धार्मिकत्वं, धर्मनिष्ठा, धर्मपरता.

Relinquish, *v. t.* त्यज् 1 P, उत्-वि-सृज् 6 P, हा 3 P, मुच् 6 P. -ment, *s.* त्यागः, उत्सर्गः, मोचनं; *See* **Abandon,-ment.**

Reliquary, *s.* अवशिष्टाधारः-भाजनं.

Relish, *v. t.* स्वाद् c., रस् 10, सुरसीकृ 8 U, स्वादूकृ. 2 आस्वाद् 1 A. 3 अभि-,रुच् 1 A, अभिनंद् 1 P; *See* **Like,** *s.* रसः, आ-, स्वादः-स्वादनं, रुचि *f.*; 'has lost r. for dates' निंदन्नर्थैरुद्वेजित (S. 2). 2 अभि-, रुचिः, अभिलाषः, इच्छा. 3 अव-उप-दंशः.

Reluctant, *a* अनिच्छन्, विमनस्, अनिच्छु, असंतुष्ट, अकाम, निष्काम, वि-पराङ्-मुख, विमत. -ly, *adv.* बलात्, अनिच्छया, अकामं-मतः-मेन, by (*a.*), 'he went out r.' अनिच्छन्नपि निर्जगाम. -Reluctance, *s.* अनिच्छा, अकामः, असंतोषः, वैमनस्यं, विमुखता, अरुचि *f.*

Rely, *v. i.* (On) विश्वस् 2 P, प्रति-इ 2 P, विश्रंभ् 1 A; श्रद्धा 3 U. 2 आ-अव-लंब् 1 A, आ-सं-श्रि 1 U; oft. ex. by आयत्त, अधीन, तंत्र in comp.; 'I r. on you alone' भवानेव ममाश्रयः-शरणं. -iance, *s.* विश्वासः, प्रत्ययः, विश्रंभः, श्रद्धा. 2 अवलंबः-बनं, आ-सं-श्रयः, शरणं. -ing, *a.* अवलंबिन्, आश्रित, विश्वासिन्, जातप्रत्यय.

Remain, *v. i.* अव-स्था 1 A, स्था 1 P, आस् 2 A, वृत् 1 A; *See* **Continue.** 2 नि-,वस् 1 P, स्था, अधि-ष्ठा. 3 शिष् pass., अव-परि-उत्°-, उद्-वृत्; 'he r. ed only' in memory (his name only r. ed) स्मर्तव्यशेषं नीतः; 'r. ing after what is eaten' भुक्तावशिष्टं, भुक्तशेषं (अन्नं); 'those who r. ed alive' हतशेषाः. -ing, *a.* अव-,शिष्ट-शेष, उद्वृत्त; 'pass the r. months' शेषान्मासान्गमय; 'during the r. part of his life' आयुःशेषे. -Remains, *s.* अस्थ्यादिशेषः, अस्थीनि. -Remainder, *s.* अव-, शेषः-षं-शिष्टं,उद्वर्तः, शेषभागः; (in arithmetic) शेषं, अंतरं; (of men) ex. by अन्य, इतर; *See* **Other;** 'subtracting 4 from 10 the r. is 6' दशसु चतुर्भिर्विवर्जितेषु षड् शेषं or षड् अवशिष्यंते.

Remand, *v. t.* पुनः प्र-हि 5 P or आह्वे 1 P.

Remark, *v. t.* लक्ष् 10, अवेक्ष् 1 A, निरूप् 10. 2 अभि-धा 3 U, वच् 2 P, वद् 1 P, *See* **Observe.** -*s.* उक्ति *f.*, वचनं, अभिधानं, वचस् *n.*, भाषणं; (written) लिखितं, लेखः. 2 अवेक्षणं, निरूपणं. 3 चर्चा, अनुशासनं. -able, *a.* अपूर्व, अद्भुत, आश्चर्यभूत. 2 विख्यात, विश्रुत, अलौकिक (की *f.*), लोकोत्तर, प्रसिद्ध, विशिष्ट, उत्कृष्ट, स्मरणार्ह, विशेष in comp. -ably, *adv.* सातिशयं, विशेषेण, विशेषतः, अद्भुतं, विशिष्टप्रकारेण.

Remarried, *a.* पुनरूढ, पुनर्भू.

Remedy, *v. t.* प्रतिकृ 8 U, प्रतिवि-धा 3 U, प्रतिसमा-समा-धा; परिहृ 1 P; प्र-उप-शम् c. (शमयति), साध् c., कित् desid. (चिकित्सति-ते); उप-चर् 1 P. -*s.* औषधं, भेषजं, अगदः; *See* **Medicine.** 2 प्रतिक्रिया, प्रति-(ती)कारः, उपशमः, उपायः, उपचारः, प्रतिविधानं, उपक्रमः, चिकित्सा, प्रतिसमाधानं. -iable, *a.* प्रतिकार्य, प्रतिविधेय, चिकित्स्य, शक्यप्रतिकार, शक्योपचार. -ial, *a.* प्रतिकारक, प्रतिकारिन्, (*s.*) in comp.; 'a r. measure proves effective' प्रतिकारविधानं फलाय कल्पते (R. viii. 40.). -less, *a.* अप्रतिकार्य, अप्रतिविधेय, निरुपाय अप्रतिकार, दुरुपचार.

Remember, *v. t.* स्मृ 1 P, सं-अनु-,° (with gen. when regret is shown), अनुचिंत् 10, अनु-बुध् 1 P, 4 A. 2 (Keep in mind) स्मृ, हृदये-चित्ते नि उप-धा 3 U, मनसि कृ 8 U, अव-धृ 10; 'please, r. these words well' हृदि एनां (भारतीं) उपधातुमर्हसि (R. viii. 77); 'r. me to your brother' स्मर्तव्योहं तव भ्रातुः. -Remembrance, *s.* स्मरणं, स्मृति *f.*, अनुचिंतनं, अवधारणं-णा. 2 स्मारकं, स्मारणं, स्मरणवस्तु, अभिज्ञानं, 'r. of love' प्रीत्यभिज्ञानं. -er, *s.* स्मारकः, उद्बोधकः.

Remind, *v. t.* स्मृ c., अनु-सं-°, उद्-प्र-अनु-बुध् c.; 'this group of gallants, as if, r. s me to-day of Pātāla' पातालं नानद्य संस्मरयतीव भुजंगलोकः (Rat. 1) Oh

I am well r. ed' अये सम्यगनुबोधितोस्मि (S. 1). -er, *s.* उद्बोधकः, अनुबोधकः.

Reminiscence, *s.* स्मृति *f.*, स्मरणं; *See* **Memory.**

Remiss, *a.* अनवधान, असावधान, प्रमत्त, निरपेक्ष, उपेक्षक, मंदादर, शिथिलोद्यम; 'to be r.' प्रमद् 4 P (with abl.). -ly, *adv.* अनवधानेन, उपेक्षया, निरपेक्षं, प्रमादेन. -ness, *s.* अनवधानं, उपेक्षा, निरपे(वे)क्षा, प्रमादः, शैथिल्यं.

Remit, *v. t.* प्र-हि 5 P, प्रेष् c., प्रति-ऋ c. (अर्पयति); संचर् c., संक्रम् c. 2 शिथिलीकृ 8 U, मुच् 6 P, वि-उत्-सृज् 6 P, त्यज् 1 P, विरम् 1 P, निवृत् 1 A, (with abl.). 3 क्षम् 1 A, निवृत् c., मुच्, अवसृज्, त्यज्. 4 प्र-उप-शम् c., (शमयति), लघूकृ, न्यूनीकृ. -*v. i.* प्र-उप-शम् 4 P, शिथिलीभू 1 P, विरम्. -tance, *s.* प्रेषणं, संक्रामणं; प्रेषितधनसंख्या. -tent, *a.* संतत, अविसर्गिन्. -ting, *a.* विरत, विसर्गिन्, शिथिलित. -Remission, *s.* शैथिल्यं, प्र-उप-शमः-शांति *f.*, विरामः. 2 मोचनं, मुक्ति *f.*, निस्तारः, उद्धारः. 3 मार्जनं, क्षमा, विच्छेदः, निवृत्ति *f.*, उत्सर्गः.

Remnant, *s.* अव-,शेषः-षं; *See* **Remainder.**

Remonstrate, *v. i.* (With) निवारणार्थं उपदिश् 6 P, निवारयितुं यत् 1 A, प्रत्यादिश् प्रत्या-ख्या 2 P; *See* **Dissuade.** -Remonstrance, *s.* प्रत्यादेशः, प्रबोधवचनं, निवारणोपदेशः, निवर्तनं.

Remorse, *s.* अनुतापः, अनुशयः, अनुशोकः, पश्चात्तापः. -ful, *a.* अनुतप्त, अनुशयार्त; *See* **Repentance,** &c. -less, *s.* कठिन, निर्दय; *See* **Cruel.**

Remote, *a.* दूर, दूरस्थ, दूरवर्तिन्, असन्निहित, विप्रकृष्ट; *See* **Distant.** -ly, *adv.* दूरं, विप्रकृष्टं; 'he is r. connected with me' स मम विप्रकृष्टः बंधुः. -ness, *s.* विप्रकर्षः, असन्निकर्षः, दूरता.

Remount, *s.* अश्रांतः अश्वः. -*v. i.* अश्वं पुनर् आरुह् 1 P.

Remove, *v. t.* स्थानांतरं नी 1 P or गम् c., अप-सृ c., वि-, चल् c. 2 दूरीकृ 8 U, निर्वस् c., निष्कस् c., अप-निः-उत्-सृ c., बहिष्कृ; (from office) प्र-, भ्रंश् c., च्यु c.; *See* **Dismiss, Discharge.** (of things) अपनी, विनुद् c., अपहृ 1 P, अप-अव-कृष् 1 P, अप-अपा-नुद् 6 P or c., अप-व्यप-ऊह् 1 U, निर्-अप-अस् 4 U, निराकृ, अपाकृ, उच्छिद् 7 P, वि-नश् c., प्रतिकृ, खंड् 10, वि-प्रति हन् 2 P, भंज् 7 P, निर्-अव-धू 5, 9 U, 6 P. -*v. i.* स्थानांतरं गम् 1 P or या-इ 2 P; अपसृ 1 P, अपगम्-या. -*s.* पुरुषः (in geneology) 'separated by one r. from the creator' स्रष्टुरेकांतरं (द्वंद्वं) (S. 7). 2 पदं, पदवी, क्रमः. 3 अपगमः, अपसरणं, &c.; *See* below. -al, *s.* अपनयनं, उत्सारणं, दूरीकरणं, विचालनं, स्थानांतरीकरणं. 2 अपसरः-रणं, अपयानं, अपगमः-गमनं, स्थानांतरं, स्थलभेदः. 3 निरासः, निराकरणं, प्रभ्रंशनं, अप-परि-हारः-हरणं, उच्छेदः, विनाशः-शनं, अपनोदः, अपोहः, प्रतिघातः, प्रति(ती)कारः, खंडनं, भंगः &c. -er, *s.* अपनेतृ *m.*, अपहर्ता, नाशकः, उच्छेत्ता; gen. ex. by हारः, हारी, अपहः, हा, घ्नः, अंतकः in comp., also हृत्, नुद् in comp.; 'r. of darkness' तमोनुत्, तमोहृत्, तमश्छिद् &c.

Remunerate, *v. t.* मूल्यं-वेतनं-प्रतिफलं दा 3 U; *See* **Recompense, Reward.** -ion, *s.* मूल्यं, वेतनं, प्रतिफलं, पारितोषिकं.

Renaissance, *s.* (विद्यायाः) पुनरुज्जीवनं.

Rencounter, *s.* संमर्दः, द्वंद्वं, संघट्टः, अभिघातः; *See* **Battle, Collision.**

Rend, *v. t.* दॄ 9 P or c., भिद् 7 P, छिद् 7 P, व्यध् 4 P, विशॄ 9 P; वि-उद्-दल् c. (दलयति), खंड् 10; *See* **Tear,** 'heart-r. ing' हृदयस्पृश्, हृदिस्पृश्, हृदयमर्मच्छिद्. -er, *s.* विदारकः, भेदकः. -ing, *s.* विदारणं, भिदा, स्फुटनं, भेदः, भंगः. -Rent, *a.* विदीर्ण,स्फुटित, भिन्न &c. -*s.* छिद्रं, रंध्रं, भेदः, विदरः, स्फुटनं, भिदा, भंगः.

Render, *v. t.* प्रति-दा 3 U, प्रति-ऋ c. (अर्पयति), प्रति-पद् c., निर्यत् c. 2 दा, कृ 8 U, उपक्लृप् c. 3 जन् c., उत्पद् c., कृ; by the causal of roots; 'r. help' साहाय्यं कृ or दा; 'to r. proud' दृप् c.; 'r. unfriendly' विकृ c., &c. विरंज् c. 4 **Translate,** q. v.

Rendezvous, *s.* समागम-संकेत-स्थानं, संकेत गृहं-स्थलं.

Renegade, *s.* धर्मभ्रष्टः, पतितः, पाखंडः, स्वधर्म-स्वपक्ष-त्यागिन् *m.*

Renew *v. t.* नवीकृ 8 U, प्रतिसमा-धा 3 U, उद्धृ 1 P, पूर्वावस्थां नी 1 P or प्राप् c. or गम् c. 2 पुनः कृ; gen. ex. by पुनः आरभ् 1 A with other words; 'r. s studies' पुनः अध्ययनं प्रारभते; 'they r. ed hostilities पुनः वैरं प्रारेभिरे. -al *s.* नवीकरणं, पूर्ववत्करणं, प्रतिसमाधानं, उद्धारः, पुनः करणं, पुनः प्रारंभः.

Renounce, *v. t.* न स्वीकृ or अंगीकृ 8 U, प्रत्या-ख्या 2 P, प्रत्यादिश् 6 P, प्रत्याचक्ष् 2 A; *See* **Refuse.** 2 त्यज् 1 P, अपास् 4 U, वि-उत्-सृज् 6 P, हा 3 P; *See* **Abandon,** 'to r. the world' संन्यस्, सर्वसंगं परित्यज्. -Renunciation, *s.* प्रत्यादेशः, प्रत्याख्यानं, परित्यागः, उत्सर्गः, परिहारः; 'r. of the world' संन्यासः, सर्वसंगपरित्यागः.

Renovate, *v. t.* नवीकृ 8 U, पुनः कृ. **-ion,** *s.* नवीनता, नूतनावस्था, उद्धारः, *See* **Refresh, Renew.**

Renown, *s.* कीर्ति *f.*, यशस् *n.*, प्र वि-ख्याति *f.*, विश्रुति *f.* **-ed,** *a.* प्र-वि-ख्यात, विश्रुत, प्रथित, लब्धकीर्ति, प्रसिद्ध, लब्धप्रतिष्ठ; *See* **Fame, -ous.**

Rent, *s.* करः, बलिः, राजस्वं. **-v. *t.*** भाटकेन दा 3 U; भट् c., भाटकेन-मूल्यदानेन-ग्रह् 9 U or सेव् 1 A or भुज् 7 A. **-al,** *s.* 'r.-bill' करपत्रिका.

Reorganize, *v. t.* पुनर् वि-रच् 10 or घट् c.

Repair, *v. t.* नवीकृ 8 U, सं-धा 3 U प्रतिसमा-समा-धा, उद्भू 1 P, पूर्ववत्कृ, पुनः स्वस्थीकृ, सुस्थित *a.* कृ. **2** (Loss &c.) पूर् 10, प्रमृज् 2 P, निष्कृ, शुध् c., प्रतिकृ, सं-धा. **-v. *i.*** आश्रि 1 U, प्रपद् 4 A, गम्-व्रज् 1 P, शरणं प्रपद् or गम् or या 2 P or अभ्युप-इ 2 P. **-*s.*** प्रति-,समाधानं, संस्कारः, संधानं, उद्धारः, नवीकरणं, पूर्वावस्थाप्रापणं. **-Reparable,** *a.* पूरणीय; उद्धार्य, प्रतिसमाधेय; 'loss not r.' अपूरणीया हानिः. **-Reparation,** *s.* **Repair,** q. v. **2** क्षति or हानि-पूरणं or निष्कृति *f.*, शोधनं, प्रतिफलं.

Repartee, *s.* क्षिप्रोत्तरं, व्यंगोक्ति *f.*, भंगि-भाषणं, सरसोक्तिः.

Repast, *s.* भोजनं, अन्नं, आहारः, अशनं, अभ्युपहारः.

Repatriate, *v. t.* (निर्वासितं) स्वदेशं प्रापू c.

Repay, *v. t.* प्रतिदा 3 U, प्रति कृ c. (अर्पयति), निर्यत् 10, प्रति-पद् c., निवृत् c., प्रतिकृ 8 U. **2** प्रतिफलं-निष्कृतिं-दा, निष्कृ, अपाकृ, शुध् c., अपवृज् 10, oft. by प्रति; 'r. kindness' प्रत्युपकृ; 'r. an injury' प्रत्यपकृ, वैरं साध् c. **-ment,** *s.* प्रतिदानं, प्रत्यर्पणं, निर्यातनं, शोधनं, शुद्धि *f.*, प्रतिफलं.

Repeal, *v. t.* खंडू 10, निरस् 4 U, वि-,लुप् c., नि-परा-वृत् c., उच्छिद् 7 P. **-*s.*** वि-,लोपः, निवर्तनं, खंडनं, निरसनं, प्रचारलोपः-भंगः. **-er,** *s.* निवर्तकः, विलोपकः.

Repeat, *v. t.* पुनः वद्-गद् 1 P, or उदीर् c. or स्याद् 1 P, (Say, q. v.); अभ्यस् 4 U, (a letter) आम्रेडयति (D.). **2** आवृत् c., पुनः-मुहुः-कृ 8 U or आचर् 1 P or अनु-ष्ठा 1 P; 'ten r. ed two times' द्विरावृत्ता दश, द्विदशाः. **3** पठ् 1 P, स्याद्, अनुवद्, उद्गृ 6 P, आ-ख्या 2 P, कथ् 10, उदीर्. **-ed,** *a.* पुनरुक्त, पुनर्भणित, पुनः पुनः कृत, आवृत्त, आचर्तित; 'with r. exertions' पुनः पुनः कृतैः प्रयत्नैः; 'in r. birth, परिवर्तिनि जन्मनि, जन्मनि जन्मनि. **-edly,** *adv.* वारं वारं, भूयो भूयः, पुनः पुनः, मुहुर्मुहुः, अभीक्ष्णं, असकृत्, बहुशः, अनेकशः. **-Repetition,** *s.* पुनरुक्ति *f.*, पुनर्वादः; पुनर्वचनं-कथनं, पौनरुक्त्यं; 'made as a r.' पुनरुक्त, पुनरुक्तता नीत; *See* **Superfluous. 2** पठनं, समभिव्याहारः, अनुवादः, अनुलापः. **3** आवृत्ति *f.*, आवर्तनं, पुनः विधानं-अनुष्ठानं-आवृत्तिः, पौनः-पुन्यं, अभ्यासः; आम्रेडितं, द्विरुक्तिः (of a word &c.).

Repel, *v. t.* अपास् 4 U, प्रति-स्था दन् 2 P, प्रतिसृ c., निरस्, प्रतिक्षिप् 6 P, प्रतिवृ c., अपाकृ 6 P, नि-परा-वृत् c., प्रत्याविष्कृ 6 P; *See* **Dispel, Drive. -lent,-ling,** *a.* प्रतिघातिन् प्रतिकारक, अपानोदिन्. **-*s.*** प्रति-(ती)कारः, प्रतिघातः, प्रतिवारणं.

Repent, *v. i.* अनु-पश्चात्-नप् 4 A, अनुशी 2 A, अनुशुच् 1P, अनुतापं वह्-व्रज्-गम् 1 P, पश्चात् पीड्-खिद् pass. **-ance,** *s.* अनु-पश्चात्-तापः, अनुशयः, अनुशोकः, पश्चात्खेदः, मनस्तापः, विप्रतीसारः, पाप-दुष्कृत-खेदः. **-ant,** *a.* सानुशय, सानुताप, संजातानुताप, अनुशयविधुर-पीडित, अनुतप्त, जातानुशय, जातखेद, अनुतापार्त.

Repercussion, *s.* प्रतिघातः, प्रतिपतनं.

Repertory, *s.* *See* **Treasury.**

Repine, *v. i.* म्यथ् 1 A, शुच् 1 P, अवसद् 1 P, खिद्-पीड्-दु-संतप्-pass.; *See* **Fret. -ing,** *s.* मनस्तापः, मनोव्यथा, शोकः.

Replace, *v. t.* (स्थाने) पुनः आ नि-धा 3 U or निविश् c. or न्यस् 4 U or स्था c. (स्थापयति); पूर् 10, स्थाने निविश् c., रीति-निधिं दा 3 U; 'one servant was r. ed by two' किंकरस्थाने किंकरद्वयं निवेशितम्; *See* **Substitute.**

Replenish, *v. t.* (पुनः) संपूर् 10 or उप-कल्प् c.

Replete, *s.* सं-परि-पूर्ण, सं-आ-कीर्ण, परि-पूरित, आ-नि-चित, आढ्य, मय (यी *f.*) in comp. **-ion,** *s.* पूर्णता, पर्याप्ति *f.*; परि-,पूर्ति *f.*

Replica, *s.* प्रतिकृति *f.*

Reply, *s.* उत्तरं, प्रति-वचनं-वाक्यं-वाच् *f.*-उक्ति *f.* **2** उत्तरपक्षः; प्रतिवादः; 'leave no room for r.' निरुत्तरीकृ 8 U. **-*v. i.*** दा 3 U with (*s.*), उत्तरं प्रति-पद् 4 A, प्रतिवच् 2 P, प्रतिवद् 1 P. भाष् 1 A. **2 Echo,** q. v. **-Replicant,** *s.* उत्तर-वादिन् *m.*, प्रतिवादी

Report, *v. t.* आ-नि-विद् c., आ-ख्या 2 P or c. (ख्यापयति), विज्ञा c. (ज्ञापयति), बुध् c., वृत्तांतं लिख् 6 P, श्रु c.; 'he is r. ed to be dead' स मृत इति श्रूयते, इति जनश्रुतिः-प्रवादः. **-*s.*** नि-आ-वेदनं, विज्ञापना, विज्ञप्ति *f.*, कथनं; 'written r.' आवेदनपत्रं, विज्ञप्तिलेखः. **2** ख्याति *f.*, विश्रुति *f.*, कीर्ति *f.*; 'evil or bad r.' कौलीनं, अकीर्तिः. **3** वार्ता, वृत्तांतः, प्रवादः, जन-लोक-वादः-प्रवादः-श्रुतिः-वार्ता, उपश्रुति, जनरवः; किंवदंती, 'there goes a r.' इति जनप्रवादः &c. श्रूयते, इति प्रवादः. **4** ध्वनिः, नादः, शब्दः; *See* **Noise. -er,** *s.* वृत्तांतनिवेदिन् *m.*

Repose, *v. i.* विश्रम् 4 P, संविश् 6 P, शी 2 A. **2** विश्वस् 2 P, प्रति-इ 2 P. **3** आ-अव-ऊंख् 1 A, आ-सं-श्रि 1 U; 'r. ing confidence' विश्वासप्रतिपन्न, सविश्वासं स्थित. **-*v. t.*** विश्रम् c., संविश् c. **2** निक्षिप् 6 P, स्था c. (स्थापयति), नि-आ-धा 3 U. **-*s.*** विश्रा(श्र)मः, विश्रांति *f.*, विरामः, उप-प्र-शमः, प्र-शांति *f.*, श्रमच्छेदः-निवृत्तिं *f.*, निर्वृति *f.*

Reposit, *v. t.* नि-आ-धा 3 U, न्यस् 4 P, रक्ष् 1 P. **-ory,** *s.* निधिः, आगारं, निधानं, पात्रं, भाजनं, आश्रयः, आशयः, आधारः, कोष्ठः, रक्षणस्थानं.

Reprehend, *v. t.* भर्त्स् 10 A, परुषं निंद् 1 P, or उपालभ् 1 A; *See* **Censure. Reprehensible,** *a.* निंद्य, उपालभ्य, गर्हित, गर्हणीय, दूषणीय. **-Reprehension,** *s.* निंदा, गर्हा, भर्त्सन-ना, दूषणं, उपालंभः.

Represent, *v. t.* वर्ण् 10, वि-कृ 5 U, निरूप् 10; oft. ex. by स्था c.; 'r. even vices as virtues' दोषानपि गुणपक्षमध्यारोपयंति, गुणपक्षे स्थापयंति (Ka. 108); 'r. in writing' अभि-,लिख् 6 P, लेख्ये निविश् c. or आरुह् c. **2** प्र-,दृश् c., सूच् 10, आ-विष्कृ 8 U, निरूप्. **3** नि-आ-विद् c., वि-ज्ञा c. (ज्ञापयति); *See* **Inform. 4** भ्रमौ-स्थाने-स्था 1 P, or वृत् 1 A; प्रतिनिधिः भू; 'you r. the queen' भवान् राज्ञीस्थाने वर्तते, राज्ञीप्रतिनिधिः. **5** रूप-वेष-ग्रह् 9 U or धृ 1 P, 10; *See* **Personate;** (a play &c.) प्रयुज् 10; 'have not seen it r. ed' न प्रयोगतो दृष्टं (Rat. 1); नाटकं प्रयोगेणाधिक्रियतां (S. 1) 'let it be r. ed on the stage'; 'r. a character' भूमिकायां वृत्; 'Urvasi r. ing Lakshmi' उर्वशी लक्ष्मीभूमिकायां वर्तमाना (V. 3). **-ation,** *s.* वर्णनं, निवेदनं, विज्ञापना, प्रदर्शनं, निरूपणं, विज्ञप्तिं *f.* **2** प्रयोगः, अभिनयः **3** प्रतिकृति *f.*, प्रतिरूपं, आलेख्यं, प्रतिच्छंदः, प्रतिमा, प्रतिमूर्ति *f.*; *See* **Picture. -ative,** *s.* प्रतिनिधिः, प्रतिभूः, प्रतिपुरुषः. **-a.** प्रतिनिधीभूत, आदर्शभूत.

Repress, *v. t.* प्रति-नि-रुध् 7 U, सं-नि-यम् 1 P, निर्यंत्र् 10, नि-ग्रह् 9 P, प्रशम् c.; *See* **Check. -ion,** *s.* निरोधः, निपमः; निग्रहः, निर्यत्रणं. **-ive,** *a.* निरोधिन्, निग्रहकारिन्.

Reprieve, *s.* विश्रामः, विरतिं *f.* **2** दंडस्थापोद्-गः-विलंबः. **-*v. t.*** दंडं व्याक्षिप् 6 P or विलंब् c., व्यवहारदर्शनं व्याक्षिप्.

Reprimand, *v. t.* निंद् 1 P, भर्त्स् 10 A, उपालभ् 1 A, वाच्या दंडू 10, अव-अधि-क्षिप् 6 P. **-*s.*** निंदा, भर्त्सना-नं, उपालंभः, वाग्दंडः, वाक्ताडनं; *See* **Censure.**

Reprisal, *s.* प्रत्यपहरणं, प्रतिपीडनं.

Reproach, *v. t.* (परुषं) निंद् 1 P, गर्ह् 1, 10 A, उपालभ् 1 A, आकुश् 1 P, अप-परि-वद् 1 A, निर्-भर्त्स् 10 A, आ-अधि-क्षिप् 6 P, दुष् c. (दूषयति), कुत्स् 10; सा-वज्ञं निंद्, तिर-स्कृ 8 U, धिक्कृ, अवमन् 4 A. **-*s.*** धिक्कारः, निंदा, गर्हा, तिरस्कारः, आ-अधि-क्षेपः; परि(री)वादः; उपालंभः; आक्रोशः, भर्त्सनं-ना, परुषोक्तिं *f.*, वाक्पारुष्यं, दुरुक्तं, वाग्दंडः, निंदा-भर्त्सना-वाक्यं. **2** दूषणं, कलंकः, अ-श्लाघ-कीर्तिं *f.*; लज्जास्पदं. **-ful,** *a.* निंदागर्भ, निंदात्मक, परिवादक; better by (*s.*) in comp.: 'r. words' निंदावचनानि. **2** गर्हित, निंद्य, गर्हणीय, लज्जास्पद. **-fully,** *adv.* साधिक्षेपं, सोपालंभं.

Reprobate, *v. t.* धिक्कृ 8 U, न्यक्कृ, दुष् c., (दूषयति), गर्ह् 1, 10 A; *See* **Reproach. -*a.*, *s.*** दुर्वृत्त, दुराचार, पाप-खंडित-वृत्त, दुष्ट, पापात्मन्, दुःशील, दुरात्मन्; (of acts) दुष्ट, निंद्य, गर्ह्य. **-ion,** *s.* गर्हा, गर्हणं, अतिदुष्टता.

Reproduce, *v. t.* पुनः कृ 8 U or उत्पद् c. or जन् c.; 'he r. ed the whole speech' समग्रमेव भाषणं स यथातथमुदीरयामास. **-Reproduction,** *s.* प्रत्युत्पत्तिं *f.*, पुनर्जननं.

Reprove, Reproof, *See* **Reproach.**

Reptile, *s.* सरीसृपः, सर्पणशीलः, उरगः, उरोगः-गामिन् *m.* उरंगमः, सर्पः. **-*a.*** सर्पिन्, सर्पण-शील.

Republic, *s.* प्रजासत्ताकं-प्रजातंत्रं-राज्यं, लोक-प्रजा-प्रभुत्वं. **-an,** *a.* प्रजाप्रभुत्वविशिष्ट, लोकप्रभुत्वसंबंधिन्, (*s.*) in comp. **-ism,** *s.* प्रजाप्रभुत्ववादिन् *m.*, प्रजापक्षवादी. **-anism,** *s.* प्रजाप्रभुत्ववादः, प्रजातंत्रपक्षः.

Repudiate, *v. t.* प्रत्यादिश् 6 P, निराकृ 8 U, निर्-अप-अस् 4 U, निः-सृ c., परि-त्यज् 1 P, प्रत्या-ख्या 2 P, अपह्नवं c., अव-निर्-धू 5, 9 U, 6 P; *See* **Reject** also. **-ion,** *s.* प्रत्यादेशः, निराकरणं, प्रत्याख्यानं, परित्यागः, अपासनं. **2** विवाहसंबंधत्यागः, दांपत्यविश्लेषः.

Repugnant, *a.* प्रतीप, विरुद्ध, प्रतिकूल, विपरीत, अनभिमतसुख-विरुद्ध. **-Repugnance,** *s.* विरोधः, प्रातिकूल्यं, वैपरीत्यं, विरागः, विद्वेषः, अनिच्छा, वैमुख्यं, विमतिं *f.*, विरक्तिं *f.*

Repulse, *v. t.* निराकृ 8 U, निः-प्रति-सृ c., अवधीर् 10; प्रत्यादिश् 6 P, प्रत्या-ख्या 2 P, परा-प्रति-हन् 2 P, भंज् 7 P, वि-द्रु c., (army). **-ion,** *s.* निराकरणं, निःसारणं, प्रत्यादेशः, अवधीरणं-णा, प्रतिघातः, प्रतिहननं; विद्रावणं, पराजयः, भंगः. **-ive,** *a.* अ-

भिष, द्विड, निंद्य, बीभत्स, बीभत्सावह; *See* **Hideous.** **2** प्रतिघातिन्, प्रतिसारिन्.

Repute, *v. t.* मन् 4 A, अभि-सं-°, गण् 10; *See* **Consider,** 'r. ed as authors' कर्तृत्वेनाभिमताः. **-s.,** **-ation,** *s.* कीर्ति *f.*, ख्याति *f.*, प्र-चि-°, यशस् *n.*, प्रतिष्ठा, प्रथा, प्रतिपत्ति *f.*, गौरवं, प्रसिद्धि *f.*; 'of established r.' लब्धप्रतिष्ठ; 'good r.' सु-ख्याति:; 'bad r.' दुष्कीर्ति:, अप-अ-कीर्ति:, वाच्यता, कौलीनं, दुर्नाम. **-able,** *a.* सं-, मान्य, प्रशस्य, माननीय, आदरणीय. **2** यश:-कीर्ति-कर (री *f.*), कीर्ति-मान-मद्. **-ed,** *a.* अभिमत, जन-लोक-विश्रुत, सर्वज्ञात, जन-श्लिष्ट.

Request. *v. t.* याच् 1 A, अर्थ् 10 A, प्र-अभि-°, वि-ज्ञा c. (ज्ञापयति), सविनयं नि-आ-विद् c. **-s.** प्रार्थना, अभ्यर्थना, याचना, विज्ञापना, विज्ञप्ति *f.*, नि-आ-वेदनं, याच्ञा. **2** आकांक्षा, इच्छा, अभिलाष:, आपेक्षा; 'in general r.' सर्वाभीप्सित, चतुश: इष्ट.

Require, *v. t.* प्रार्थ् 10 A, प्रच्छ् 6 P, याच् 1 A. **2** (Need) वि-,अपेक्ष् 1 A, आकांक्ष् 1 P; oft. ex. by उपयोग:, प्रयोजनं, कार्यं, with instr.; or अर्ह् 1 P; or by pot. pass. part.; 'that it is affection and should r. a cause is a contradiction' स्नेहश्च निमित्तसव्यपेक्ष इति विप्रतिषिद्धमेतत् (Mal. 1); 'I do not r. his help' न मम तस्य साहाय्येन प्रयोजनं; 'r. s a careful consideration' निपुणमवेक्षणीय:, निपुणावेक्षणमर्हति. **-ment,** *s.* Ex. by (*v.*); 'all the r. s of man' यद्यन्नरैरपेक्ष्यते or इष्यते. **-Requisite,** *a.* आवश्यक (कीं *f.*), अवश्यक, आकांक्षित, अपेक्षित. **-s.** अवश्यक-वस्तु-द्रव्यं, अपेक्षितं. **-Requisition,** *s.* प्रार्थना-नं, अपेक्षा, आकांक्षा.

Requite, *v. t.* प्रति-दा 3 U, प्रतिफलं दा, प्रत्युपकृ 8 U, निस्तृ c.; *See* **Recompense, Repay;** (grudge &c.) प्रतिकृ, निर्यत् 10, शुध् c., साध् c. **-al,** *s.* प्रति-दानं, प्रतिफलं, निस्तार:, निष्कृति *f.*, प्रत्युपकार:, पारितोषिकं, निर्यातनं. **2** प्रति(ती)-कार:, प्रतिक्रिया, शुद्धि *f.*; साधनं.

Rescind, *v. t.* विलुप् c., खंड् 10, निरस् 4 U, निवृत् c. **-Rescission,** *s.* वि-,लोप:, खंडनं, निरसनं; *See* **Repeal.**

Rescript, *s.* *See* **Counterpart.**

Rescue, *v. t.* मुच् 6 P or c., मोक्ष् 10, वि-निर्-°, निस्तृ c., उद्-धृ 1 P or धृ 10; परि-त्रै 1 A, रक्ष् 1 P; *See* **Protect.** **-s.** वि-, मुक्ति *f.*, मोचनं, मोक्ष:-क्षणं, उद्धार:; परि-, त्राणं, रक्षणं, निस्तार:, तारणं; 'on, on, to the r.' सत्वरं परित्रायार्थं. **-er,** *s.* उद्धर्तृ *m.*, त्राता, रक्षक:, मोक्षक:.

Research, *s.* अन्वेषणं-षा, निरूपणं, अनु-संधानं, जिज्ञासा, मार्गणं, विचारणा.

Resemble, *v. t.* सं-वद् 1 P (with instr.), अनुकृ 8 U (with gen.), अनुहृ 1 P (with acc.); 'the characters r. each other' संवदंत्यक्षराणि (Mu. 5); gen. by तुल्य, सदृश, समान, उपम, अनुरूप in comp., ('Like', q. v.); भव पितुरनुरूपो सुतै: (V. 5) 'r. your father in qualities'; देहबंधेन स्वरेण च रामभद्रमनुहरति, अस्य मुखं वध्वा मुखचंद्रेण संवदत्येव (U. 4). **2** उप-प्रति-मा 3 A, 2 P, समीकृ. **-ance,** *s.* सादृश्यं; सारूप्यं, तुल्यत्वं, संवाद:, साम्यं, औपम्यं, उपमा, अनुकार:, अनुहार:, तुला; साधर्म्यं (in qualities); 'to bear r.' सादृश्यं-तुलां-अधिरुह् or समारुह् 1 P; *See* (*v.*); (तुलां यदारोहति दंतवाससा K. v. 34). **2** प्रतिकृति *f.*, प्रतिरूपं, आलेख्यं; *See* **Picture.** **-ing,** *a.* संवादिन्, (न केवलम-स्मदृगसंवादिनी आकृति: U. 6); अनुरूप, तुल्य, सम, समान, अनुकारिन्, अनुहारिन्.

Resent, *v. i.* अभि-प्रति-कुध् 4 P (with acc.) कुध्-कुप्-रुष् 4 P, अपकारापेक्षया कुप्. **-ful,** *a.* क्रोधिल, क्रोधशील, समन्यु, सासूय, प्रत्यपकारबुद्धि. **-ment,** *s.* क्रोप:, क्रोध:, रोष:, अमर्ष:, मन्यु:; *See* **Indignant,** &c.

Reserve, *v. t.* सं-प्रतिसं-धृ 1 P, निग्रहु 9 P, **2** (आकालांतरात्) सं-चि 5 U, नि-धा 3 U, संगृह्, रक्ष् 1 P, अवसिच् 7 P or c., स्थाप् 10, 1 P, (temporarily); आपदर्थं धनं रक्षेत् 'should r. his money for times of want.' **3** गुप् 1 P, सं-वृ 5 U, अपह्नु 2 A, न स्पष्टीकृ, न विज्ञदीकृ. **-s.** संवरणं, संवृति *f.*, नि-अप-ह्नव:, मनोगुप्ति *f.* **2** नि-,यंत्रणा, निग्रह:, निरोध:; 'without any r.' विवृतं, निर्व्याजं, अनियंत्रणं, निर्यंत्रणं. **3** (Of disposition) वाग्यंत्रणं, कथा-आलाप-विरक्ति *f.*, पराङ्मुखता, अल्पभाषणं, वाग्यतत्वं. **4** संचय:, संग्रह:. **5** (Of an army) प्रति-परि-ग्रह:, प्रत्यासा(स)र:, पार्ष्णिजं सैन्यं. **-ation,** *s.* गोपनं, निग्रह:, संहार:, गुप्ति:, अपवारणं **2** नि-अप-ह्नव:, मनोगुप्ति:, संतरणं, संवृति:. **3** परिवर्जनं, अपवाद:, व्यावृत्ति *f.*; 'with this r. only' अथमेव तस्यापवाद:. **4** संग्रह:-हणं, संचय:. **-ed,** *a.* रक्षित, गुप्त, अवशेषित. **2** संवृतिमत्, गूढभाव, गुप्तांत:-करण, अनुत्तानहृदय, संवरणशील; वाग्यत, यंत्रितवाक्, कथा or आलाप-विरक्त or विमुख, अल्पभाषिन्, अल्पालापिन्. **-edly,** *adv.* गूढभावेन, संवृतचेतसा. **-Reservoir,** *s.* जलाशय:, तडाग:-गं, जलाधार:, तोयाधार:, वापी.

Resetter, *s.* लोप्त्रग्राहिन् *m.*

Reside, *v. i.* वस् 1 P, नि-प्रति-°; अधि-ष्ठा 1 P, अधिवस् (with acc.); निली 4 A; आशि 1 U, वृत् 1 A; *See* **Dwell.** **2** सद् 1 P; अवशिष् pass. **-ence,** *s.* स्थिति *f.*, वसति *f.*, वर्तनं, अधिष्ठानं, वास:; 'r. abroad' प्रवास:. **2** वसति:, वासस्थानं, नि-वास:, गृहं, आ-नि-लय:, आश्रय:, अधिष्ठानं, स्थानं, निकेतनं; *See* **House,** 'change of r.' स्थलांतरगमनं. **-ent,** *s.* नि-,वासिन्, or by deriv., 'r. of this or that place' अत्रत्य:; तत्रत्य:; आयोध्यिक:, कौशांचीय:, &c. **-a.** नि-,वासिन्, स्थ, वर्तिन् in comp.; आश्रित, कृतालय. **-Residue,** *s.* अव-,शेष: -र्तिष्ट. **-al, -ary,** *a.* अव-शिष्ट, शेष in comp.

Resign, *v. t.* परि-,त्यज् 1 P, उत्-वि-सृज् 6 P, हा 3 P, प्रत्यादिश् 6 P, पराक्षिप् 6 P, *See* **Abandon.** **2** सं-,ऋ c. (अर्पयति), आयत्तीकृ, आ-नि-विश् c., समा-धा 3 U, न्यस् 4 U, निक्षिप्, प्रति-पद् c. **3** क्षम् 1 A, सह् 1 A; 'of those who r. themselves to you' त्वय्यावेशितचित्तानां, त्वत्स-माहितचेतसां; 'r. one's claims' स्वत्वं निवृत् c., अधिकारं त्यज्; 'r. oneself to his fate' दैवाधीनीभू. **-ation,** *s.* परि-,त्यागः, उत्सर्ग:, प्रत्यादेश:, पराक्षेप:; 'r. of one's claim' स्वत्वानि-वृत्ति:; 'written r.' त्यागपत्रं-लेख:. **2** सम-र्पणं, निक्षेपणं, न्यसनं, निवेशनं. **3** क्षमा, क्षांति *f.*, संतोषवृत्ति *f.*; 'r. to God' ईश्वराधीनता; ईश्वरेच्छानुवर्तनं. **-ed,** *a.* त्यक्त, अर्पित, न्यस्त, &c. **2** क्षमावत्, तितिक्षु, क्षांत, ईश्वरेच्छाधीन, ईश्वरन्यस्तचित्त.

Resilient, *a.* उत्पतिष्णु. **2** स्थितिस्थापक. **3** उल्लासित.

Resin, *s.* अ-,राल:, सर्जरस:, यक्षधूप:; *See* **Pitch.**

Sound, *s.* शब्दः, नि-,नादः, ध्वनिः, नि-,स्व-(स्वा)नः, निर्ह्रादः, स्वरः, निनदः, निर्-,घोषः, रावः, रवः, वि-सरावः नि-,स्वा(ध्व)नः, स्वनितं; 'musical s.' निक्वा(क्व)णः, क्वणितं; 'confused s.' कोलाहलः, कलकलः, तुमुलरवः; 'rattling s.' रणः, रणितं. **2** संधिसागरः. **-a.** सुस्थ, अरुग्ण, कल्ब, निरामय, अनामय, नीरोग, नीरुज, प्रकृतिस्थ, व्याधिरहित; (in body) अक्षतशरीर, अविकलेंद्रिय (in mind) अनुपहतचित्त, अविप्लुत, अवातुल, अविक्षिप्त. **2** अक्षत, अजातक्षत, अनिर्-व्रण, क्षत-व्रण-हीन. **3** ससार, सारवत्, सारगर्भ. **4** अविकल, अन्यून, अखंड, अभिन्न. **5** तीक्ष्ण, तीव्र; निर्भर, प्र-,गाढ, सु-अति pr.; 's. sleep' गाढनिद्रा; 's. beating' तीक्ष्णदंडः, अतिताडनं. **6** निर्दोष, निच्छिद्र, विशुद्ध, दोषहीन. **7** गाढ, ग(गं)भीर, अगाध, सुपरिणत, परिपक्व. **8** (Argument &c.) अखंडच, सप्रमाण, दृढ-सु-प्रमाण, न्याय्य, धर्म्य, युक्तिसिद्ध. **9** (In views) विशुद्धाचार; सत्यमार्गानुयायिन्. **-v. i.** नि-,नद् 1 P, ध्वन् 1 P, स्वन् 1 P, क्वण् 1 P, ऱ्हाद् 1 A, वि-,रु 2 P. स्तन्-रस् 1 P, शब्दं कृ 8 U, शब्दायते (D.). **-v. t.** ध्वन् c., स्वन् c., नद् c.; वद् c., आ-ध्मा 1 P, मुखमारुतेन पूर् 10, (trumpet, conch &c.); (drum) तड् 10, आहन् 2 U; 'the drum being s. ed' आहतायां भेर्यां; (bow) आस्फल् c. **2** परीक्ष् 1 A, सूक्ष्मं-निपुणं-निरूप् 10 or अनुसंधा 3 U, ज्ञा desid. (जिज्ञासते). **3** उद्-घुष् 10, प्र-ख्या c. (ख्यापयति), प्रकाश् c., प्रकटीकृ; 's. the depth' तलं अवगाह् 1 A; 's. the depth of water' जलवेधं परि-मा 3 A, 2 P. **-ing,** *a.* शब्दन, मुखर, शब्दायमान, निनादिन्, निनदत्, घोषण, गर्जत्, निर्ह्रादिन्, शब्दकर (री *f.*); 's. lead' लंबः, लंबसीसकं. **-s.** ध्वाननं, शब्दनं, वादनं. **2** वेधपरिमाण, तलावगाहनं. **-ly,** *adv.* तीव्रं, तीक्ष्णं, अत्यंतं, प्र-,गाढं; निर्भरं, दृढं, सुखेन, सु-अति pr. **-ness,** *s.* स्वास्थ्यं, कल्यता, आरोग्यं, अक्षतत्वं, निर्व्रणत्वं, अवैकल्यं, अन्यूनता, अखंडता, निर्दोषता, &c.; 's. of mind' चित्तस्वास्थ्यं, अविप्लवः.

Soup, *s.* जू (यू)षः-षं.

Sour, *a.* अम्ल, शुक्त, अम्लरस; 's to the teeth' दंतशठ. **2** कर्कश, परुष, दारुण, रूक्ष, अरुंतुद; सदावक्र, वक्र-वाम-शील, कर्कशस्वभाव, दुष्प्रकृति. **-v. t.** अम्लीकृ 8 U. **2** कर्कशीकृ, वक्रीकृ. **-v. i.** अम्लीभू 1 P, कर्कशीभू. **-ness,** *s.* अम्लता, कार्कश्यं &c.

Source, *s.* प्रभवः, योनि *f.*, मूलं, कारणं, हेतुः, प्रसूति *f.*, उद्भवः, संभवः, आदिः, उद्गमस्थानं; *See* **Origin;** 'to have s. in' प्र-भू 1 P, प्र-,जन् 4 A, उत्पद् 4 A (with abl.); लोभात्क्रोधः प्रभवति, लोभात्कामः प्रजायते (H. 1); 'the s. of the Ganges is in the Himalaya' हिमवतो गंगा प्रभवति (S. K.).

Souse, *v. t.* सहसा तु° or मज्ज् c. (मज्जयति) or जलेन सिच् 6 P. **-v. i.** **Pounce,** q. v.

South, *s.* दक्षिणा, दक्षिणदिक्-दिशा-आशा, अवाची; 'to the s.' दक्षिणतः, (with gen.). **-a.,** **-ern,-erly,** *a.* दक्षिण, अवाच्, अवाचीन, अवाच्य, दाक्षिणात्य; 'in a s. direction' दक्षिणेन (with acc. or gen.); 's. country दक्षिणापथः; 's.-east' दक्षिणपूर्वा, आग्नेयी; (*a.*,-ern-erly,) दक्षिणपूर्व, आग्नेय; 's.-west' दक्षिणपश्चिमा, नैर्ऋती; (*a.*,-ern, -erly) दक्षिणपश्चिम, नैर्ऋत. **-ward,-wards,** *adv.* दक्षिणाभिमुखं, दक्षिणतः, दक्षिणस्यां दिशि.

Souvenir, *s.* *See* **Memorial.**

Sovereign, *s.* स्वर्णमुद्रा. **2** अधिराजः, अधीश्वरः, अधिपतिः, महाराजः, अधीशः, सार्वभौमः, नृपतिः, सम्राज् *m.*, oft. by राजा, पालः, नाथः, &c.; *See* **King. -a.** परम, श्रेष्ठ, मुख्य, प्रमुख; *See* **Principal. 2** उत्कृष्ट, गुणावह (medicine &c.); 's. medicine' परमौषधं, महौषधं. **-ty,** *s.* प्रभुत्वं, राज्यं, आधिपत्यं, साम्राज्यं, ईशत्वं, स्वाम्यं, ईश्वरत्वं, इंद्रता in comp.; 's. of beasts' मृगेंद्रता. **2** (Authority) मुख्यश्रेष्ठ-अधिकारः, प्रधानाधिकारः.

Sow, *s.* सू(शू)करी, वराही, कोली. **-v. t.** वप् 1 P, आ-नि-°, (बीजानि) विकॄ 6 P, आरुह् c.; 's. dissensions' भेदं जन् c., भेदबीजानि वप्; 's. dragon's teeth' कलहबीजं वप्; 'as you s., so you reap' यो यद्वपति बीजं हि सोपि तल्लभते फलं; *See* also **Reap. -er,** *s.* वप्तृ *m.*, वापिन् *m.* वापकः. **-ing,** *s.* वपनं, वापः, उप्ति *f.*, बीजारोपणं.

Space, *s.* आकाशः-शं, शून्यं, दिगंतरं, रिक्तं, अंतरिक्षं, नभोमंडलं; 'infinite s.' अनंतं, महाकाशं; 'finite s.' घटाकाशं. **2** (Intervening s.) अंतरालं, मध्यं, अभ्यंतरं, अंतरं, अभ्यंतरावकाशः, व्यवधानं. **3** अवकाशः, अवसरः, प्रसरः, विषयः, स्थानं, स्थलं, भूमि *f.* **4** प्र-,देशः, दिश्-शा, दिग्भागः; 'pervading all s.' सर्वदिग्व्यापिन्, अभिव्यापिन्. **5** अंतरं, अध्वन् *m.*, देशः; 's. of time' अंतरं, अवधिः, कालावधिः, कालांतरं; oft. ex. by अभ्यंतरं; 'in the s. of six months' षण्मासाभ्यंतरे. **-Spacious,** *a.* विस्तीर्ण, विशाल, विपुल, विस्तृत, पृथु; *See* **Large. -ness,** *s.* विस्तारः, विस्तृति *f.*, वैपुल्यं.

Spade, *s.* खनित्रं, अवदारणं, स्तंबघ्नः.

Span, *s.* किष्कु-वितस्ति-*m. f.*; 'life's s.' जीवितावधिः; gen. ex. by words for 'Transitory' q. v., 'the s. of life is short' आयुः कल्लोललोलं (Bh. II. 82), कतिपयनिमेषायुषि जने (सति)) (Bh. II. 40); जीवितं तरलं &c. **-v. t.** प्र-परि-मा 3 A, 2 P.

Spangle, *s.* रजतपत्रं; धातुतारा **-v. t.** **Adorn,** q. v.

Spank, *v. t.* चपेटेन प्रहृ 1 P or तड् 10. **-v. i.** सवेगं चल् 1 P or विसृप् 1 P.

Spar, *s.* स्फटिकमृत्तिका. **2** दीर्घयष्टि *f.*-काष्ठं, दारुखंडः, **-v. i.** परिहासेनु मुष्टीमुष्टि युध् 4 A.

Spare, *v. t.* रक्ष् 1 P, सं-चि 5 U, (money); न व्ययय् 10 (व्यययति) or विक्षिप् 6 P, परिमितं प्र-विनि-युज् 7 A, 10; 'does not s. time' कालं विक्षिपति-हरति; 'will you s. three hours for me' अपि भवान्मदर्थं प्रहरमेकं विनियोजयिष्यति. **2** क्षुद् 6 P, (वधात्, छेदात् &c.), त्यज् 1 P, हा 3 P, वि-उप क्षुद् 6 P. **3** अपेक्ष् 1 A, न अपेक्ष्, सुखेन त्यज्; oft ex. by 'not' with other words; 'but s. this tree' इमं वृक्षं तावन्मा छिंद्धि; 's. him' मुच्यतामसौ, न हंतव्यः; 'he can now be s. ed from my service' तस्य सेवया न मे प्रयोजनमस्ति, तस्य सेवां नापेक्षे, *See* **Dispense. 4** अव-,शिष् c., उद्-वृत् c. **-a.** उद्वृत्त, अव्यापृत, अधिक, अतिरिक्त. अव-,शिष्ट. **2** अल्प स्तोक, परि-,मित, अबहुल. **3** क्षाम, कृश. परि-,क्षीण, निर्मांस, शुष्क; *See* **Lean. -ing,** *a.* मितव्यय, अल्प-परिमित-व्ययिन्; परिमित, अल्प; 's. of words' अल्पभाषिन्; परिमितालाप. **-ingly,** *adv.* मितं, अल्पं, मितव्ययेन, अल्पशः, स्तोकशः; 'eating s.' मिताहार, मितभुज्. **-ness,** *s* कृशता, क्षीणता.

Spark, *s.* वि-,स्फुलिंगः अग्नि or ज्वलन-कणः or कणिका; कणः, कणिका, लवः, लेशः, अणुः. **2 Fop,** *q. v.* **-Sparkle,** *v. i.* स्फुर् 6 P, प्र-वि-°, तेजःकणान्-स्फुलिंगान्-उत्क्षिप् 6 P or विक्ष् 6 P; *See* **Shine** also; 's.-ing fitfully' क्षणनष्टदृष्टः (Mr. 5.). **-ing,** *a.* स्फुरत्, स्फुरत्प्रभ,दीप्तिमत् &c.; 's. wit' पुरःस्फुरंती मतिः, मतिविलासः.

Sparring, *s.* मुष्टियुद्ध, मुष्टीमुष्टियुद्धं. **2** विचारः.

Sparrow, *s.* चटकः, कलविंकः; 'female s.' चटका.

Sparse, *a.* विरल, अबहुल, अनिबिड.

Spasm, *s.* (अंग) संकोचः, आक्षेपः, आकर्षः, उद्वेष्टनं, व्यासः; 's. in the leg' पिंडिकोद्वेष्टनं; शूलं (with pain). **-Spasmodic,** *a.* सोद्वेष्टन, आकर्षिन, आक्षेपक, by (*s.*); 's. contraction' आकर्षः, संकोचः.

Spatter, *v. t.* अवसिच् 6 P or अवकृ 6 P, (पंकादिना.)

Spattle, Spatula, *s.* प्र-वि-लेपनी.

Spavin, *s.* संधिशोथः.

Spawl, *s.* निष्ठ्यूतं; *See* **Saliva.**

Spawn, *s.* अंड, मीनांडं, भेकांडं, &c. **-v.** अंडानि मोक्ष् 10 or प्रसू 2, 4 A.

Speak, *v. t.* वद् 1 P, वच् 2 P, भण्-गद् 1 P, भाष् 1 A, ब्रू 2 U, आलप् 1 P; *See* **Say;** वाचं-गिरं-उदीर् c. or उद्-ग 6 P; 's. of' अभि-धा 3 U, कथ् 10, निर्दिश् 6 P, वर्ण् 10; 's. ill of' अपभाष्, परि-अप-वद् 1 A, निंद् 1 P; 's. out' स्पष्टं-स्फुटं-वद्, प्रकाशं कृ; 's. well of' प्रशंस् 1 P; *See* **Praise;** 's. with,' 's. together' संवद्, संभाष्, संमंत्र् 10 A. **-er,** *s.* म-, वक्तृ *m.*, वाग्मिन् *m.*, वादिन् *m.* **-ing,** *s.* भाषणं, भाषितं, वचस् *n.*, उक्ति *f.*, व्याहारः; *See* **Speech** below. **-Speech,** *s.* वाच् *f.*, वाक्शक्ति *f.*, वाणी, गिर् *f.* **2** वाक्, वचः, गीः, वाणी, उक्तिः, व्याहारः, भाषणं, वचनं, आलापः, वाक्यं, भारती, सरस्वती, व्याहृति *f.* **3** भाषा, उक्तिः; 'eloquence of s.' शब्द-पद-लालित्यं; 'covert s.' भंगिभाषणं, व्याजोक्तिः; 'openig of s.' वाङ्मुखं; 'goddess of s.' वाग्देवी, भारती, सरस्वती; 'part of s.' शब्दजातिः-भेदः. **-ify,** *v. i.* **Harangue,** *q. v.* **-less,** *a.* मूक, वाग्हीन, स्तंभितवाक्. *See* **Mute.**

Spear, *s.* शूलः-लं, कुंतः, प्रासः, तोमरः, शक्ति *f.*, शल्यं; 'head of a s.' फलं, शूलाग्रं; 's.-man' शूलिन् *m.*, शूलधरः-भृत्, शूलपाणिः, प्रासिकः, कौंतिकः, शाक्तीकः, शक्तिधरः-ग्रहः. **-v.** *t.* शूलेन व्यध् 4 P.

Specie, *s.* मुद्रा, नाणकं.

Species, *s.* जाति *f.*, प्रकारः, भेदः, विशेषः; 'of the same s.' स-एक-जातीय; 'a s. of animal' प्राणिविशेषः-भेदः; 'genus and s.' **-सामान्यविशेषौ. -Special,** *a.* विशेष in comp., असामान्य, असाधारण (णी *f.*), अव्यापक, वैशेषिक (की *f.*), विशिष्ट, अवच्छेदकः; 's. duty' विशेषधर्मः; विशेषनियमः, समयविशेषः, &c. **2** लोकोत्तर, लोकबाह्य. **3** तद्धेतुक, तन्निमित्तक, तदुद्दिष्ट. **4** जातिवाचिन्, जाति in comp.; 's. characteristic' जातिधर्मः-लक्षणं. **-ly,** *adv.* विशेषतः, विशेषेण; सविशेषं, कार्यतः, प्रयोजनापेक्षया. **-ity, -ty,** *s.* विशेषः, विशेषधर्मः, विशिष्टता. **-Specific-, -al,** *a.* विशेष, जाति in comp.; विशिष्ट, असामान्य, जातिव्यक्ति-गत; 's. gravity' विशिष्टगुरुत्वं; 's. character' जाति-विशेष-धर्मः-लक्षणं. **-s.** 's. medicine' असाधारणगुणौषधं, विशिष्टौषधं. **-ically,** *adv.* जातितः, विशेषतः, सविशेषं. **-Specify,** *v. t.* (सविशेषं) निर्दिश् 6 P, कथ् 10, अभि-धा 3 U, उद्दाहृ 1 P, विशिष् 7 P or c., एकैकशः परिसं-ख्या 2 P or कथ्; विशेषं कथ् or ब्रू 2 U, अवच्छिद् 7 P. **-ied,** *a.* निर्दिष्ट, अवच्छिन्न, निर्दिष्ट-उक्त-लक्षण &c.; 'will be s. further on' अग्रे वक्ष्यते **-ication,** *s.* विशेषनिर्देशः-कथन-वर्णनं, व्यवच्छेदः, परिसंख्या, विशेषः.

Specimen, *s.* आदर्शः, प्रतिमा, प्रतिरूपं.

Specious, *a.* सत्यसंकाश-आभास-सन्निभ, आपातरमणीय, बहिः रमणीय, सुदृश्य, बहिरेव मनोरम. **-ly,** *adv.* सत्याभासपूर्वं. **-ness,** *s.* सत्याभासः.

Speck, Speckle, *s.* बिंदुः, चिह्नं, अंकः, कलंकः; तिलकः-कं. **2** शकलः-लं, कणः, लवः, अणुः, सूक्ष्मबिंदुः; 's. s of clouds' मेघशकलानि. **-v.** *t.* चित्र 10, चित्री-कबुरी-कृ 8 U; बिंदुभिः चित्र. **-ed,** *a.* चित्र, चित्रित, कबुरित, चित्रविचित्र, बिंदुचित्रित-चिह्नित, शबलीकृत, चित्रांग (गी *f.*); 'having a s. belly' चित्रोदर, पृषदुदर.

Spectacle, *s.* दृश्यं कौतुकं, आलोकः, चमत्कारः, स्थानं, दृष्टिविषयः. **3** (S. 8) उपनेत्रे, दृष्टिसहायौ.

Spectator, *s.* प्रेक्षकः, प्रेक्षकजनः-लोकः, द्रष्टृ *m.*; (in an audience &c.) पारिषद्यः, सामाजिकः, पार्षदः.

Spectre, *s.* भूतः, पिशाचः, छायाः, वेतालः, प्रेतः; 'to raise a s.' वेतालं उत्था c., छायां उद्भू c.

Specular, *a.* आदर्शगुणकः.

Speculate, *v. i.* विचर् c., वितर्क् 10, वि-मृश् 6 P; *See* **Consider. 2** बहुलाभापेक्षया क्री 9 U; अविचारेण दैवाधीनं कर्म कृ 8 U. **-ion,** *s.* विचारः, वितर्कः, विमर्शः, वासिकल्पना. **2** कल्पना, प्र-,युक्ति *f.*, उपायः. **-ive,** *a.* विचारवत्, विचार-ध्यान-शील. **2** काल्पनिक-मानसिक-(की *f.*), अव्यवहार्य, अप्रवर्तनीय, अव्यवहारानुरूप, व्यवहारायोग्य. **-or,** *s.* कल्पकः, विचारकः. **2 Philosopher,** *q. v.*

Speculum, *s. See* **Mirror.**

Speed, *s.* वेगः, प्र-,जवः, रंहस् *n.*, रयः, जवनं, त्वरा, रभसः, तरस् *n.*, शीघ्रता, तूर्णि *f.* **-v.** *i.* त्वर् 1 A, शीघ्रं-सवेगं गम् or चल् 1 P. **2** सिध् 4 P, सफलीभू 1 P; *See* **Prosper, Succeed. 3 Fare,** *q. v.* **-v.** *t.* त्वर् c. (त्वरयति). **2** पुरस्कृ, उपकृ, सिध् c. (साधयति); शुभं-कल्याणं-कृ 8 U. **3 Ruin, Kill,** *q. v.*; 'God s. I' शिवास्ते पंथानः संतु (P. I. 1), शिवस्ते पंथाः भूयात् (S. 4); विजयी भव. **-Speedy,** *a.* शीघ्र, त्वरित, सत्वर, अविलंबित, द्रुत, सजव, वेगवत्, जवन, महावेग, शीघ्रगति; *See* **Prompt** also; better by 's.-ly'. **-ily,** *adv.* आशु, शीघ्रं, सत्वरं, झटिति, त्वरितं, तूर्णं, अविलंबं, सपदि. **2** सरभसं, सवेगं. **-iness,** *s.* जवनता, वेगवत्त्वं, शीघ्रता &c.

Spell, *s.* मंत्रः, अभिचारमंत्रः (magic); मोहनं, आकर्षणं; 's.-bound' अभिमंत्रित, मंत्रमुद्धवीर्य. **-v.** *t.* अभिमंत्र् 10 A, अभिचर् c., मंत्रैः वशीकृ 8 U, वि-,मुह् c. **2** अक्षराणि निर्दिश् 6 P, यथाक्षरं सं-ख्या 2 P or पठ् 1 P or लिख् 6 P. **-ing,** *s.* वर्ण or अक्षर-न्वि-न्यासः or रचना; 'having a double s.' द्विरूपः; 'variation in s.' पाठांतरं, पाठभेदः.

Spend, *v. t.* उद्-वि-सृज् 6 P, परि-,व्यय् 1 P. व्यय् 10 (व्यययति). विनि-युज् 7 A, 10; 'good men, like clouds, take (things) for s ing (them)'. आदानं हि विसर्गाय सतां वारिमुचामिव (R. iv. 86); 's.-ing on proper objects' पात्रे व्ययः. **2** अव-,सद् c., क्षि 5 P or c., नश् c., अप-चि 5 U. क्षीणीकृ 8 U, विक्षिप् 6 P; *See* **Exhaust;** 'spent with toil' श्रमखिन्न, श्रमावसन्न. **3** (Time) क्षे c. (क्षपयति), गम् c., नी 1 P, या c., अतिवह् c.; *See* **Pass;** 's in vain' क्षिप्, हु 1 P. **-ing,** *s.* व्ययः, वि-उत्-सर्गः, त्यागः, विनियोगः; पापनं, हरणं, विक्षेपः. **-Spendthrift,** *s.* अतिव्ययिन् *m.*, त्यागशीलः, मुक्तहस्तः, अर्थनाशिन् *m.*

Sperm, -atic, *See* **Semen,** &c.

Spew, *v. t.* वम् 1 P, छर्द् 10, नि-,क्षिप् 1, 4 P.

Sphere, *s.* गोलः-लं, वर्तुलं, मंडलं; *See* **Orb:** 'celestial s.' व्योम-नभो-मंडलं. **2** नियोगः, विषयः, अधिकारः, धर्मः, प्रकरणं. **3** मंस्थिति *f.*, अवस्था, दशा (in life). **-Spherical,** *a.* गोलाकार, वर्तुल, गोल. **-Spheroid,** *s.* उपगोलः, अंडाकृतिः. **-al,** *a.* गोलप्राय-कल्प, उपगोल. **-Spherule,** *s.* गोलकः, लघु-क्षुद्र-गोलः.

Sphygmograph, *s.* नाडीस्फुरण (स्पंदन)-लेखनयंत्र.

Spice, *s.* गंधद्रव्यं; 'the three s. s.' त्रि-जातकं. **-v.** *t.* वासय् 10, आधे-सु-°. **-ed, -y,** *a.* वासित, सगंध, सुगंध, मिष्ट, सुरस.

Spider, *s.* ततुवायः, ततुनाभः, तंत्रवायः, ऊर्णनाभः, लूता, मर्कटकः, जालिकः, कोश(ष)कारः, अष्टपदः.

Spike, *s.* शस्यमंजरी; काणिशं, धान्यशीर्षकं. **2** महाकीलः, शंकुः, शूलः-लं, कंटकः, **-v.** *t.* कील् 10. **-ed,** *a.* शंकुपृक्त; कीलित, शंकुबद्ध. **-y,** *a.* तीक्ष्णाग्र, सूचिपत्र, कीलनिचित.

Spikenard, *s.* जटामांसी, तपस्विनी, जटिला लोमशा, म(मि)मि-मी-पि-पी *f.*, नलदा.

Spill, *s.* शलाका. **-v.** *t.* (अकस्मात्) अवक्षिप् 6 P; अव-, पत् c., निः-,सु c.; 'blood' रुधिरं सृ c., रुधिरार्द्रं कृ 8 U. **-v.** *i.* सू 1 P, पत् c. pass.

Spin, *v. t.* (तंतून्) कृ 8 U, जन् c., तंत्र 8 U, सूत्र् 6 P, वे 1 P, कृत् 6 P; 'the spider s. s out its web (threads) from itself' तंतुनाभः स्वत एव तंतून् सृजति (S. B. 477). **2** निष्कृष् 1 P, निर्गसृ c. **3** परिवृत् c. परि-,भ्रम् c., घूर्ण् c. **-v.** *i.* भ्रम् 1, 4 P, परिवृत् 1 A. **-ner,** *s.* तंतुवायः-पः, कर्तकः. **-ning,** *s.* तंतुवायः वापः, तांतवं, तंतुकरणं.

Spindle, *s.* तकुं *f.*, तकुंडी-डं; 's.-shanked' श्रोणिजंघ, पृथ्वी, दीर्घजंघ.

Spine, *s.* पृष्ठवंशः, कशेरु *m. n.*, कशेरुका, पृष्ठास्थि *n.*

Spinous,-Spiny, *a.* सकंटक.

Spinster, *s.* सूत्रकर्तिका. **2** अनूढा, अविवाहिता.

Spiracle, *s.* छिद्रं, सूक्ष्मरंध्रं, वायुमार्गः.

Spire, *s.* व्या-आ-वर्तनं, आवर्तः, व्यावर्तनरेखा. **2** शिखरं, शृंगं, शिखा. **-al,** *a.* वि-,आवर्तिन्, चक्राकार. **-ally,** *adv.* चक्राकारेण.

Spirit, *s.* प्राणाः, असवः,(pl.). **2** आत्मन् *m.*, देहिन् *m.*, क्षेत्रज्ञः; *See* **Soul;** the supreme s.' परमात्मा, ब्रह्म. **3** चित्तं, मनस्-चेतस्- *n.*, वृत्ति *f.*, भावः; 'low-s.-ed' लघुचेतस्, क्षुद्रमनस् 'proudness of s.' चित्तसमुन्नति *f.*, चित्तोद्रेकः; *See* **Pride;** 'in good s. s', 'in high s. s' सोल्लास, प्रहृष्ट, प्रमुदितचित्त; हर्षवृत्ति; 'high s. s.' उत्साहः, उल्लासः, प्रफुल्लता, प्रहर्षः; 'low s. s' विषादः, उद्वेगः; 'in low s. s' उद्विग्न, विषण्ण, उदासीन; *See* **Dejected.** **4** सत्त्वं, तेजस् *n.*, वीर्यं, प्रभावः, ऊर्जः, उत्साहः. **5** भावः, भावार्थः, उद्देशः; 'he obeyed my order in s. only' भावार्थमेव गृहीत्वा ममाज्ञामनुष्ठितवान्. **6** सारः, तत्त्वं, सत्त्वं, सारांशः, जीवितं, जीवनं; 'Ojas is the s. (soul) of prose' ओजः गद्यस्य जीवितं (Kav.). **7** प्रकृति *f.*, शीलं, स्वभावः, वृत्तिः; 'gentle s.' स्वभावसौजन्यं, शांतशीलता; 'of a noble s.' उदारप्रकृति. **8** भूतः, वेतालः; 'evil s.' रक्षस् *n.*, राक्षसः, पिशाचः, अपदेवता. **9** प्रेतः, परेतः, छाया. **10** (Of style) ओजस् *n.*, ऊर्जः; रसः. **11** (S. s) सुरा, मद्यं; *See* **Liquor.** **-v.** *t.* (up) आश्वस् c., उज्जीव् c., उत्तिज् c. **-ed,** *a.* सत्त्ववत्, सोत्साह, तेजस्विन्, वीर्यवत्, ससत्त्व; 'a s. speech' ऊर्जिताश्रयं वचनं. **2** ओजस्विन्, सरस. **-edly,** *adv.* सोत्साहं, ससत्त्वं. **-less,** *a.* निःसत्त्व, तेजोविहीन; निस्तेजस्, निर्वीर्य, नीरस. **-uous,** *a.* मादिन्, मादक; 's. liquor' सुरा, मदिरा, &c. **-Spiritual,** *a.* अध्यात्म in comp.,(अध्यात्मज्ञानं), आध्यात्मिक (की *f.*); निरवयव, निराकार, चिद्रूप, अमूर्त, परम. **2** पारत्रिक-पारलौकिक-पारमार्थिक-(की *f.*), मानसिक-सात्त्विक-(की *f.*). **3** धार्मिक(की *f.*), धर्म in comp.; असांसारिक-अलौकिक-(की *f.*); 's. preceptor' उपाध्यायः; 's. father' धर्मतातः-पितृ *m.* **-ism,** *s.* ब्रह्मवादः, ज्ञान-निवृत्तिमार्गः. **-ist,** *s.* ब्रह्मवादिन् *m.* **-ity,** अमूर्तता, असांसारिकता, परमार्थनिष्ठा. **-ly,** *adv.* परमार्थदृष्ट्या, परमार्थतः; 's. minded' परमार्थदृष्टि-बुद्धि, परमार्थासक्त, ब्रह्मनिष्ठ संसारव्यावृत्त.

Spit, *v. t.* नि-,ष्ठिव् 1, 4 P, उद्वम् 1 P, निःसृ c.,उद्-गॄ 6 P. **2** शूला कृ 8 U, शूलं आरुह् c. **-v.** *i.* ष्ठिव्, श्लेष्माणं-लालां निःसृ. **-s.,** **-ting,** *s.* निष्ठ्यूति *f.*, नि-,ष्ठीवः-वनं, उद्वमनं, उद्गिरणं; 's. ing-pit, spittoon' प्रतिग्राहः, पतद्ग्रहः. **2** शूलः-लं; 'roasted on a s.' शूल्य, शूलाकृत, भटित्र. **-Spittle,** *s.* नि-,ष्ठ्यूतं, ष्ठीवनं, मुखस्रावः, लाला; *See* **Saliva.**

Spite, *s.* वि-,द्वेषः, ईर्ष्या, असूया, द्रोहः, मात्सर्यं; 'in s. of' अनादृत्य (with acc.), gen. ex. by gen. or loc. abs.; पश्यतोपि गुरोः, तिष्ठत्सु लोकपालेषु वुवूर्षति नलं पतिं; 'snatches away, in s. of our looking on' मिषतां नः आच्छिनत्ति (K. II. 46). **-v.** *t.* वि-,द्विष् 2 U; द्रुह् 4 P, ईर्ष्य् 1 P (with dat.). **-ful,** *a.* सासूय, विद्वेषिन्, मत्सरिन्, सेर्ष्य, द्रोहबुद्धि, दुष्टभाव; *See* **Malicious.** **-fully,** *adv.* सासूयं, द्वेषात् द्वेष-द्रोह-बुद्ध्या, सेर्ष्यं, मात्सर्यात्.

Splash, *v.* आस्फल् c., (आस्फालितं यत्प्रमदाकराग्रैः R. XVI. 13), क्रीडायां तड् 10; इतस्ततः विक्षिप् 6 P. **-s.,** **-ing,** *s.* आस्फालनं, विक्षेपः, आस्फालनशब्दः-नादः; 'the log fell down with a s.' काष्ठखंडः पतितो जलमास्फालयत्.

Spleen, *s.* प्लीहन् *m.*; प्लीहा, गुल्मः; 'enlargement of the s.' प्लीहाभिवृद्धि *f.*, प्लीहोदरं. **2** संरंभः, मन्युः; 's.-wort' प्लीहघ्नः, प्लीहशत्रुः. **-Splenetic,** *a.* प्लीहरोगिन्. **2** वक्र-कर्कश-शील, पिशुन, कर्कश.

Splendid, *a.* भासुर; उज्ज्वल, भास्वत्, अतितेजस (सी *f.*), अतिशोभन, सुप्रभ, अतिप्रभ, अतिदीप्तिमत्; महातेजस्, 'a s. dress' उज्ज्वलवेशः, उदारनेपथ्यं. **2** श्रेष्ठ, प्रशस्य, परम, विशिष्टतम,अभिनंद्य,(success). **3** महाप्रताप, प्रतापवत्; *See* **Majestic.** **-ly,** *adv.* उज्ज्वलं, सुप्रभं, अतिशोभया, अतिप्रतापेन; 's. dressed' उज्ज्वलवेशधारिन् **-Splendour,** *s.* शोभा, तेजस् *n.*, श्रीः, प्रभा, औज्ज्वल्यं, भासुरत्वं, अति-शोभा-कांति-दीप्ति *f.*, महातेजः, प्रतापः, विभूति *f.*, वैभवं.

Splice, *v. t.* संयुज् 7 U, 10.

Splint, **-er,** *s.* (काष्ठ-) खंडः, शकलं, विदलं, भिन्नं. **-v.** *t.* वि-दॄ 9 P or c.; *See* **Tear.** **-v.** *i.* वि-दल् 1 P. स्फुट् 6 P, विभिद् pass.

Split, *v. i.* स्फुट् 6 P, वि-,दल् 1 P, भंज्-विभिद्-विदॄ-pass., त्रुट् 4, 6 P, शकलीभू 1 P, **-v.** *t.* स्फुट् c., वि-,दॄ 9 P or c., वि-,पट् 10, वि-,भिद् 7 P or c., भज् 7 P, खंड् 10, वि-,छिद् 7 P, त्रुट् c., विदल् c. (दलयति), शकलीकृ 8 U. **-s.** वि-,भेदः, भंगः, विदरः, स्फु(स्फो)टनं,

भिदा, छिद्रं, रंध्रं. **-ting,** *s.* विदारणं, विपाटनं, विदलनं, &c.

Spoil, *v. t.* मलिनीकृ 8 U, कलुषी-आविलीकृ, मलिनयति-कलुषयति-आविलयति (D.), दुष् c. (दूषयति), (fig. also), विकृ; विप्रकृ; भ्रंश् c. (सत्पथात्). **2** अत्यंतं लल् 10, अत्यंतं छंदं अनुवृत् 1 A or अनुरुध् 4 A. **3** लुंट् 1 P, 10, अप-हृ 1 P. **4** नश् c., उप्-विध्वंस् c., उच्छिद् 7 P, दुष् c. **-v.** *i.* दुष् 4 P, नश् 4 P. **-s.** युद्धलब्धं धनं, लुंटितं लोप्त्रं, लोप्त्रं, अपहारः, 's. of cattle' गोग्रहः. **-ed,** **-Spoilt,** *a.* दूषित, मलिनीकृत, नाशित, उच्छिन्न. **2** अतिलालित, दुर्ललित; लालनात् दूषित. **-er,** *s.* अपहारकः, लुंटाकः, दूषकः, उच्छेदकः.

Spoke, *s.* अरः-रं, सक्थि *n.*; 's. s are fixed on to the nave' नाभौ अराः प्रतिष्ठिता; 'a wheel having long s. s' दीर्घसक्थि चक्रं.

Spokesman, *s.* मुखं, (त्वं मम मुखं भव V.1), वक्तृ *m.*

Spoliate, *v. t.* लुंट् 1 P, 10, अपहृ 1 P. **-ion,** *s.* अप-हारः- हरणं, लुंठनं.

Sponge, *s.* **Sponger,** q. v. **-y,** *a.* विरल-शिथिल-अवयव. **-Sponger,** *s.* परान्नपुष्टः, परपिंडादः, पात्रेसमितः.

Sponsor, *s.* धर्मप्रतिभूः-प्रतिनिधिः.

Spontaneous, *a.* यादृच्छिक-ऐच्छिक- (की *f.*), स्वेच्छानुरूप, स्वतःप्रवर्तित, यदृच्छा or स्वेच्छामूलक or पूर्वक, कामहेतुक, अयत्नकृत-भूत, यदृच्छा-स्वेच्छा-काम-in comp. **-ly,** *adv.* स्वेच्छातः,स्वेच्छया, यदृच्छया,स्वेच्छानुसारेण, स्वयं, स्वतः, स्वेच्छापूर्वं, कामतः, अंतःप्रवृत्त्या, अयत्नेन, सहजावबोधेन. **-ness,** **-Spontaneity,** *s.* यदृच्छा, स्वेच्छा, कामः, रुचि *f.*

Spoon, *s.* चमसः-सं, कंबि-बा *f.*, दर्वि-र्वी *f.*, खजाका; *See* **Ladle;** 'wooden s.' दारुहस्तकः, तर्दू *m.* **-ful,** *s.* Ex. by (*s.*); 'two s. s' दर्वीद्वयं, चमसद्वयमात्रं.

Spoor, *s.* श्वापदपदवी, वनपशुपद्धति *f.*

Sporadic, *a.* *See* **Single.**

Sport, *v. i.* वि-हृ 1 P, क्रीड् 1 P, विलस् 1 P, रम् 1 A, खेल् 1 P. **2** मृगयां कृ 8 U, आच्छोदनं कृ. **3** परिहस् 1 P. **-s.** विहारः, क्रीडा, खेला, केलि *m. f.*, लीला, विलासः; 'boys' s.' फूर्दनं, क्रीडा, लीला. **2** मृगया, आच्छोदनं; आखेटः; 'to make the better s.' मृगयारसं वर्धयितुं, मृगयां अधिकफलदां कर्तुं. **3** अव-उप-हासः; विडंबना; *See* **Mockery.** **4** परिहासः, लीला, केलिः, नर्मन् *n.*; 'in s.' परिहासेन, लीलया; 'uttered in s.' नर्मालापः, परिहासजल्पितं. **-ive,** *a.* (Of persons) क्रीडाशीलपर, विलासपर, खेलनपर, विहारिन्, विहार-केलि-प्रिय; *See* **Playful.** **2** उपहासगर्भ, नर्मप्राय, सपरिहास. **3** सविलास, सलील, सहेल, सखेल, उल्लसित. **-ively,** *adv.* सखेलं, लीलया, सलीलं, सविलासं. **-Sportsman,** *s.* मृगया-सेविन् *m.*- विहारी-शीलः, मृगयुः, व्याधः, लुब्धकः, शकुनिलुब्धकः.

Spot, *s.* स्थानं, स्थलं, पदं, प्र-,देशः, आस्पदं, भूमि *f.*, क्षेत्रं; 'on the spot' तत्रैव. **2** बिंदुः, अंकः, लांछनं, चिह्नं, लक्षणं, पदं; 's. on the body' तिलकः-कं; 's. on the moon' लक्ष्मन् *n.*, अंकः. **3** कलंकः, दूषणं. **-v.** *t.* बिंदुभिः चित्र् 10 or चिह्नयति (D.), कर्बुरीकृ 8 U, शबलीकृ, कल्माषयति (D.); oft. by चित्र-*a.*; 's.-ted deer' चित्रो मृगः, बिंदुलांछितो मृगः, चित्रांगः, कर्बुरितगात्रः, &c. **2** कलंकयति (D.), दुष् c. (दूषयति). **3** **Soil,** **Spoil,** q. v. **-less,** *a.* निष्कलंक, अकलंक, विशुद्ध, निष्कल्मष, निर्मल, अकलुष, अमलिन; अनिंद्य, निरवद्य, अनघ.

Spouse, *s.* परिग्रहीतृ *m.*, परिणेतृ *m.*, वरः, भर्तृ *m.*, पतिः. **2** भार्या, वधूः; *See* **Wife.** **-al,** *s.* विवाहः, परिणयः, पाणिदानं-ग्रहणं; *See* **Marriage.**

Spout, *s.* नाली, प्रणालः-ली. **-v.** *t.* उत्क्षिप् 6 P,उदस् 4 U,बलवत् निरस् or निःसृ c. or उक्षिप् (fig.), उद्-गॄ 6 P, उद्गम् 1 P, निः-सृ c.,विसृज् 6 P. **-v.** *i.* सवेगं उद्वम् 1 P or निर्गम्, निःसृ 1 P, उत्सिच्-उत्क्षिप्- pass.

Sprain, *v. t.* अतियत्नेन (संधीन् &c.) वितन् 8 U, आक्षिप् 6 P, अभिहन् 2 P. **-s.** संध्यभिघातः, स्नायुवितानः, अतिवितानः.

Sprat, *s.* नल-तल-मीनः.

Sprawl, *v. i.* सांगविक्षेपं स्वप् 2 P.

Spray, *s.* शी(सी)करः, तुषारः; 'bearing s. s' शीकरिन्, शीकरासारवाहिन्. **2** विटपः, शाखा, प्रशाखिका.

Spread, *v. i.* प्र-वि-सृप् 1 P, प्र-वि-सृ 1 P, वितन्-विस्तृ-विस्तॄ-pass., व्याप् 5 P, विजृंभ् 1 A, प्रचर् 1 P; (disease) संक्रम् 1 U, 4 P, संचर्, वि-सृप्; प्ररुह् 1 P, वृध् 1 A. **-v.** *t.* स्तृ 5 U, स्तॄ 9 U or c., वि-सं-आ-°; अव-वि-कॄ 6 P, (net &c.); वि-प्र-सृप् c., वि-प्र-सृ c., तन् 8 U, प्र-वि-सं-आ-°, प्रवृध् c. **2** (Opinions &c.) प्र-सृ c., सं-प्र-चर् c., प्रवृत् c., प्रकाश् c., बहुलीकृ 8 U. **-s.** प्रसारः, प्रसरः,अभि-,वृद्धि *f.*, प्रवर्तनं, विस्तारः. **-ing,** *a.* प्र-वि-सारिन्, प्रसर्पिन्, प्रतानिन्, प्ररोहिन्; 'a s. creeper is वीरुध्' लताप्रतानिनी वीरुत्. **-s.** प्रसरः, विसर्पणं, वितति *f.*, प्रतानः, प्रवर्धनं.

Sprig, *s.* विटपः, शाखा, पल्लवः-वं, दलं, उपशाखा.

Sprightly, *a.* उत्साहवत्, प्रफुल्ल, सोत्साह; सोल्लास, प्रमुदित, उल्लसित, उल्लासवृत्ति. **-iness,** *s.* उल्लासः, प्रहर्षः, प्रफुल्लता.

Spring, *s.* वसंतः,-कालः-समयः, सुरभिः, मधुः, पुष्प-समयः-कालः, मधुमासः; 's. of life' प्रथमं वयः, अक्षतं यौवनं, अयातयामं वयः. **2** उत्सः, निर्झरः. स्रोतस् *n.*, वारिप्रवाहः, प्रस्रवणं; 's.-water' नैर्झरं जलं, निर्झरवारि. **3** प्रभवः, उद्भवः, मूलं, उत्पत्तिस्थानं, योनि *f.*; *See* **Origin.** **4** उत्प्लवः, प्लवः, प्लुतं-ति *f.*, उत्प्लुतिः, वल्गितं. **5** स्थितिस्थापकत्वविशिष्टः पदार्थः. -*v. i.* उद्भिद् pass.; प्ररुह् 1 P, स्फुट् 6 P, अंकुरयति (D.), *See* **Shoot.** **2** उत्पद् 4 A, प्र-,जन् 4 A, प्र-,सं-उद्-भू 1 P. प्रवृत् 1 A, उद्-इ 2 P, निःसृ 1 P; also by भव, संभव, उद्भव, जात, ज in comp.; 'sprung from a noble family' कुलज, कुलोद्भव, कुलसंभव, &c.; 'sprung from a royal family' राजवंश्य, राजवंशज. **3** परावृत्, परापत् 1 P, उत्पत्. **4** प्लु 1 A, वल्ग् 1 P; 's. up' उत्पत्, उत्प्लु; 's. over' लंघ् 1 A, 10, उत्प्लुत्य अति-इ; 's. upon' सवेगं आपत् 1 P or आक्रम् 1 U, 4 P, सरभसं आस्कंद् 1 P. **5 Split, Start,** q. v. -*v. t.* उत्था c. (उत्थापयति), प्रबुध् c. **2** उद्-भू c., उत्पद् c., जन्. c. **3 Burst, Split,** q. v.

Springe, *s.* पाशः; *See* **Snare.**

Sprinkle, *v. t.* सिच् 6 P, आ-नि-अव-, सं-प्र-अभि-उक्ष् 1 P; अवकॄ 6 P. **-er.** *s.* सेक्तृ *m.*, सेचकः, मोक्षकः. **-ing,** *s.* प्रोक्षणं, आ-अव-सेकः; 's. of' ex. by विरल *a.*, (विरंतुषारकणाः).

Sprite, *s.* *See* **Ghost.**

Sprout, *s.* मंजरी. **2** पल्लवः-वं, किस(श)लयः-यं; अंकुरः, प्ररोहः, उद्भिद्-अभिनवोद्भिद्-*m.*, उद्भिज्जः. -*v. i.* उद्भिद् pass., प्ररुह् 1 P, स्फुट् 6 P, उत्-,फुल्ल् 1 P, विकस् 1 P. **-ed,** *a.* उद्भिन्न, अंकुरित, पल्लवित, स्फुटित. **-ing,** *a.* उद्भिद्-ज्ज-द, प्ररोहिन्, अंकुरित. -*s.* उद्भेदः; प्ररोहः.

Spruce, *a.* विनीत, विनीतवेश; *See* **Neat.**

Spume,-y, *See* **Froth,-y.**

Spur, *s.* कंटकः. **2** नखः-खं (of a cock). **3** प्रोत्साहनं, उत्तेजनं, प्रचोदनं, उत्साहहेतुः-कारणं; *See* **Incitement, Incentive;** 'on the s. of the moment' पूर्वं अविचार्य or अनालोच्य, अविचारपूर्वं. -*v. t.* कंटकेन् उत्सह् c., प्रतुद् 6 P. **2** (On) नोत्सह् c., प्रचुद् 10; *See* **Prompt.**

Spurious, *a.* कृत्रिम, कल्पित, कपट-कूट-मिथ्या in comp.; *See* **Counterfeit, False.**

Spurn, *v. t.* (Away) लत्ताप्रहारेण प्रत्याख्या 2 P or निःसृ c. or प्रत्यादिश् 6 P. **2** प्रत्या-ख्या, अवधीर् 10, तिरस्कृ 8 U, निर्-अव-धू 5, 9 U, निराकृ, धिक्कृ, सावज्ञं प्रत्यादिश्; *See* **Scorn, Contemn**

Spurt, *s.* हठोद्यमः, महाप्रयत्नः. **2** सवेगः जलोत्क्षेपः. -*v. t.* सवेगं उत्क्षिप् 6 P or उदस् 4 U. -*v. i.* सवेगं निःसृ 1 P or निःसृ 1 P.

Sputter, *v.* अंबूकृ 8 U, सनिष्ठीवं वद् 1 P or उच्चर् c. -*s.*,**-ing,** *s.* अंबूकृतं, निष्ठीवनं.

Sputum, *s.* *See* **Spittle** under **Spit.**

Spy, *s.* चारः, चरः, अप(व)सर्पः, स्पशः, प्रणिधिः, गूढ or गुप्त-चरः or गतिः, गूढ-गुप्त-पुरुषः; पिशुनः, सूचकः, कर्णेजपः, रहस्याख्यायिन् *m.* (slanderous); 'see as a s.' अपसृप् 1 P, (स मया पौरजानपदानपसर्पितुं प्रयुक्तः U.1); 'the king sees by s. ce' चारचक्षुर्महीपालः. -*v. t.* दृश् 1 P, ईक्ष् 1 A; *See* **See.** **2** निरूप् 10, निरीक्ष्, अवेक्ष्, अनुसं धा 3 U.

Squab, *a.* ह्रस्वस्थूल.

Squabble, *See* **Quarrel.**

Squad, *s.* नवसैन्यदलं.

Squadron, *s.* (सैन्य-) गणः, गुल्मः-ल्मं, दलं, व्यूहः. **2** पोतावली, नौसमूहः.

Squalid, *a.* मलिन, कुत्सित, अमेध्य, अप-निकृष्ट, अधम, जघन्य; *See* **Dirty.**

Squall, *s.* चीत्कारः, चंडरवः, कलकलः, उत्क्रोशः, उच्चनादः-रवः. **2** (Of wind) चंडवातः, प्रभंजनः, प्रकंपनः. -*v. i.* उत्-व्याकुश् 1 P, उच्चैः रु 2 P or घुष् 10; *See* **Scream.**

Squander, *v. t.* अप-व्यय् 10 (व्यययति), विक्षिप् 6 P, मुधा क्षै c. (क्षपयति) or हृ 1 P, अमितं व्यय्, अतिव्ययं कृ. **-er,** *s.* अपव्ययकारिन् *m.*, अमितव्ययकारी, विक्षेपिन् *m.* **-ing,** *s.* अपव्ययः, विक्षेपः; अति-अमित-व्ययः.

Square, *s.* (In Arith.) वर्गः, कृति *f.*, द्विघातः; 's. root' वर्गमूलं, पदं; 'the root of the sum of their s. s' तत्कृत्योर्योगपदं; 'take the s. root' पदीकृ, (Li.). **2** (In geometry) वर्गः, समचतुरस्रः, समचतुर्भुजः. **3** चत्वरं, अंगनं-णं; *See* **Courtyard;** 's. formed by 4 houses' संजवनं, चतुःशालं. -*v. t.* वर्गीकृ 8 U, वर्गयति (D.), द्विः हन् 2 P or गुणयति (D.). **2** समीकृ, शुध् c.; समा-धा 3 U, प्रति-सं-आ-युज् 7 U, 10. -*v. i.* संवद् 1 P, युज्-उपपद्- pass.; *See* **Suit.** -*a.* समचतुर्भुज, समचतुरस्र. **2 Just,** q. v.

Squash, *v. t.* संमृद् 9 P, संपीड् 10, संपिष् 7 P, चूर्ण् 10 -*s.* संमर्दः, संपीडनं, चूर्णनं.

Squat, *v. i.* उत्कटुकासनं कृ 8 U, अवसक्थिकासनं कृ; अवनतसक्थि आस् 2A or उपविश् 6 P. **2 Cower,** q. v.

Squeak, Squeal, *v. i.* कर्कशं रु 2 P or नद् 1 P, वाश् 4 A. -*s.* कर्कशरवः-नादः, वाशितं, चीत्कारः.

Squeamish, *a.* विवमिषु, वमनोन्मुख (खी *f*). **2 Fastidious,** q. v. **-ness,** *s.* विवमिषा.

Squeeze, *v. t.* नि-सं-पीड् 10, संमृद् 9 P, निष्पिष् 7 P; (out) निर्गल् c., निष्कृष् 1 P, निर्दुह् 2 U; *See* **Crush, Press.** **-ing,** *s.* संपीडनं, संमर्दः-र्दनं, निर्गालनं, निष्पेषः, निष्कर्षः.

Squelch, *v. t.* निर्दल् 1 P, विध्वंस् 1 A. -*s.* आघातः, प्रहारः.

Squib, *s.* *See* **Satire.**

Squint, *v. i.* तिर्यक् दृश् 1 P or प्रेक्ष् 1 A, वक्रं वीक्ष्. -*s.* तिर्यक्-वक्र-दृष्टि *f.*; 's. eyed' वक्रदृष्टि, वालेर, केकर, केदर; तिर्यग्दृष्टि.

Squire, *s.* महाजनः, आर्यः, श्री pr. **2** सान्नहनिकः.

Squirm *v. i.* *See* **Writhe.**

Squirrel, *s.* काष्ठमार्जारः-बिडालः, वृक्षशायिका, चमरपुच्छः.

Squirt, *s.* धारायंत्रं. -*v. t.* उदस् 4 U, उत्क्षिप् 6 P, बलेन निःसृ c. or निरस्.

Stab, *v. t.* (छुरिकया &c.) व्यध् 4 P, भिद् 7 P, क्षण् 8 P, छुर् 1 P, 's. in the secret' परोक्षे मर्ममेदं कृ 8 U. -*s.* क्षतं, वेधः, त्वग्भेदः.

Stable, *a.* स्थिर, निश्चल, अचल, दृढ, स्थावर; *See* **Firm.** -*s.* मंदुरा, वाजि-अश्वशाला; (for elephants) वारी, गजबंधनी; (for cattle) गोशाला, गोष्ठ; 's.-keeper' अश्वपालः, मंदुरापालः. **-Stability,** *s.* स्थैर्यं, दृढता, सं-,स्थिति *f.*, स्थायित्वं, प्रतिष्ठा; *See* **Permanence.**

Stack, *s.* राशिः, सं-,चयः, संघः, उत्करः, चिति *f.* -*v. t.* राशीकृ 8 U, समाहृ 1 P, आ-सं-चि 5 U.

Staff, *s.* दंडः, यष्टि *f.*, वेत्रं (cane), लगुडः (wooden). **2** आलंबः-बनं, आधारः, आश्रयः. **3** वर्गः, गणः, अधिकारिगणः &c.; 's. of teachers' शिक्षकवर्गः-समुदायः.

Stag, *s.* हरिणः, मृगः, कुरंगः-गमः, एणः.

Stage, *s.* रंगः,-भूमि *f.*, शाला; नाट्यशाला, नेपथ्यं; 'behind the s.' नेपथ्ये. **2** मंचः-चकः. **3** (On a journey) वसति *f.*, (तिस्रो वसतीरुषित्वा R. VII. 33), प्रयाणकं; विश्रामस्थानं, अवस्थानं. **4** पदं, स्थानं, आस्पदं, वृत्ति *f.*, दशा, अवस्था. **5** (State of existence) आश्रमः, (वानप्रस्थाश्रमः), 'last s.' चरमावस्था; 'first s.' उपक्रमः, प्रथमारंभः; 's.-coach' अध्वगयानं, पथिकयानं; 's.-manager' सूत्रधारः; 's.-player' रंगोपजीविन् *m.*, नटः, नर्तकः.

Stager, *s.* ज्ञानवृद्धः, वृद्धः.

Stagger, *v. i.* प्रस्खल् 1 P, विचल् 1 P, भ्रम् 1, 4 P, घूर्ण् 1 A, 6 P, दोलायते (D.); सभयं-सचकितं-परावृत् 1 A. **2** विशंक् 1 A, विक्लृप् 1 A. -*v. t.* विचल् c., भ्रम् c., शंकां-विकल्पं-उत्पद् c.

Stagnant, *a.* स्थिर, निश्चल, निष्प्रवाह, निश्चेष्ट, गति or प्रवाह-हीन or रहित. **-Stagnate,** *v. i.* स्थिरीभू 1 P, ex. by (*a.*) with भू; 'when the stream of knowledge s. s' यदा ज्ञानस्रोतसो गतिरोधः भवति, ज्ञानस्रोतोगतिः कुंठिता भवति. **-ion,-Stagnancy,** *s.* अप्रवाहः, निश्चलता, गति-प्रवाह-अभावः, निश्चलता, स्थैर्यं.

Staid, *a.* धीर, ग(गं)भीर, स्थिर; *See* **Serious.**

Stain, *v. t.* (lit. and fig.) दुष् c. (दूषयति), कलकयति-मलिनयति-आविलयति-कलुषयति (D.), मलिनी-कलुषी-कृ 8 U, लिप् 6 P, लांछ् 1 P, समली-मलीमसी-कृ; 'what is the use of life s. ed by infamy (ignominy)' उपक्रोशमलीमसैः प्राणैः किं (R. II. 53); 's. ed by blood' रक्तमलिन; 'with s. ed hands' लितहस्त. **2** रंज् c. -*s.* कलंकः, अंकः, दूषणं, लांछनं, चिह्नं, कलुषं, मलं, मालिन्यं. **2** निंदा, उपक्रोशः, वाच्यता, वचनीयं, गर्हा. **-less,** *a.* निष्कलंक, निर्मल, अदूषण, अकलुष, कलंक-लांछन-हीन, निर्दोष, निरवद्य.

Stair, *s.* सोपानं, आरोहणं, पर्वन् *n.*, भंगिः-गी *f.*; 'flight of s. s,' 's.-case,' 's.s' सोपानपथः मार्गः पद्धति *f.*, परंपरा-पदवी-पंक्ति *f.*, निश्रेणी, अधिरोहिणी.

Stake, *s.* प्लवः, पणः. **2** कीलः, शंकुः, शूलः-लं; स्थाणुः, स्थूणा, शलाका. **3** संशयः, संदेहः; 'his life was at s.' संशयस्थं जीवितं तस्य, संशयितजीवित आसीत्, जीवितं संशयदोलाधिरूढं. -*v. t.* पण् 1 A, (with gen. of thing staked); शतस्य पणते 's s a hundred'. **2** शूलेन-कीलेन व्यध् 4 P or बंध् 9 P, कील् 10.

Stale, *a.* यातयाम, परि-,उषित, राज्यंतरित, निःसार, नीरस, असत्त्व; दुष्ट (जलं). **2** जीर्ण, पुराण, उच्छिष्ट. -*v. i.* मिह् 1 P, मूत्र् 10.

Stalk, *s.* काडः-डं, नालः-लं-ली; बंधनं, वृंतं, प्रसव-शस्य-बंधनं. **2** साटोपगति *f.*, धीरोद्धता गतिः. -*v. i.* साटोपं परिक्रम् 1 U, 4 P, उद्धतं-सगर्वं-चल् or गम् 1 P, धीरोद्धतं गम्; 's. ing-horse' **Pretext,** q. v.

Stall, *s.* पण्यवीथिका, पण्यगेहं, आपणः, विपणि *f.*; *See* **Shop** **2** शाला, स्थानं; (for horses) मंदुरा, अश्वस्थानं; (for cattle) गोष्ठं, गो-शाला-स्थानं.

Stallion, *s.* बीजाश्वः सवृषणः अश्वः.

Stalwart, *a.* दृढांग, प्रबल, **2** धीर, धृतिमत्.

Stamen, *s.* केसरः, पुंकेसरः.

Stamina, *s.* (fig.) सारः, सत्त्वं, तेजस् *n.*, बलसाधनं-हेतुः.

Stammer, *v. i.* स्खल् 1 P, असमंजसं जल्प् 1 P, स्खलद्वाक्येन-अस्पष्टवर्णैः-अस्फुटस्वरेण-गद्गदवाचा-वद् 1 P, अस्पष्टं-अस्फुटं-वच् 2 P. **-er,** *s.* अव्यक्त-अस्पष्ट-वादिन् *m.*, स्खलत्-गद्गद-वादी, स्खलितस्वरः. **-ing,** *s.* स्खलनं, अस्पष्ट-अव्यक्त-भाषणं.

Stamp, *s.* मुद्रा, मुद्रिका, मुद्रायंत्रं. **2** मुद्रा, चिह्नं, अंकः, न्यासः, पदं. **3** पादप्रहारः -आघातः-विष्टंभः. **4** स्व-,रूपं,आकारः,आकृति *f.*, प्रकृति *f.*, संस्कारः; 'of the common s.' सामान्यप्रकृति, प्राकृत; 'of high s.' महाप्रभाव, महानुभाव; 'of the same s.' समानरूप, तुल्य-स्वभाव-प्रकृति. **-v.** पादेन-पादतलेन-प्रहृ 1 P or आ-अभि-हन् 2 U, पादप्रहारं कृ 8 U. **2** अंक् 10, मुद्रयति-चिह्नयति- (D.), लांछ् 1 P; 's.-ed with infamy' दुष्कीर्तिचिह्नित, उपकोशमलीमस, अपयशांकित. **3** क्लृप् c., रच् 10, संवि-धा 3 U. **4** पादतलेन मृद् 9 P or चूर्ण् 10 or पिष् 7 P. **-ed,** *a.* अंकित, लांछित, समुद्र, कृतमुद्र, मुद्रांकित.

Stampede, *s.* ससंभ्रमं पलायनं.

Stanch, *a.* दृढ, स्थिर, धीर, अचल; 'a s. adherent' बद्धानुरागः सहायः, दृढपक्ष्यः; *See* **Firm.** **-v.** *t.* प्रवाहं-प्रस्रावं स्तंभ् 9 P or रुध् 7 U, शुष् c. **-v.** *i.* शुष् 4 P, स्तब्धप्रवाह *a.* भू 1 P.

Stanchion, *s.* क्षुद्रस्तंभः-स्थाणुः.

Stand, *v. i.* स्था 1 P, पद्भ्यां स्था. **2** वृत् 1 A, विद् 4 A, अव-स्था 1 A; *See* **Remain.** **3** भू 1 P, अस् 2 P, वृत. **4** निवृत्, विरम् 1 P, स्तंभ् pass., स्थिर-रुद्धगति-कुंठित- *a.* भू; 'this will remain a s.-ing stigma (on me)' वचनीयमिदं व्यवस्थितं (K. IV. 21); 'this argument will not s. long' इयं युक्तिर्न चिरं स्थास्यति, अचिरात् खंडयिष्यते. **-v.** *t.* सह् 1 A, मृष् 4 P, 10; *See* **Bear;** 'to s. the test' निकषपरीक्षां दृ 1 P, निकषं परीक्ष् pass. **2** उप-नि-रुध् 7 U; प्रति-वि-रुध्. **-against,** प्रत्यव-स्था, बाध् 1 A; विरुध् *See* **Oppose.** **-by,-near,** साहाय्यं कृ, संरक्ष् 1 P, परि-,त्रै 1 A, उपकृ; अनुग्रह्. **2** स्था, अव-स्था; अनुरुध् 4 A, अनुवृत्, 's. by your lord's orders' शासने तिष्ठ भर्तुः (V. 5); *See* **Obey.** **-for,** स्थाने-भूमौ स्था or वृत्. **2** पदं आप् desid. (ईप्सति). **-off,** अपसृ 1 P, दूरतः स्था. **-on,** आ-अव-लंब् 1 A, आ-स्था (A). आश्रि 1 U. **-out,** प्रलंब्, उन्नम् 1 P; *See* **Project.** **2 Persist,** q. v. **-over,** व्याक्षिप् pass. **2** अधि-ष्ठा, अध्यास् 2 A; 'his name s. s over all' स सर्वेषां मूर्ध्नि तिष्ठति. **-to,** संवद् 1 P; 'does not s. to reason' सयुक्तिकं-सोपपत्तिकं न भाति. **-up,** उत्था. **-s.** आधारः, भाजनं, पात्रं, उपष्टंभः, आश्रयः; 'ink-s.' मसीपात्रं-धानी; 's. of a lamp' दीपाधारः-वृक्षः. **2** मंचः. **3** अव-,स्थानं, पदं, स्थिति *f.*, अव-,स्तंभः, गतिरोधः-स्तंभः, कुंठनं; 'come to a s.' स्तब्ध-शांत- *a.* भू; 'bring to a s.' स्तंभ् 9 P or c., गतिं रुध् or वृ c.; at a s.-still' कुंठित, प्रतिहत-रुद्ध-गति; 'make a s. against' प्रतिबंध् 9 P, प्रत्यव-स्था (A), प्रति-विरुध्. **-ing,** *s.* अव-,स्थितिः, अवस्थानं, स्थायित्वं; 'of long s.' चिरस्थायिन्, दीर्घकालीन, पुराण; *See* **Old.** **2** स्थानं, पदं, आस्पदं, पदवी, प्रतिष्ठा; 'high s.' उच्चपदं, महती प्रतिष्ठा 'who has obtained a s. लब्धप्रतिष्ठः -a सनातन,चिर-नित्य-स्थायिन्; *See* **Lasting.** **2** स्थित, उत्थित, दंडवत् स्थित. **3** स्थ, स्थायिन्, वर्तिन्, अव-,स्थित in comp.; 'with the hair s. on their end' पुलकित, रोमांचित, कंटकित.

Standard, *s.* ध्वजः, पताका, केतुः, केतनं, वैजयंती; 's.-bearer' ध्वजिन्, पताकिन्. **2** मानं, प्र-परि-°, सूत्रं, विधिः, नियमः; 'a s. person' प्रमाणपुरुषः, प्रमाणं; 's. authors' प्रमाणभूताः (विशिष्टाः) ग्रंथकृतः.

Stanza, *s.* श्लोकः.

Staple, *a.* प्रधान, मुख्य, विशिष्ट. **-s. Market,** q. v. **2** लोहपुटः.

Star, *s.* तारा, तारका, नक्षत्रं, ज्योतिस् *n.*, उडुः, भं, ऋक्षं; 'the s. s collectively' उडुगणः, भगणः; 'shooting s.' नक्षत्रपतनं, उल्का; 's. under which one is born' जन्मनक्षत्रं; 's.-light' ताराप्रकाश, तारकित; (*s.*) ताराप्रकाशः. **-v.** *t.* तारासनाथ- *a.* कृ 8 U, तारकयति (D.); 'the breast s. ed with drops of tears' अश्रुबिंदुतारकितपयोधरा; 'the s. red heaven' तारासनाथं-तारकितं-नभः. **-ry,** *a.* तारासंकुल-मय (यी *f.*)-आकीर्ण-सनाथ, तारकित. **2** तारानिभ, तारा in comp.; 's. firmament' नभोमंडलं, नक्षत्रमंडलं.

Starboard, *s.* नौदक्षिणपार्श्वः.

Starch, *s.* मंडः-डं. **-v.** *t.* मंडयति (D.), मंडेन लिप् 6 P.

Stare, *v. i.* सूक्ष्मं-बद्धलक्ष्यं-स्थिरदृष्ट्या-अनिमेषलोचनाभ्यां-प्रेक्ष् 1 A or दृश् 1 P or आलोक् 1 A, 10, अनन्यदृष्ट्या निरीक्ष्, स्निग्धं निर्वर्ण् 10. **-s.** स्थिरदृष्टि *f.*, बद्ध-अनिमेष-दृष्टिः, अनन्यदृष्टिः. **-ing,** *a.* बद्ध स्थिर, अनन्य-अनिमेष-दृष्टि, बद्धलक्ष्य, विवृत-उत्फुल्ल-नयन-लोचन &c., उन्मीलिताक्ष.

Stark, *a.* समग्र, पूर्ण, केवल, अत्यंत, अशेष. **2** रूक्ष, विषम. **-adv.** केवलं, अत्यंतं.

Start, *v. i.* प्र-स्था 1 A, प्र-या 2 P, प्र-, चल् 1 P; यात्राभिमुखं प्रवृत् 1 A 's. on a journey' (Mal. 6). **2** स्फुर् 6 P, सहसा

कंप् 1 A or स्पंद् 1 A; 's. back' ससाध्वसं परावृत् or अपसृ 1 P, सचकितं व्यपसृ, चकित-*a.* भू; संत्रस्त-भयचकित- *a.* भू; 's. aside' स्वस्थानात् विचल् or भ्रंश् 1 A, 4 P or च्यु 1 A; अभिन्नगतयः शब्दं सहंते (S. 1) 'not s. ing aside &c.; 's. up' सहसा उत्था; (in sleep) सहसा अवबुध् 4 A.; (an idea) सहसा उद्भू or उत्पद् 4 A. **-v.** *t.* प्रवृत् c., प्र-स्तु c., संचल् c., प्रचर् c. **2** उद्विज् c., संत्रस् c., चकित-*a.* कृ 8 U, उत्था c. (उत्थापयति), भी c.; अकस्मात् त्रस् c. or कंप् c. **3 Propose,** q. v. **-s.** प्रस्थानं, प्रस्थानारंभः. **2** कंपः-पनं, स्फुरणं, साध्वसोत्कंपः, सहसाकंपः, आकस्मिकप्रकंपः; चकितं; 'gave a sudden s.' (सहसा) ससाध्वसं चकितो बभूव; 'with a s.' चकितं, सचकितं. **2** प्रवर्तनं, आरंभः, प्रचारः; 'to get or have the s. of' पूर्वं (with abl.) प्र-स्था or प्रारभ् 1 A; 'by s. s' सातत्यं विना, प्लुतैरिव, आकस्मिकयत्नैः.

Startle, *v.* *See* **Start;** 's. ing news' उद्वेगकरी वार्ता; in a very s. ed manner' चकितचकितं.

Starve, *v. i.* क्षुधया पीड् or अर्द् pass., आहाराभावात् मृ 6 A or अव-,सद् 1 P or नश् 4 P, क्षुधया अवसद्; (oneself) आहारं-अशनं-त्यज् 1 P, प्रायोपवेशनं कृ 8 U; 'likely to s.' आसन्नमृत्युरिव, अनशनेन मुमूर्षुरिव; (fig.) अव-,सद्. **-v.** *t.* अनशनेन मृ c. or नश् c.; 'be sure, I shall s. myself (to death)' मया प्रायोपवेशनं कृतं विद्धि (P. IV. 1). **-ation,** *s.* अनशनं, अनाहारः, आहाराभावः, क्षुधावसादः, क्षुत्क्षामता. **-ed, -ing,** *a.* क्षुधापीडित-अर्दित-आर्त, क्षुधावसन्न, निराहार, निरन्न.

State, *s.* अवस्था, दशा, भावः, स्थिति *f.*, वृत्ति *f.*, गति *f.*; त्वं-ता affixed. **2** राज्यं, राष्ट्रं, राजन् in comp.; 's. affairs' राजकार्याणि; 's.-servant' राजसेवकः. **3** ऐश्वर्यं, आडंबरः, आटोपः, प्रतापः, वैभवं, विभूति *f.*, श्रीः, गौरवं. **-v.** *t.* कथ् 10, आचक्ष् 2 A, वच् 2 P, वद् 1 P, नि-आ-विद् c., निर्दिश् 6 P, वि-ज्ञा c. (ज्ञापयति), वर्ण् 10, उपन्यस् 4 U; *See* **Tell, Say.** **-ed,** *a.* कथित, उक्त, निर्दिष्ट, वर्णित, &c.; 'as above s.' यथानिर्दिष्ट. **2** नियत, व्यवस्थित. **-ly,** *a.* सप्रताप, सश्रीक, सवैभव, उज्ज्वल; *See* **Majestic; Grand.** **2** साटोप, उद्धत, सखेल; 's. in gait' साटोपगामिन्, खेलगति-गामिन्, हंसगामिन्. **-adv.** साटोपं, उद्धतं, सखेलं, सलीलं, सप्रतापं. **-ment,** *s.* कथनं, आ-नि-वेदनं, उक्ति *f.*, वचनं, उपन्यासः, निर्देशः, विज्ञापना; 'clearness of s.' उपन्यासशुद्धिः. **-Statesman,** *s.* नीतिज्ञः-विद् *m.* -विशारदः, राजकार्यकुशलः-धुरंधरः, राजनीतिनिपुणः. **-ship,** *s.* नीतिज्ञता, नीति *f.*

Station, *s.* स्थानं, अव-,स्थिति *f.*, आस्पदं, स्थलं, पदं, अवस्थानं. **2** दशा, पदं, अवस्था, वृत्ति *f.*, पदवि-वी *f.*; 'high s.' उन्नतपदं, परमस्थानं, उन्नतावस्था; 's. of life' जाति *f.* **3** अधिकारः, नियोगः, पदं, पदविः-वी. **4** निवेशः. **-v.** *t.* स्था c. (स्थापयति), अव-सं-प्रति-°, निविश् c.; 's. in any post' पदे-अधिकारे-नियुज् 7 A, 10. **-ary,** *a.* स्थिर, अचल, निश्चल, अचर, स्थावर; अजंगम. **2** अवर्धिष्णु, अवर्धमान.

Stationer, *s.* लेखनसाधनविक्रयिन् *m.* **-y,** *s.* लेख-लिपि-साधन-सज्जा-सामग्री.

Statue, *s.* प्रतिमा, प्रतिकृति *f.*, मूर्ति *f.*; *See* **Image.** **-Statuary,** *s.* कारः in comp. with (*s.*), तक्षकः. **2** मूर्तिविधानं-करणं.

Stature, *s.* प्रमाणं, परिमाणं, उच्चता, मूर्ति *f.*, आकृति *f.*, आकारः; 'of low s.' अल्पप्रमाण; 'of dwarfish s.' वामनाकृति, खर्व, ऱ्हस्व; 'short in s.' ऱ्हस्व-अल्प-मूर्ति

Status, *s.* स्थिति *f.*, पदवी.

Statute, *s.* विधिः, नियमः, व्यवस्था; *See* **Law, Rule.** **-Statutory,** *a.* विधिप्रोक्त, व्यवस्थाकल्पित, नियत.

Stave, *s.* काष्ठखंडः-डं, फलकः-कं. **-v.** *t.* स्फुट् c., छिद्रयति (D.).

Stay, *v. i.* वस् 1 P, स्था 1 P, वृत् 1 A, अध्यास् 2 A; *See* **Dwell.** **2** विरम् 1 P; अलं with instr. or gerund. **-v.** *t.* स्तंभ् 9 P, प्रतिबंध् 9 P, उप-नि-रुध् 7 U, विलंब् c., निमति-वृ c.; नि-प्रति-षिध् 1 P; 's. one's progress' मार्गं निरुध् (Mr. 5.). **2** आ-अव-लंब् 1 A, आश्रि 1 U, आधृ 10, अव-उप-स्तंभ्; *See* **Prop.** **-s.,** **-ing,** *s.* नि-,वासः, अवस्थानं, अव-,स्थिति *f.* **2** आलंबः, आधारः, आश्रयः, उपघ्नः, उप-अव-ष्टंभः. **3** प्रतिष्टंभः, निरोधः, गतिरोधः, प्रतिबंधः. **-Stays,** *s.* अंगिका, चोलः-लं, कूर्पासकः.

Stead, *s.* स्थानं, भूमि *f.*; *See* **Instead** (of).

Steadfast, *a.* स्थिर, दृढ, सतत, अचल; निश्चल, धीर, स्थिरबुद्धि-वृत्ति, अचंचलवृत्ति; 's. in friendship' दृढमाहृद्. **-ly,** *adv.* दृढं, स्थिरं. **-ness,** *s.* स्थैर्यं, धैर्यं, धृति *f.*

Steady, *a.* स्थिर, दृढ, अचल, निश्चल, धीर, अस्खलित, धृतिमत्; सतत, अविश्रांत, अविरत; अविरतोद्योग, सदोद्यमिन्; 'of s. action' स्थिरकर्मा; 's. in resolution' स्थिर-दृढ-निश्चय-संकल्प. **2** अनुद्विग्न, अक्षुब्ध, अनाकुल, प्रशांत. **-v.** *t.* स्थिरीकृ 8 U, दृढयति (D.), दृढीकृ, व्यव-स्था c. (स्थापयति). **-ily,** *adv.* स्थिरं, दृढं, धीरं, अनवरतं, अविरतं, नित्यं, सदा, अविश्रांतं. **-iness,** *s.* स्थैर्यं, धैर्यं, अचापल्यं,

नित्यता, सातत्यं, अविच्छेदः, अविरति *f.*; 's. of conduct' अव्यभिचारः, आचारमर्यादा.

Steal, *v. t.* चुर् 10, मुष् 9 P, अपहृ 1 P, स्तेन् 10. **-v. i.** चुर्, स्तेयं वि-धा 3 U. **2** (Away) अलक्षितं-निभृतं-गम् 1 P or अपक्रम् 1 U, 4 P or अपसृ 1 P; निःशब्दं चल् 1 P; the night, the quarters of which (gradually) stole away' अविदितगतयामा रात्रिः (U. 1); 's. over, upon' अलक्षितं समाक्रम् or अभिभू or ग्रस् 1 A; 'sleep gently stole upon my eyes' शनैर्निद्रा निमीलितलोचनं मामकार्षीत्. **-er,** *s.* अपहर्तृ *m.*, अपहारकः, स्तेनः, स्तेयकृत्, चो(चौ)रः, मोषकः, तस्करः, हारी in comp.; 's. of hearts' हृदयचौरः. **-ing,** *s.* स्तेयं, चौरकर्मन् *n.*, स्तैन्यं, चौर्यं, मोषः, अपहारः. **-th,** *s.* अपहारः &c. **2** छलं, गूढं कर्म, चोरिका, निह्नवः, निभृत-प्रच्छन्न-कर्म; 'marriage by s.' चोरिकाविवाहः. **-thily,** 'by s.' *adv.* छलेन, निभृतं, प्रच्छन्नं, अलक्षितं, अप्रकाशं, सुगूढं, रहसि. **-thy,** *a.* निभृत, प्रच्छन्न, गुप्त, गूढ, रहस्य, अलक्षित, अप्रकाश, अव्यक्त.

Steam, *s.* बाष्पः; 's.-boat' 'steamer' अग्निनौका, बाष्पीयनौः. **-v. i.** बाष्पायते (D.), बाष्पं उत्-सृज् or उत्क्षिप् 6 P or उद्-गृ 6 P. **-v. t.** बाष्पेण व्याप् c., रिवद् c.

Steed, *s.* अश्वः, तुरगः, वाजिन् *m.*; *See* **Horse.**

Steel, *s.* चित्रायस, सारलोहं, पिंडायसं, तीक्ष्णायसं, शस्त्रकं. **2** शस्त्रं, शस्त्रकं; 's.-yard' तुलादंडः, मापनदंडः. **-a.** तीक्ष्णायस (सी *f.*). **-v. t.** काठिनीकृ 8 U, दृढीनिर्दयी-कृ.

Steep, *a.* दुरारोह, उत्सर्पिन्, पातुक, प्रवण, अतट. **-s.** प्रपातः भृगुः, अतटः. **-v. t.** नि-, मस्ज् c. (मज्जयति), स्ना c. (स्न-स्ना-पयति), जलेन आप्लु c. or सिच् 6 P. **2** सं-धा 3 U, वास् 10, भू c.; 's.ing indigo' नीलीसंधानं-पाचनं; 's. ed in perfumes' वासित, भावित.

Steeple, *s.* शिखरं शृंगं, (of a palace &c.)

Steer, *s.* वत्सतरः, दम्यः. **-v. t.** चल् c., वह् c., मार्गं उपदिश् 6 P (with gen.); नी 1 P, मार्गं निश्चि 5 U or निर्णी; 's. one's course' स्वमार्गं-कर्तव्यं-निर्णी; 'he who s. s the vessel of state' (निर्बाध) राज्यधुर्वहः, भुवनराज्यभारनौकर्णधारः (Ka. 56). **-er, -Steersman,** *s.* कर्णधारः-ग्राहः, कर्णिन् *m.*, नाविकः.

Stellar, *a.* तारा in comp.; *See* **Starry.** **-Stellate, -ed,** *a.* तारोपम.

Stem, *s.* बंधनं, वृंतं, प्रसवबंधनं. **2** प्र-, कांडः-डं; स्तंभः, नालं-लः. **-v. t.** प्रतिबंध् 9 P, प्रति-नि-रुध् 7 U, प्रति-ष्टंभ् 9 P, प्रत्यव-स्था 1 A, प्रतिकूलयति-प्रतीपयति (D.); *See* **Oppose.**

Stench, *s.* पूति *f.*, पूतिगंधः, दुर्गंधः.

Stentorian, *a.* अतितार, अत्युच्च; उरुस्वन.

Step, *s.* पदं, पद or पाद-न्यासः or विक्षेपः, क्रमः, पद-चरण-पातः, विक्रमः (as in त्रिविक्रमः); 'Vishnu took 3 s. s' विष्णुस्त्रीणि पदानि विचक्रमे. **2** पदं, क्रमः, (distance also): पर्यायः, परिपाटी, 'at every s.', 's. by s.' प्रति-अनु-पदं, पदे पदे, पदात्पदं, क्रमशः, पदशः; 'by s. s' क्रमशः, शनैः शनैः, क्रमेण; 'the first s.' प्रथमारंभः, उपक्रमः, प्रथमचरणः. **3** (Of a ladder) भंगि *f.*, सोपानं, आरोहणं; 'flight of s. s' अधिरोहिणी; *See* **Ladder, Staircase.** **4** उपायः, प्रतिपत्ति *f.*, क्रिया; वयस्य कात्र प्रतिपत्तिः (Mal. 3); 'not knowing what s. s to take' प्रतिपत्तिमूढः, विषादलुप्तप्रतिपत्ति (R. III. 40); 's.-brother' वैमात्रः-त्रेयः, विमातृजः, अन्योदर्यः; 's.-child' अन्योदर्यं अपत्यं 's.-daughter' सपत्नीसुता; 's.-father' मातुः पतिः; 's. mother' विमातृ *f.*, सपत्नीमाता; 's.-sister' वैमात्री-त्रैयी, विमातृजा, अन्योदर्या; 's.-son' सपत्नीसुतः. **-v.** पादं विन्यस् 4 U or निक्षिप् 6 P, पादन्यासं-पदविक्षेपं-कृ 8 U. 's.ing over his body' तच्छरीरे पादन्यासं कृत्वा. **2** क्रमशः चल् 1 P or गम् 1 P; (over) आक्रम् 1 U, 4 P; व्याप् 5 P 'as much space as I can s. 'over in three steps' यावतीं भूमिं त्रिपदेनाहं व्याप्नुयां-आक्रमेयं-तावतीं; 's. in between' अंतरा आगम् or पत् 1 P; 's. towards' प्रतिपद् 4 A. **-ping,** *s.* पादन्यासः &c.; 's-stone' सोपानशिला-प्रस्तरः.

Stereotyped, *a.* स्थिर, अपरिवर्तनीय, दृढसंकल्पित.

Sterile, *a.* वंध्य, अफल, निष्फल. **-ity,** वंध्यता, निष्फलत्वं.

Sterling, *a.* यथार्थ, परमार्थ, वास्तविक (की *f.*); अकृत्रिम, सारभूत.

Stern, *s.* पृष्ठभागः. **-a.** निष्ठुर, रूक्ष, दारुण, परुष, काठिन, कठोर, उग्र; निर्दय, क्रूर; 'in a decisive and s. tone' परिच्छेदनिष्ठुर; 'of s. stuff' अभेद्यसार. **-ly,** *adv.* निष्ठुरं, कठोरं, दारुणं, उग्रं. **-ness,** *s.* वैष्ठुर्यं, कठोरता, पारुष्यं.

Sternum, *s.* उरोस्थि *n.*

Sternutation, *s.* *See* **Sneeze.** **-Sternutatory,** *s.* नस्यं.

Stertorous, *a.* घर्घरायमाण.

Stethoscope, *s.* हृत्परीक्षणयंत्रं, हृदयस्फुरणश्राविणीनलिका.

Stew, *v.t.* मदं पच् 1 P. **-s.** चिंता, मनस्तापः.

Steward, *s.* परिचारकः. **2** अर्थाधिकारिन् *m.*, कार्याधीशः. **-ship,** *s.* कार्याधीशत्वं.

Stibium, *s.* सौवीरं, कापोतं, स्रोतोंजनं, यामुनं.

Stick, *s.* दंडः, यष्टि *f.*; वेत्रं, वेत्रयष्टिः (cane); काष्ठं, काष्ठखंडः, लगुडः. **-v. i.** सं-लग् 1 P, संश्लिष् 4 P, संज् pass., आ-सं-अनु-°, आ-सस्ज् 1 P, अनुबंध् 9 P, संसक्ती-संलग्नी-भू 1 P. **2** मस्ज् 6 P, निरुध्-स्तंभ् pass.; 'the wheels stuck fast into the mire' पंके गाढं निरुद्धानि चक्राणि. **3** विक्लृप् 1 A, विशंक् 1 A; *See* **Doubt;** 's. out' प्रलंब् 1 A; *See* **Project.** **-v. t.** निविश् c., अनुबंध्, आ-सं-संज् c., संलग्नीकृ 8 U. **2** प्रसृ c. **-y,** *a.* स्निग्ध, चिक्कण, श्यान, सांद्र, संलग्नशील.

Stickle, *v. i.* पक्षं ग्रह् 9 U. **2** **Contend,** q. v.

Stiff, *a.* कठिन, संहत; दृढ, घन, अनम्य, अशिथिल, स्तब्ध. **2** परुष, रुक्ष, कर्कश. **3** असुगम, दुर्बोध, दुर्ज्ञेय, गहन; 's.-hearted, -necked' प्रतिनिविष्ट, स्तब्ध, दृढनिश्चय. **-en,** *v. t.* काठिनीकृ 8 U, घनीकृ, स्तंभ् 9 P or c. **-v. i.** कठिनीभू 1 P; 'remain with your body s. ed' स्तंभितगात्रास्तिष्ठ. **-ly,** *adv.* दृढं, काठिनं. **-ness,** *s.* काठिन्यं, दृढता, &c.

Stifle, *v. t.* श्वासं नि-, रुध् 7 U, श्वासरोधं कृ. **2** स्तंभ् 9 P or c., निग्रह् 9 P, नियम् 1 P, नियंत्र् 10, *See* **Choke, Suppress;** 'with s. ed words' स्तंभितवाक्.

Stigma, *s.* कलंकः, अंकः, लांछनं, दूषणं. **-tize,** *v. t.* निंद् 1 P, परिवद् 1 A, दुष् c. (दूषयति), कलंकयति (D.), अपकीर्त्या अंक् 10; *See* **Stain.**

Stile, *s.* सोपानमार्गः-पद्धति *f.*

Stiletto, *s.* *See* **Dagger**

Still, *s.* अधोयंत्रं, बकयंत्रं, संधानपात्रं. **-a.** निःशब्द, नीरव, मूक; *See* **Silent.** **2** निष्कंप, निश्चल, अचल, स्थिर, निश्चेष्ट. **3** प्र-उप-शांत, स्तिमित; निर्वात, अक्षुब्ध; *See* **Quiet;** 'heart, be s.' हृदय मा उत्ताम्य (S. 1); 'in the s. midnight' स्तिमितेऽर्धरात्रे; 'to be s.' प्र-उप-शम् 4 P; 's. born' मृतजात; 'a s.-born child' मूढगर्भः, मृतजातः. **-adv.** तथापि. **2** अद्यापि; अद्य यावत्. **3** सदा, सर्वदा. **4** शांतं, तूष्णीं, निःशब्दं. **-v. t.** शम् c. (शमयति), प्र-उप-°, निःशब्दीकृ 8 U. **2** **Stop,** q. v. **-ness,** *s.* निःशब्दता, निश्चलता, शांतता, अक्षोभः.

Stilt, *s.* पादयष्टि *f.*

Stimulate, *v. t.* उत्तिज् c., प्रोत्साह् c., प्रचुद् 10, प्रवृत् c., प्ररुच् c., उद्दीप् c., (शक्ति-तेजः-) वृध् c. **-ing, -Stimulant,** *a.* दीपक-न, उत्तेजक, प्ररोचक, तेजोवर्धिन्, प्रवर्तक, प्रोत्साहक. **-s.** दीपनं-कं, प्र-, रोचनं, जीवनीयं, उत्तेजकं, प्रवर्तकं &c. **-ion,** *s.* प्र-उद्-दीपनं, प्रोत्साहः-हनं. **-Stimulus,** *s.* दीपनं, प्रोत्साहः-हनं, प्रचोदनं, उत्तेजनं, &c.; 'give s. to' वृध् c. &c.

Sting, *v. t.* दंश् 1 P. **2** अत्यंतं पीड् 10 or व्यथ् c. (व्यथयति), मर्माणि भिद्-छिद् 7 P or स्पृश् 6 P. **-s.** दंशः, दंशचंचु *f.*, कंटकः, शंकुः, (of a scorpion) अलं. **2** मर्मन् *n.*, रसः. **-ing,** *a.* कटु, दंशक, मर्मस्पृश्, अरुंतुद.

